Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पारमेश्वरागम-मीमांसा

सम्पादक
पं० व्रजवल्लभ द्विवेदी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शोधप्रकाशन ग्रन्थमाला - ४१

पारमेश्वरागम-मीमांसा

शास्त्रगोष्ठी-विवरण

सम्पादक
राष्ट्रियपण्डित व्रजवल्लभ द्विवेदी
निदेशक, शैवभारती-शोध-प्रतिष्ठानम्

प्रकाशक
शैवभारती-शोध-प्रतिष्ठानम्
जंगमवाड़ी मठ, वाराणसी - २२१ ००१

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रकाशक
शैवभारती-शोध-प्रतिष्ठानम्
डी. ३५/७७, जंगमवाड़ी मठ
वाराणसी - २२१ ००१

© शैवभारती-शोध-प्रतिष्ठानम्

प्रथम संस्करण : २००६

मूल्य : सजिल्द रु० ५००.००
अजिल्द रु० ४५०.००

अक्षर संयोजन :
जौहरी प्रोसेस
जंगमवाड़ी, वाराणसी

मुद्रक :
मित्तल ऑफसेट
सुन्दरपुर, वाराणसी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

Research Publications Series—41

PĀRAMEŚVARĀGAMA MĪMĀṀSĀ

Edited by
PT. VRAJAVALLABHA DWIVEDI
Director, Shaiva Bharati Shodha Pratishthanam

SHAIVA BHARATI SHODHA PRATISHTHANAM
D. 35/77, Jangamawadimath, Varanasi - 221 001

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

Published by :
SHAIVA BHARATI SHODHA PRATISHTHANAM
D. 35/77, Jangamawadimath
Varanasi - 221 001

© Shaiva Bharati Shodha Pratishthanam

ISBN 81-86768-71-8 (Hb)
ISBN 81-86768-72-6 (Pb)

First published : 2006

Price : Rs. 500.00 (Hb) Rs. 450 (Pb)

Laser Typeset at :
Jauhari Process
Jangambari, Varanasi - 221 001

Printed at :
Mittal Offset
Sundarpur, Varanasi

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शैवभारती शोध प्रतिष्ठान के संस्थापक
श्री काशीविश्वाराध्य ज्ञानसिंहासनाधीश्वर श्री १००८ जगद्गुरु
डॉ. चन्द्रशेखर शिवाचार्य महास्वामी जी का

शुभाशीर्वचन

काशी जंगमवाड़ी मठ के श्री जगद्गुरु विश्वाराध्य जनकल्याण प्रतिष्ठान द्वारा संचालित शैवभारती शोध प्रतिष्ठान विगत अनेक वर्षों से प्राचीन शैवागमों के संशोधन, सम्पादन एवं प्रकाशन आदि कार्य करता आ रहा है। साथ ही साथ शास्त्र-संगोष्ठी का आयोजन भी समय-समय पर कर रहा है। इस शैवभारती शोध प्रतिष्ठान के निदेशक राष्ट्रियपण्डित श्री व्रजवल्लभ द्विवेदी इन सभी कार्यों को सुचारु रूप से चला रहे हैं।

अट्ठाईस शैवागम वीरशैव धर्म-दर्शन के मूल स्रोत माने जाते हैं। उनमें पारमेश्वरागम एक प्रमुख आगम है। इसलिए पारमेश्वरागम को आधार मानकर हमारे शोधसंस्थान द्वारा एक राष्ट्रीय शास्त्रसंगोष्ठी आयोजित की गयी थी। उसमें विभिन्न प्रान्तों के ३१ विद्वानों ने भाग लेकर अपने विद्वत्तापूर्ण निबन्ध प्रस्तुत किये थे। उन सारे निबन्धों को एक ग्रन्थ के रूप में प्रकाशित किया जा रहा है, यह जानकर हमें अपार आनन्द हुआ।

इस गोष्ठी में पढ़े गये षडक्षरीमन्त्र मीमांसा, कर्मज्ञानसमुच्चय, षट्स्थल का स्वरूप, सप्तविध शैव, निराभारी वीरशैव, शैवागमों में भक्ति की महिमा, वीरशैवदीक्षा में स्त्री, शूद्र आदि का अधिकार, लिङ्गधारण दीक्षा, शिवतत्त्व विमर्श, वीरशैवों की आचारमीमांसा, शैवमतों में वीरशैव मत का वैशिष्ट्य आदि विषयों पर विद्वानों के निबन्ध वर्तमान समय के अनुरूप समझे जाते हैं।

आगमशास्त्र में एक ही जन्म में मुक्ति के सिद्धान्त को बताया गया है। "एकेन जन्मना मुक्तिः" इस उक्ति के द्वारा पारमेश्वरागम उसका समर्थन करता है। श्री सिद्धान्तशिखामणि में—"जन्तुरन्त्यशरीरोऽसौ पिण्डब्दाभिधेयकः" इस उक्ति से उसी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिद्धान्त का समर्थन है। इन उक्तियों के विचार से वीरशैव सिद्धान्त में एक ही जन्म में मुक्त होने की बात सिद्ध होती है। यद्यपि मुक्ति चरम पुरुषार्थ है, सुलभतया प्राप्त नहीं होती। ऐसी दुर्लभ मुक्ति को एक ही जन्म में यदि पाना होगा, तो उसके कितनी साधना करनी पड़ेगी यह एक गंभीर विचारणीय विषय है।

इसके लिए वीरशैव सिद्धान्त में एक उत्कृष्ट शिवयोग का प्रतिपादन किया गया है। इस योग के साधक को जन्म के आठवें वर्ष में अपने परम्परागत गुरु से दीक्षा लेकर साधना में प्रविष्ट होना पड़ता है। इस साधक के लिए आठ प्रकार के आवरण (गुरु, लिंग, जंगम, विभूति, रुद्राक्ष, मन्त्र, पादोदक और प्रसाद), पांच प्रकार के आचार (सदाचार, शिवाचार, लिंगाचार, गणाचार एवं भृत्याचार), एवं षट्स्थल (भक्त, माहेश्वर, प्रसादी, प्राणलिंगी, शरण और ऐक्य) का मार्ग बताया गया है।

जो साधक उपर्युक्त साधना मार्ग से अपने जन्म के आठवें वर्ष से यदि प्रामाणिक रूप से साधना करेगा, तो उसे अवश्य उसी जन्म में मुक्ति मिल सकती है। इस साधना मार्ग में साधना करने के लिए उच्च-नीच कुल का तथा स्त्री-पुरुष का भेदभाव नहीं किया जाता। जाति के आधार पर अथवा लिंग के आधार पर दीक्षा नहीं दी जाती, किन्तु "शक्तिपातं समालोक्य दीक्षया योजयेदमुम्" इस उक्ति के अनुसार योग्यता-सम्पन्न किसी को भी दीक्षा दी जाती है। यदि साधक योग्य रहेगा, तो उसको साधना के बल पर एक ही जन्म में मुक्ति मिलने में कोई कठिनाई नहीं हो सकती।

इसी सिद्धान्त के आधार पर आगमशास्त्रों में एक ही जन्म में मुक्ति पाने की बात कही गयी है। प्रस्तुत शास्त्रसंगोष्ठी में इन्हीं सिद्धान्तों पर विद्वानों के विद्वत्तापूर्ण निबन्ध प्रस्तुत किये गये हैं। इन सारे निबन्धों के "पारमेश्वरागम मीमांसा" इस नाम से ग्रन्थ के रूप में प्रकाशित होने से ये सारी जनता को समझने के लिए सुलभ होंगे।

हम यहाँ आशा करते हैं कि जिज्ञासु वाचकगण इस ग्रन्थ से बहुत ही अपूर्व ज्ञान अर्जित कर सकते हैं। अतः इन सभी निबन्धों के वाचक विद्वानों को और इनके प्रकाशन में सहयोग करने वाले डॉ. ददन उपाध्याय, डॉ. हरिवंश पाण्डेय आदि-सभी को अनन्त मंगलाशीर्वाद। विशेष रूप से अपनी वृद्धावस्था में भी तत्परतापूर्वक इनका सम्पादन करने वाले शैवभारती शोध प्रतिष्ठान के निदेशक राष्ट्रियपण्डित श्री व्रजवल्लभ द्विवेदी जी के प्रति हम आशा करते है कि इनको शारीरिक एवं मानसिक रूप से स्वस्थ रखकर साहित्य सेवा करने की शक्ति भूतभावन विश्वनाथ प्रदान करें। अन्त में सभी को अनन्त मंगलाशीर्वाद।

इत्याशिषः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रस्तावना

वाराणसी के जंगमवाड़ी मठ द्वारा संचालित शैवभारती शोध प्रतिष्ठान के उद्देश्यों में एक समय-समय पर तन्त्रागम-शास्त्र पर, विशेषकर वीरशैव धर्म-दर्शन पर विद्वद्गोष्ठियों का आयोजन करना भी है। तदनुसार इस विषय के महनीय ग्रन्थ पारमेश्वरागम के विशिष्ट विषयों को लेकर एक अखिल भारतीय त्रिदिवसीय (१.१२.२००१ से ३.१२.२००१) शास्त्रसंगोष्ठी आयोजित की गई। विभिन्न राज्यों के अनेक विद्वान् इसमें सम्मिलित हुए और उसमें ३१ शोधनिबन्ध पढ़े गए। साथ ही उन पर उपस्थित विद्वानों में विचार-विनिमय हुआ। अब उन सभी निबन्धों को "पारमेश्वरागम मीमांसा" के नाम से प्रकाशित किया जा रहा है। विद्वानों के विचार-विनिमय को हम यहाँ दे नहीं पा रहे हैं, इसका हमें खेद है।

पारमेश्वरागम को आधार मानकर ही यह शास्त्रसंगोष्ठी आयोजित हुई थी। इस आगम में वीरशैव धर्म-दर्शन के प्राय: सभी प्रमुख विषय समाविष्ट हैं। उन सब पर यहाँ एकाधिक निबन्ध प्रस्तुत हुए हैं। पाठकों की सुविधा के लिए कि वे इन निबन्धों की तुलनात्मक समीक्षा कर सकें, एक विषय के निबन्धों को एक साथ दिया गया है। जैसे कि पंचाक्षरी-षडक्षरी मन्त्र, ज्ञानकर्मसमुच्चय, षट्स्थलसिद्धान्त आदि। शैव भेदोपभेद, शैव भक्ति, वीरशैव दीक्षा में स्त्री-शूद्र आदि का अधिकार, वीरशैव मत में लिंग-पूजा, वीरशैव मत की अपनी विशिष्टता जैसे विषयों को यहाँ क्रमश: प्रस्तुत किया गया है। इनसे इस आगम की विशिष्टता पर और वर्तमान समय में इसकी सामाजिक नवनिर्माण में उपयोगिता पर पर्याप्त प्रकाश पड़ता है।

निबन्धों के लिए संस्कृत, हिन्दी और अंग्रेजी भाषा को मान्यता दी गई थी। अधिकांश निबन्ध इन्हीं भाषाओं में निबद्ध हैं। मराठी भाषा के निबन्ध को भी मूल रूप में ही यहाँ प्रस्तुत किया गया है। कन्नड़ भाषा में लिखित एक निबन्ध भी हमें मिला, किन्तु मूल लेखक ने ही उसका हिन्दी स्वरूप भी प्रस्तुत कर दिया। हम इनके आभारी हैं।

आगम-तन्त्रशास्त्र में एक ही जन्म में मुक्ति के सिद्धान्त को मान्यता मिली है। जीवन्मुक्ति का सिद्धान्त अनेक भारतीय दर्शनों को भी मान्य है। इनके लिए एक विशेष प्रकार की दिनचर्या अपेक्षित रहती है, जिससे व्यक्ति कर्मसाम्य की स्थिति को प्राप्त कर

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लेता है। इस स्थिति में सुन्दोपसुन्द-न्याय से शिवाराधक के पुण्य और पाप आपस में टकरा कर क्षीण हो जाते हैं। प्रत्यभिज्ञा दर्शन में पौंस्न (आत्मगत) और बौद्ध (बुद्धिगत) के भेद से अज्ञान और ज्ञान के दो-दो भेद मान्य हैं। कर्मसाम्य की स्थिति में बौद्ध अज्ञान निवृत्त हो जाता है और बौद्ध ज्ञान के उदय से व्यक्ति जीवन्मुक्त स्थिति को प्राप्त कर लेता है। बौद्ध ज्ञान का उदय होने पर उसके पौंस्न अज्ञान की निवृत्ति हो जाती है। तब पौंस्न ज्ञान का उदय अवश्य होता है, किन्तु मुक्ति शरीरपात के उपरान्त ही मिलती है। सांख्य दर्शन के अनुसार वह चक्रभ्रमिवत्, कुम्हार के चाक की गति के समान वर्तमान शरीर को धारण किए रहता है। शैवागमों में हिंगु (हींग) त्यक्त पात्र और कस्तूरी का उदाहरण इसी प्रसंग में दिया जाता है। हींग के पात्र से हींग को और वस्त्रपेटिका से कस्तूरी या फिनाइल की गोली को हटा लेने पर भी हींग, कस्तूरी या फिनाइल की गन्ध बनी रहती है, उसी तरह जीवन्मुक्त का शरीर पौंस्न ज्ञान का उदय होने पर भी नष्ट नहीं होगा। सद्योज्योति शिवाचार्य की मोक्षकारिका के निम्न दो श्लोकों से ऊपर निर्दिष्ट जीवन्मुक्ति की स्थिति और मोक्ष की दशा की तुलना की जा सकती है—

अन्तःकरणवृत्तिर्या बोधाख्या सा महेश्वरम्।
न प्रकाशयितुं शक्ता पाशत्वान्निगडादिवत्।।१०६।।

यहाँ वर्णित बोध नामक अन्तःकरण की वृत्ति बौद्ध ज्ञान या संवित् से अभिन्न है। प्रपंचसार (१०.३) ने बोध और संवित् को पर्यायवाची माना है। बौद्ध अज्ञान की निवृत्ति कराने से यह जीवन्मुक्ति की दशा तक साधक को पहुँचा पाती है, परमेश्वर का साक्षात्कार कराने में, अर्थात् मुक्ति को दिलाने में वह असमर्थ है। तब मुक्ति की प्राप्ति कैसे होगी ? इसकी विधि भी वहीं आगे बताई गई है—

शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा।
शिवं शक्त्यादिभिः सार्धं पश्यत्यात्मा गतावृतिः।।११.१।।

इस प्रकार पौंस्न ज्ञान के उदय से सारे आवरणों के नष्ट हो जाने पर साधक ऐसी मुक्तिदशा को प्राप्त कर लेता है कि फिर उसे नया जन्म नहीं लेना पड़ता। शाक्त तन्त्रों में इसे अपश्चिम जन्म कहा गया है। इस प्रकार हम देखते हैं कि द्वैतवादी सिद्धान्त-शैव, अद्वैतवादी काश्मीरशैव और द्वैताद्वैतवादी वीरशैव दर्शन में जीवन्मुक्ति और मुक्ति की प्राप्ति की प्रक्रिया प्रायः एक-सी है।

जीवन्मुक्ति दशा में व्यक्ति कुछ-न-कुछ करेगा ही। श्रीमद्भगवद्गीता का कहना है— "नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्" (३.५)। ऐसी स्थिति में कर्म-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

साम्य दशा कैसे बनी रह सकती है ? इस प्रश्न का समाधान स्वयं श्रुति ने ही किया है कि जीवन्मुक्त व्यक्ति की सेवा करने वाले में उसके पुण्य संक्रान्त हो जाते हैं और उससे द्वेषभाव रखने वालों में उसके पाप कर्म, क्योंकि जीवन्मुक्त व्यक्ति का यह लक्षण अनेक स्थलों पर उद्धृत इस वचन में बताया गया है— "न हृष्यत्युपकारेण नापकारेण कुप्यति" । इस प्रकार हर्ष और विषाद से ऊपर उठे उस जीवन्मुक्त पुरुष में पुण्य और पाप की कोई स्थिति नहीं रहने पाती और उसकी कर्मसाम्य दशा में कोई व्यवधान नहीं आने पाता ।

इस जीवन्मुक्ति दशा की प्राप्ति के लिए प्रस्तुत आगम के दो स्थल विशेष रूप से अवधेय हैं। प्रथम उद्धरण में शिवभक्त के आठ लक्षण प्रदर्शित हैं । ये वचन यहाँ दो स्थानों पर (१२.२६-२८ और १७.८३-८५) देखे जा सकते हैं । प्रकरण का उपसंहार इस तरह से किया गया है—

एतदष्टगुणं चिह्नं यस्मिन् म्लेच्छेऽपि दृश्यते ।
स शिवेन्द्रो यतिः श्रीमान् स शुचिः स च पण्डितः ।। (१२.२८)

ग्रन्थ देखने की जिज्ञासा बनी रहे, इस लिए शिवभक्त के उन आठ लक्षणों को हम यहाँ उद्धृत नहीं कर रहे हैं ।

द्वितीय उद्धरण इस प्रकार है—

अद्वेष्टारोऽधिके स्वस्मात् स्वसमेष्वनसूयवः ।
अतिरस्कारिणो न्यूने वीरास्ते शिवयोगिनः ।। (८.१९)

शिवयोगी के लिए यहाँ द्वेष, असूया और तिरस्कार जैसे दुर्गुणों से दूर रहने का उपदेश दिया गया है । इस वचन की आप बौद्ध महाकवि मातृचेट के अध्यर्धशतक में भगवान् बुद्ध की स्तुति के प्रसंग में प्रस्तुत इस वचन से तुलना कीजिए—

अकृत्वेर्ष्यां विशिष्टेषु हीनाननवमत्य च ।
अगत्वा सदृशैः स्पर्धां त्वं लोके श्रेष्ठतां गतः ।।

पारमेश्वरागम के अगले वचन (८.३०) में भी स्पर्धा, असूया और तिरस्कार शब्द ही निर्दिष्ट हैं। इन वचनों में अद्भुत साम्य है। जंगमवाड़ी मठ, वाराणसी से प्रकाशित ग्रन्थ *साम्ययोगमीमांसा* में प्रसंगवश दी गई एक टिप्पणी (पृ. १७६) में प्रो. मुकुटबिहारीलाल जी ने बताया है कि गाँधी जी स्पर्धा की नीति को अनैतिक और 'सहकारिता' के सिद्धान्त पर आधारित व्यवस्था को 'अहिंसात्मक' मानवीय गुण समझते थे । 'सहकारिता' के सिद्धान्त की तुलना हम कौटिल्य के अर्थशास्त्र में प्रदर्शित

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संभूय-समुत्थान की प्रक्रिया से कर सकते हैं। मानव को इस ओर आगे बढ़ने का प्रयास अवश्य करना चाहिए।

प्रस्तुत आगम की एक और विशेषता यह है कि यहाँ सप्तविध शैवों के अतिरिक्त पंचविध सौगत मत (१.८) के साथ, वैदिक मत, पंचविध सौर मत, पंचविध वैष्णव मत (१.१०-१४) के साथ गाणपत्य आदि मतों का (१. १८-२१) तथा षड्विध दर्शनों का (१.२२-२३) उल्लेख कर शाक्त, कापाल, भैरव आदि तन्त्रों का भी परिगणन किया गया है। (१.२९-३२)। इन सबका परिचय प्रस्तुत आगम के प्रथम, सप्तम, अष्टम और नवम, पंचदश और सप्तदश पटलों में देखा जा सकता है। नौ से तेरह संख्या तक के निबन्धों में भी संक्षेप अथवा विस्तार से यह विषय संमिलित है। इस प्रकार तन्त्रागमशास्त्र के विभिन्न मत-मतान्तरों की, विशेष कर सप्तविध शैवों की और निराभारी वीरशैवों की यहाँ विशद चर्चा मिलती है। शक्तिसंगमतन्त्र के चतुर्थ खण्ड के संस्कृत उपोद्घात में तथा अन्यत्र भी हमने इस विषय को प्रस्तुत किया है। इस प्रकार हम देखते हैं कि भारत में तथा अन्यत्र भी इस शास्त्र का बहुत विस्तार हुआ था। हम बता ही चुके हैं कि आधुनिक सामाजिक और सांस्कृतिक समस्याओं के समाधान में इनका महनीय सहयोग हो सकता है।

हमारे सामान्य निवेदन को स्वीकार कर इस विषय के विख्यात विद्वानों ने अपनी रुचि के विषय को चुनने और उसे लिपिबद्ध करने में अपना अमूल्य समय दिया, इसके लिए हम सभी के प्रति अपना आभार प्रकट करते हैं। भविष्य में भी वे हमारा इसी प्रकार सहयोग करेंगे, इसका हमें पूरा विश्वास है। शैवभारती शोध प्रतिष्ठान के प्रकाशन सम्बन्धी कार्यों में डॉ. जी.सी. केण्डद मठ का सदा सहयोग रहा है। यहाँ प्रकाशित अंग्रेजी लेखों के संशोधन में डॉ. रमा घोष ने स्मरणीय सहायता की है। संस्कृत और हिन्दी निबन्धों के संशोधन में डॉ. शीतलाप्रसाद उपाध्याय, डॉ. ददन उपाध्याय और डॉ. हरिवंश पांडेय का सहयोग भुलाया नहीं जा सकता। आशा है कि इन सबका सहयोग हमें आगे भी मिलता रहेगा। हम इन सबके प्रति शैवभारती शोध प्रतिष्ठान की ओर से साधुवाद प्रकाशित करते हैं।

शैवभारती शोध प्रतिष्ठान
जंगमवाड़ी मठ, वाराणसी
महाशिवरात्रि, संवत् २०६१

विद्वद्वशंवद
ब्रजवल्लभ द्विवेदी
निदेशक

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषय-सूची

	शुभाशीर्वचन	V-VI
	प्रस्तावना	VII-X
	विषयोपस्थापन—निदेशक, शैवभारती शोध प्रतिष्ठान	१-४
१.	पञ्चाक्षरीप्रपञ्चः (पञ्चाक्षरीमन्त्रस्य विशदं रूपम्)—डॉ. अत्तलूरि मृत्युञ्जय शर्मा	५-११
२.	पञ्चाक्षरी षडक्षरी चेति शिवमन्त्रस्य विस्तृतमीमांसा— डॉ. एम. शिवकुमारस्वामी	१२-४४
३.	वीरशैवानां कर्मज्ञानसमुच्चयः—को. रं. बसवराजु	४५-५५
४.	पारमेश्वरागमे ज्ञानकर्मसमन्वयः—डॉ. परशी मल्लिकार्जुन	५६-६०
५.	पारमेश्वरागम में निरूपित षट्स्थल का स्वरूप— षण्मुखय्य अक्कूरमठ	६१-७१
६.	पारमेश्वरागम में निरूपित षट्स्थल का स्वरूप— सिद्धराम देव हिरेमठ (हिप्परगि)	७२-८२
७.	षट्स्थल स्वरूप—डॉ. अविनाशनाथ त्रिपाठी	८३-८४
८.	Aṣṭāvaraṇas in Śaivāgamas— Dr. C. Shivakumara Swamy	८५-१२३
९.	वीरशैवागमोत्तरभाग में वर्णित सप्तविध शैव और उनकी क्रमिक श्रेष्ठता— विद्वान्, जी.वी. शिवस्वामी	१२४-१३२
१०.	पारमेश्वरागमे व्याख्यातानि मतमतान्तराणि— डॉ. अभिनवश्रीश्रीकल्मठसवदत्ति	१३३-१३४
११.	पारमेश्वरागमं पुरस्कृत्य शैवमतभेदनिरूपणम्— आचार्य श्री एन.शङ्करशास्त्री	१३५-१३७
१२.	Speciality of Vīraśaiva cult and its Subdivision— Dr. R.N. Aralikatti	१३८-१४४
१३.	निराभारी वीरशैवाचे पारमेश्वरागमसम्मत स्वरूप— डॉ. शे. दे. पसारकर	१४५-१४९
१४.	Praise of Śiva According to Pārameśvarāgama— Dr. M. N. Joshi	१५०-१६४

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

१५. शैवागमों में भक्ति की महिमा— शिवाप्पा खके १६५-१७२

१६. वीरशैव दीक्षा में स्त्री-शूद्र आदि का अधिकार— डॉ. महादेव शिवाचार्य, (बबलेश्वर) १७३-१८५

१७. Secular Outlook in the Pārameśvarāgama— Dr. P. M. Dinesh १८६-१८९

१८. वीरशैव दीक्षा में स्त्री-शूद्र आदि का अधिकार— श्रीमती प्रमोदिनी पण्डा १९०-१९३

१९. आगमेषु मन्त्रजपतत्त्वविवेचनम्—डॉ.राजनाथत्रिपाठी १९४-२०१

२०. भस्म, रुद्राक्ष एवं लिङ्गधारण-दीक्षा—डॉ. गोविन्द सप्तर्षि २०२-२१३

२१. पारमेश्वरागमसारसर्वस्वम्—डॉ. कमलेशझा २१४-२२१

२२. उपनिषद् और ब्रह्मसूत्र : पारमेश्वरागम के सन्दर्भ में— जगन्नाथशास्त्री तैलङ्ग २२२-२३४

२३. शिवतत्त्वविमर्शः—प्रो. रामकिशोरत्रिपाठी २३५-२५०

२४. सद्गुरु के लक्षण और उसकी महिमा—प्रो. गङ्गाधर पण्डा २५१-२५५

२५. पारमेश्वरागमे वर्णितं वीरशैवमतमाहात्म्यम्—जगद्गुरु अन्नदानीश्वर महास्वामी २५६-२७१

२६. वीरशैवमत में दीक्षाविधान—पं. जनार्दन पाण्डेय २७२-२७५

२७. Liṅga-worship in Vīra-Śaivism—Dr. Rama Ghose २७६-२८०

२८. वीरशैवों की आचारमीमांसा—डॉ. प्रभुनाथ द्विवेदी २८१-२८६

२९. वीरशैवमत—डॉ. राधेश्याम चतुर्वेदी २८७-२८८

३०. वीरशैव मत में मन्त्र का स्वरूप—डॉ. शीतलाप्रसाद उपाध्याय २८९-२९३

३१. शैवमतों में वीरशैव मत का वैशिष्ट्य—डॉ.मखलेश कुमार २९४-२९९

●

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषयोपस्थापन

काशी ज्ञानसिंहासनाधीश्वर शिवाचार्य महास्वामी जी, अध्यक्ष महोदय 'पद्मश्री' प्रो. विश्वनाथ वेंकटाचलम् जी, गोष्ठी के उद्घाटक प्रो. वी. कुटुम्ब शास्त्री जी, मुख्य अतिथि डॉ. एम. शिवकुमार स्वामी जी, पण्डितप्रवर प्रो. सुधांशुशेखर शास्त्री जी, उपस्थित शिवाचार्यगण, विद्वद्गण एवं बन्धु-भगिनियों !

आपके समक्ष मैं इस विद्वद्गोष्ठी के विचारणीय विषयों को उपस्थापित करने के लिये उपस्थित हूँ। इस विद्वद्गोष्ठी के मुख्य विषयों की उपस्थापना तो उस पत्र के साथ ही हो गई थी, जिसमें संलग्न सूची में अंकित किसी एक विषय पर निबन्ध लिखकर भेजने की प्रार्थना की गई थी। उनकी यहाँ पुन: चर्चा न कर कुछ विचारणीय मुद्दों को मैं उठाना चाहता हूँ, जो आज के भारत के ही नहीं, पूरी मानवता के भी चिन्ता के कारण बने हुए हैं।

प्राय: हम देखते हैं कि आधुनिक इतिहासज्ञ शिवागमों को मोहेंजोदड़ो-हड़प्पा से जोड़ते हैं और उसको द्रविड़ संस्कृति नाम देते हैं। द्वन्द्वात्मक भौतिकवादी विचार-सरणि का सहारा लेकर ये कहते हैं कि वैदिक संस्कृति के अग्रदूत आर्यों ने बाहर से यहाँ आकर द्रविड़ संस्कृति को पराभूत कर दिया। सिन्धु-सभ्यता की लिपि का जब तक सही वाचन नहीं हो जाता, तब तक इस तरह के विचारों को प्रस्थापित करने का कोई आधार हमें प्रतीत नहीं होता। हाँ, इस देश को छिन्न-भिन्न कर देने के प्रच्छन्न बीज हमें इसमें दिखाई पड़ते हैं और तमिलनाडु एवं श्रीलङ्का में ये अंकुरित होते हुए भी दिख रहे हैं। इसका शीघ्र प्रतीकार अपेक्षित है।

आज का भारत आचार्य शङ्कर से लेकर वल्लभाचार्य तक की लम्बी द्रविड़ाचार्यों की शिक्षा से सञ्चालित है। रामेश्वर से केदारेश्वर, सोमनाथ से वैद्यनाथ धाम तक स्थित द्वादश ज्योतिर्लिङ्गों की यात्रा सभी श्रद्धावनत भारतीय करते हैं। वीरशैवाचार्यों ने भी श्रीशैल से उखी मठ पर्यन्त भारतभूमि में अपने पावन पाँच पीठों की प्रस्थापना की थी। पूरे भारतवर्ष की इस एकता को खण्ड-खण्ड कर देने वाले विचारों का यदि समय रहते अब भी हमने प्रतीकार नहीं किया, तो विश्व का यह प्राचीनतम देश भी आधुनिक सभ्यता और विचारों के प्रतीकरूपी गणराज्य की भाँति टुकड़े-टुकड़े हो जायेगा।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पारमेश्वरागम इसकी अनुमति नहीं देता। इस आगम की हम श्रीमद्भगवद्गीता के साथ तुलना कर सकते हैं। शिवागम सौरभ (कन्नड़ ग्रन्थ) के अनुबन्ध (पृ. ५७-६७) में तथा लिङ्गधारणचन्द्रिका के अतिविस्तृत अंग्रेजी भाषा के उपोद्घात (पृ. २४६-२५५) में यह कार्य किया भी गया है।

कश्मीरी प्रत्यभिज्ञादर्शन के महान् आचार्य अभिनवगुप्त ने निगम और आगम की परिभाषा देकर आगम के विषय में लिखा है– "स च यो यस्य हृदये निरूढिमागतः स एव।.....न हि बुद्धो नाम नियतः कश्चित्, अपि तु भावना-बलप्रतिलब्धक्षणिकादिदृढविमर्शः। तस्य क्षणिकादिभावनोपदेशी गुरुः पूर्वबुद्धः, तस्याप्यन्य इति क्रमेणानियतवक्तृकत्वात् पारमेश्वरविमर्शमयतैव वस्तुतः। एवं चतुर्विंशतितत्त्वभावनाभावितः कपिलो मन्तव्यः। अत एव सर्वागमा अनादय एव" (ई. प्र. वि. वि., भा. ३, पृ. ९६-९८)। इस परिभाषा के अन्तर्गत हम कृतान्तपञ्चक के नाम से प्रसिद्ध सांख्य आदि शास्त्रों का प्रामाण्य तो स्वीकार कर ही सकते हैं और सिद्धान्तशिखामणि जैसे वीरशैव धर्म-दर्शन के प्रतिनिधि ग्रन्थ में ऐसा किया भी गया है; साथ ही हम अन्य आधुनिक धर्मों का भी समावेश कर आचार्य शङ्कर के द्वारा प्रवर्तित पञ्चायतन अथवा षडायतन पूजापद्धति की तरह अन्य धर्मों में भी इस पद्धति का बीज-वपन कर सकते हैं। इस शुभ कार्य में भी पारमेश्वरागम हमारी सही सहायता कर सकता है। यहाँ कहा गया है—

स्त्रियस्तु लिङ्गधारिण्यः पुरुषा विष्णुसेवकाः।।
पुरुषा लिङ्गिनः केचिद् वैष्णव्यस्तु स्त्रियस्तथा।
तयोरहं गतिश्चैव मत्प्रीतिरुभयोः समा।।

(पा. १७. २०-२१)

आज हम इसी दृष्टि का सहारा लेकर समस्त भारतीय प्रजा में सौहार्द स्थापित कर सकते हैं। यहीं का दो जगह स्मृत अन्य वचन भी देखिये—

शिवभक्तेषु वात्सल्यं पूजायां चानुमोदनम्।
स्वयमभ्यर्चनं चैव तदर्थं चाङ्गचेष्टनम्।।
तत्कथाश्रवणे भक्तिः स्वरनेत्राङ्गधिक्रिया।
शिवानुस्मरणं नित्यं सर्वथा तदकैतवम्।।
एतदष्टगुणं चिह्नं यस्मिन् म्लेच्छेऽपि दृश्यते।
स शिवेन्द्रो यतिः श्रीमान् स शुचिः स च पण्डितः।।

(पा. १२. २६-२८; एवं १७. ८३-८५)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मुकुटसंहिता का यह वचन भी इसी का समर्थन करता है— "द्विजोऽपि मायी त्याज्यस्तु म्लेच्छो ग्राह्यो ह्यमायकः" । शिवपुराण, गरुडपुराण जैसे ग्रन्थों में और पूरे भारत में विभिन्न भाषाओं के माध्यम से मुखरित सन्तों की वाणियों में इन्हीं विचारों की प्रस्तुति हुई है। ऐसा होने पर भी आज ब्राह्मणवाद, मनुवाद जैसे वैवर्तिक शब्दों के सहारे भारतीय प्रजा को भ्रमित ही नहीं किया जा रहा है, भारतीय धर्म और संस्कृति को अपसंस्कृतियों की गोद में बैठा देने का षड्यन्त्र भी रचा जा रहा है। भारतीय सनातन धर्म और संस्कृति के विरुद्ध किया जा रहा यह मिथ्या प्रचार ही आतङ्कवाद को प्रश्रय दे रहा है।

आगम-तन्त्रशास्त्र में कुल, जाति आदि के अभिमान को दुराग्रह अथवा पाश नाम दिया गया है। "स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्" भगवद्गीता के इस वचन को यहाँ पूरी मान्यता मिली है। वीरशैव आगमों में हम इसको स्पष्ट रूप से देख सकते हैं। कूर्मपुराण में भी चतुर्वर्ण और जाति-व्यवस्था के स्थान पर ब्राह्म, शैव और वैष्णव नामक तीन वर्णों की भी सत्ता मानी गई है। बौद्ध तन्त्र कालचक्र की विमलप्रभा टीका में तीन मतों के रूप में इनकी चर्चा मिलती है। तन्त्रागमशास्त्र का सिद्धान्त है कि दीक्षा के बाद व्यक्ति की पूर्व जाति समाप्त हो जाती है, वह जिस मत की दीक्षा लेता है, वही उसकी पहचान रह जाती है। यहाँ का स्पष्ट उद्घोष है– "प्राग्जात्युदीरणाद् देवि क्रव्यादत्वं शतं समाः" । संन्यासी के लिए भी तो शास्त्रों का यही आदेश है कि वह अपनी पूर्व जाति को भूल जाय। वीरशैव धर्म में इसका पूरी तरह से पालन होता है और स्त्री को भी सभी अवस्थाओं में इष्टलिङ्ग के धारण और पूजन का अधिकार मान्य है।

निरन्तरता के साथ परिवर्तन भारतीय संस्कृति का विशेष गुण है। सेमेटिक धर्मों में ऐसा नहीं हो पाया है, अतः इन धर्मों के अनुयायी भारतीय सनातन धर्म को भी उसी रूप में देखते हैं, जो रूप उसका प्राचीन काल में था। ब्राह्मणवाद, मनुवाद जैसे शब्दों की प्रवृत्ति इसी मानसिकता को उजागर करती है। इसी के निवारण के लिए हमने "तन्त्रागमीय धर्म-दर्शन" नामक अपने बृहद् ग्रन्थ में बताया है कि वैष्णव, शैव, शाक्त, बौद्ध, जैन और स्मार्त तन्त्रों के माध्यम से 'श्रमण-ब्राह्मणम्' की संकुचित दृष्टि का परित्याग कर कैसे नूतन विचारों को स्वीकार किया गया। "पुराणमित्येव न साधु सर्वम्" यहाँ महाकवि कालिदास ने भी यही कहा है। इन्हीं के आधार पर भारत में एक समन्वयात्मक दृष्टि का विकास हुआ। सन्तों, भक्तों, सूफियों और गुरुओं ने इन उपदेशों को अपनी-अपनी वाणी में पिरोया है। सेमेटिक धर्मों को भी इस परिधि में लाया जाना चाहिये कि वे भी अपने-अपने धर्मों के कालातीत तत्त्वों का परित्याग कर

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सकें। इन धर्मों में प्रविष्ट दुराग्रहों का परित्याग अपेक्षित है। इनके हटने पर ही हम आतङ्कवाद जैसी अमानवीय दुष्प्रवृत्तियों पर सही रूप में रोक लगा सकते हैं।

तन्त्रागमशास्त्र सर्वथा वेदविरोधी है, यह धारणा भी सही नहीं है। हमने "तन्त्रागमशास्त्र पर वैदिक कर्मकाण्ड का प्रभाव" शीर्षक निबन्ध लिखा था। अभी हाल में प्रकाशित होने वाले "भारतीय संस्कृति का समग्र स्वरूप" नामक ग्रन्थ में इसका समावेश किया गया है। इसमें हमने बताया है कि दीक्षा के अवसर पर तथा मन्त्र-पुरश्चरण के प्रसङ्ग में आगम-तन्त्रशास्त्र की सभी शाखाओं में अग्नि-समाराधन का विधान है। पारमेश्वरागम के चतुर्थ पटल में भी यह विषय वर्णित है। बौद्ध कालचक्रतन्त्र की टीका विमलप्रभा में चतुर्थ ज्ञानाग्नि के निरूपण के प्रसङ्ग में ऋग्वेद और यजुर्वेद का मन्त्र भी उद्धृत है। परस्पर के विग्रह को भारतीय दृष्टि सदा नकारती रही है। सेमेटिक धर्मों की सङ्गति से यह दूषण इधर इसमें भी पुनः प्रविष्ट हो गया है, जो आगम-तन्त्रशास्त्र एवं उनसे अनुप्राणित सन्तों की वाणियों के कारण आँख-ओझल हो गया था। उन उपदेशों को पुनः सतेज बनाने की आवश्यकता है। पारमेश्वरागम इसमें हमारी सर्वाधिक सहायता कर सकता है।

किन गुणों के कारण कुमार सिद्धार्थ महात्मा बुद्ध कहलाये, बौद्ध महाकवि मातृचेट के एक श्लोक में उनका वर्णन इस प्रकार हुआ है—

अकृत्वेर्ष्यां विशिष्टेषु हीनाननवमत्य च।
अगत्वा सदृशैः स्पर्धां त्वं लोके श्रेष्ठतां गतः ।।

पारमेश्वरागम में वीरमाहेश्वर शिवयोगी के विषय में भी यही बात इस तरह से कही गई है—

अद्वेष्टारोऽधिके स्वस्मात् स्वसमेष्वनसूयवः।
अतिस्कारिणो न्यूने वीरास्ते शिवयोगिनः ।।

इन दोनों श्लोकों के अभिप्राय में कोई अन्तर नहीं है। स्पर्धा, असूया और तिरस्कार नामक भावों से ऊपर उठने का यहाँ उपदेश दिया गया है। स्पष्ट है कि पारमेश्वरागम का यह साम्ययोग आधुनिक साम्यवाद से बहुत ऊँची कोटि का है। इस उपदेश के अनुसार प्रत्येक मानव शिखर-पुरुष बन सकता है।

इन्हीं कुछ विषयों की चर्चा के साथ हम अपने वक्तव्य को विराम देना चाहते हैं।

●

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चाक्षरीप्रपञ्चः (पञ्चाक्षरीमन्त्रस्य विशदं रूपम्)

डॉ. अन्तलूरिमृत्युञ्जयशर्मा

वेदान्ततत्त्वकरुणामृतसारमन्त्रं चिद्रूपदृक्परमशैवरहस्यमन्त्रम् ।
ज्योतिर्महोज्ज्वलनिरञ्जनरूपमन्त्रं वन्दे षडक्षरिसदाशिवनाममन्त्रम् ।।

विदितचरमेतद् भारतीयानामास्तिक्यभावनाभावितान्तःकरणानां समेषां विदुषां यद् निर्गुणनिरञ्जननिराकारपरब्रह्मण उपासनार्थं सकलानुग्रहाय मूर्तकल्पना इति। द्वयोरपि ब्रह्मणोर्मन्त्राधीनत्वं वेदागमपुराणेषु प्रसिद्धम्। तस्य श्रवण-मनन-निदिध्यासनपूर्वक-दर्शनार्थं मन्त्रस्य आवश्यकता चास्तीति।

तादृशपरब्रह्मणो वाचकः प्रणवः। स च अकार-उकार-मकार-नाद-बिन्दु-रूपः पञ्चात्मकः सूक्ष्मः। तस्य स्थूलं रूपं नकारादियकारान्तः पञ्चाक्षरात्मकः। वाच्यवाचकयोरभेदात् परशिवाख्यं ब्रह्म पञ्चाक्षरात्मकं भवति।

शिवो वा प्रणवो ह्येष प्रणवो वा शिवः स्मृतः।
वाच्यवाचकयोर्भेदो नात्यन्तं विद्यते यतः।।
ओङ्कारं परमं ब्रह्म सर्वमन्त्रेषु नायकम्।
आद्यमन्त्रोऽक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता।।
सर्वमन्त्रप्रयोगेषु ओमित्यादौ प्रयुज्यते।
तेन सम्परिपूर्णानि यथोक्तानि भवन्ति हि।।
ब्रह्मादिस्थावरान्तानां सर्वेषां प्राणिनां खलु।
प्राणः प्रणव एवायं तस्मात्प्रणव ईरितः।।

मन्त्राणां प्रणवः सेतुः--------इत्यादिप्रमाणैरोङ्कारस्य परशिवरूपत्वं सर्वमन्त्रादिमत्त्वं च प्रतिपादितम्। स च ओङ्कारो निर्गुणपरशिवब्रह्मणो वाचकः। स्थूलपञ्चाक्षरस्य तु सगुणवाचकत्वं प्रमाणैरवगम्यते।

कठोपनिषदि नचिकेतं प्रति यमेन "सर्वे वेदा यत्पदमामनन्ति" इत्यारभ्य 'एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते" इत्यन्तेन ओङ्कार एव परं ब्रह्म, तस्य उपासना अवश्यं कर्तव्येति बोधितम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओङ्कारः शिव एव, तस्मिन् अकारोकारमकारार्धमात्रात्मकानि चत्वार्यक्षराणि सन्ति। शिवशब्देऽपि शकार-इकार-वकार-अकार-रूपाणि चत्वारि अक्षराणि च। यथा ओङ्कारे सर्वे वेदाः सर्वं वाङ्मयं सर्वे सृष्ट्यादयः सन्ति, तद्वत् शिवशब्देऽपि शकारस्य स्थूलशरीरवाचकत्वं, जाग्रदवस्था, विश्व विराड् ऋग्वेदात्मकत्वं, इकारस्य सूक्ष्मशरीर-स्वप्नतैजसहिरण्यगर्भयजुर्वेदात्मकत्वं, वकारस्य कारणशरीरसुषुप्तिप्राज्ञ ईश्वरसामवेदरूपत्वम्, अकारस्य कारणातीतत्वं तुरीय आत्मपरमात्मब्रह्मणो वेद-वेदशिरोभागरूप-उपनिषद्रूपत्वं, समस्तोऽपि प्रपञ्चः शिवादेव आविर्भूय तस्मिन्नेव लीनं गमिष्यतीति शिवस्य विश्वरूपत्वमवगम्यते। अत ओङ्कारशिव एव। अपि च—

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् ।।

त्रयीं वेदत्रयम्, तिस्रो वृत्तयः जाग्रत्-स्वप्नसुषुप्तयः, त्रिभुवनं भूर्भुवस्स्वर्लोकान्, ब्रह्मविष्णुरुद्रान्, विश्वतैजसप्राज्ञान्, वा अकारादिवर्णैः अभिदधद् ओमिति पदं समस्तमुदित-मिति व्याख्यया अकार-उकार-मकार-बिन्दु-नाद-रूप-पञ्चेश्वर-पञ्चब्रह्म-पञ्चकृत्यरूपक-त्वं च प्रणवस्य प्रतिपादितम्। किञ्च—

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ।।

इति प्रकरणवाक्याभ्यां प्रणवस्य माहेश्वरशेषत्वमवगम्यते। माण्डूक्योपनिषदि च ओमित्येतदक्षरमुपक्रम्य "अयमात्मा चतुष्पाद्" इति वाच्यवाचकयोश्चतुर्धा विभागपुरस्सरं विश्वतैजसप्राज्ञानां जाग्रदादिवैशिष्ट्यमुक्त्वा अवस्थात्रयातीतं निरुपाधिकं शिवाख्यं चतुर्थनादार्थत्रयज्ञेयमुपसंहारे प्रतिपादितम्।

अथर्वोपनिषदि च य ओङ्कारः सः प्रणवः यः प्रणवः स सर्वव्यापी, यः सर्वव्यापी सोऽनन्तः, योऽनन्तस्तत्तारं यत्तारं तत्सूक्ष्मम्, यत्सूक्ष्मं तच्छुक्लम्, यच्छुक्लं तद् वैद्युतम्, यद्वैद्युतं तत्परं ब्रह्म, स एको रुद्रः, स ईशानः, स भगवान् महेश्वरः, स महादेव इत्यन्तेन ओङ्कार एव तारयति, स एव परब्रह्म इति, स रुद्र-ईशान-महेश-पदवाच्यः शिव एव" इति स्पष्टमुक्तं भवति। "ज्योतिर्मयं परं लिङ्गं श्रुतिराह शिवात्मकम्" इत्यादिवेदागमवचनैः शिवात्मकं ज्योतिर्लिङ्गमोङ्कार एव— "ओङ्कार एव लिङ्गं स्यात् सर्वकारणकारणम्। ओमिति तद्ब्रह्मपदं लिङ्गाकारं महेश्वरम्" ।। तदेव नकारादियकारान्तेन स्थूलपञ्चाक्षरीरूपेण परिणतं भवति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओमित्येकाक्षरं ब्रह्म नमः शिवायेत्यजायत। ओमित्येकाक्षरमिदं सर्वं तस्योपव्याख्यानम्। ओङ्काररूप एकाक्षरमेव दृश्यादृश्यप्रपञ्चरूपं सर्वम्। तद्व्याख्यानमेव वेदः। "सर्वे वेदा यत्पदमामनन्ति, रूपाणि सर्वाणि च यद्वदन्ति, यदिच्छन्तो ब्रह्मचर्यं चरन्ति। तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत्॥" (कठवल्ली- -१.१५)

"तदेव लिङ्गं प्रथमं प्रणवं सार्वकामिकम्" इत्यादिशिवपुराणवचनैश्च प्रणवस्य लिङ्गरूपत्वमवगम्यते। एवं च वेदागमपुराणवचनैः प्रणवस्य परब्रह्मवाचकत्वम्, तस्यैव च शिवरूपत्वं निरूपितं भवति।

परमेश्वरेण प्रथमं स्वस्वरूपभूत ओङ्कारमन्त्र उपदिष्टः। तद्गताकाशादिरूपपञ्चवर्णानां शिवस्य पञ्चमुख-पञ्चकृत्य-पञ्चभूतात्मकत्वम्, अ-इ-उ-ऋ-ऌ-रूपपञ्चस्वराणां कचटतपादिपञ्चवर्गाणां चोत्पादकत्वम्, ततः त्रिपदागायत्रीप्रादुर्भावः, ततो समस्तवेदादिविद्यानामाविर्भावश्च पुराणादिष्वभिवर्णितः।

पञ्चाक्षरवाच्यस्य शिवस्य षडध्वनां च सर्वेषां मन्त्राणां मूलभूतत्वेनेयं पञ्चाक्षरीमन्त्रो मातेति गीयते। अयमेवार्थो वैदिकाचारनिर्णये—

सप्तकोटिमहामन्त्राः पञ्चाक्षरपुरस्सराः।
मन्त्राणां परमो मन्त्रः शिव इत्यक्षरद्वयम्॥

इत्यनेन समर्थितः।

वेदचतुष्टयें मध्यमणिरिव विद्यमाने यजुर्वेदे चतुर्थकाण्डे विद्यमानं रुद्राध्याये सोऽयं पञ्चाक्षरीमन्त्रः "नमः शिवाय" चेति, जाबालोपनिषदि च "ओमित्यग्रे व्याहरेत्, नम इति पश्चात्। ततः शिवायेत्यक्षरत्रयम्" ओमित्यग्रे व्याहरेत्, नम इति पश्चात्, ततो महादेवायेति पञ्चाक्षराणि। नातस्तारकः परमो मन्त्रस्तारकोऽयं पञ्चाक्षरः कोऽयं शैवो मनुः शैवस्तारकोऽयमुपदिश्यते मनुरविमुक्ते शैवेभ्यो जीवेभ्यश्शैवोऽयमेव मन्त्रस्तारयति। स एव ब्रह्मोपदेशो। ब्रह्म सोमोऽहं पवते। इति वैदिकोऽयं पञ्चाक्षरः शैवागमेषु—

ओङ्कारपूर्वकत्वेन षडक्षर इति कथ्यते।
ओङ्कारपूर्वमन्त्रोऽयं पञ्चाक्षरमयः परः।
वेदागमेषु सर्वेषु षडक्षर इति गीयते॥

स तु शिवात्मकः, नार्थवादरूपः। भवसागरमग्नानां देहिनां हिताय हरः स्वयमेव ओम् नमश्शिवायेति प्राह। स्थूलसूक्ष्मरूपपञ्चाक्षरयोर्नात्यन्तं भेदो विद्यत इति—

अ-उ-माश्चैव नादश्च कला चेत्यंशपञ्चकम्।
मिलित्वा प्रणवो जज्ञे सूक्ष्मपञ्चाक्षरात्मकः॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तथा नमः शिवायेति स्थूलपञ्चाक्षरो भवेत् ।
प्रतिपाद्ये महत्त्वेऽपि नानयोर्विद्यते भिदा ।।

इत्यनेन ज्ञायते । सिद्धान्तशिखामणावपि—

प्रणवेनैव मन्त्रेण बोध्यते निष्कलः शिवः ।
पञ्चाक्षरेण मन्त्रेण पञ्चब्रह्मतनुस्तथा ।।

उभयात्मा शिवो मन्त्रे षडक्षरमये स्थितः ।।

इति प्रणवपञ्चाक्षरयोः शिवस्य सकलनिष्कलरूपकत्वं दृढीकृतम् । सिद्धान्तसारावलावपि— नमः पीठमिति प्रोक्तं------ओङ्कारं लिङ्गमाख्यातं षड्वर्णं लिङ्गमुच्यते । इत्यन्तेन ओङ्कारपञ्चाक्षर्योः शिवरूपत्वमभिन्नत्वं च प्रतिपादितम् ।

शिवानुभवसूत्रे षष्ठाधिकरणे च—

ओङ्कारवदना देवी..... ।
सतारा लिङ्गरूपिणी शिवमन्त्राभिधा ।।

इत्यन्तेन च षडक्षर्या लिङ्गस्य भिन्नत्वं शिववाचकत्वं चोक्तम् । विमलागमे च—

तारकं दण्डकं चैव कुण्डली अर्धचन्द्रकम् ।
.....ओमिति ज्योतिरूपकम् ।।

इत्यन्तेन तारक-दण्डक-कुण्डली-अर्धचन्द्र-बिन्दुशब्दैर्ब्रह्म-विष्णु-रुद्र-ईश्वर-सदाशिवज्योतीरूप ओङ्कारः, सूक्ष्मो नकारादियकारान्तः स्थूल इति ओङ्कारस्य पञ्चाक्षरेणाभिन्नत्वं सूक्ष्मपञ्चाक्षरत्वं च सम्यक्तया प्रतिपादितम् ।

अस्मिन्नेवागमे पञ्चाक्षरीकल्पे मन्त्रमाहात्म्यादिवर्णनपूर्वकं सद्योजातादिपञ्चमुखेभ्य एकैकशः पञ्चविंशतिः महामनवः प्रादुरासन्निति वर्णितम् । अर्थ-वर्ण-पद-वाक्यभेदेन परा-पश्यन्ती-मध्यमा-वैखरीति चतुर्विधा उक्तयोऽस्मिन् सन्ति । ओमर्थः— अकार-उकार-मकारेषु अकारो लिङ्गः, उकारोऽङ्गः, मकारस्तयोस्संयोग इति हेतोरोङ्कारश्च लिङ्गाङ्गसंयोगरूपोऽर्थः प्रतिपादितः । एवमेव—

नमःपदं तत्खलु जीववाची
शिवःपदं तत्परमात्मवाची ।
अयेति तादात्म्यपदं तदेतं
नमः शिवायेति जगाद मन्त्रः ।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्यनेन पञ्चाक्षर्या अपि शिवजीवैक्यबोधकत्वेन ओङ्कारपञ्चाक्षर्योरभिन्नत्वं शिववाचकत्वं च सुस्पष्टम्। नादियान्तः स्याद्वर्णः नमः शिवायेति पदम्, नमः शिवायेति वाक्यम्। मनोभवो अर्थ इति, दृग्भवो वर्ण इति, वाग्भवः पदमिति, वपुर्भवो वाक्यमिति चोक्तम्।

पारमेश्वरागमे पञ्चाक्षरमन्त्रोद्धारः–

जीवपूर्वं मरुत्पूर्वं स्मरपूर्वं समन्वितः।
पार्श्वमक्षिसमायुक्तं वरुणस्थं धनुप्रिये।।

"वह्निपूर्वं ततो देवि मन्त्रः साक्षान्मदात्मकः" इति श्रीविद्यार्णवे त्रिकाण्डासे "पञ्चमस्य तु वर्गस्य" इत्यारभ्य– "एष पञ्चाक्षरो मन्त्रः प्रणवाद्यः षडक्षरः। यत्साधनात्तु मनुजाः शिवसायुज्यमाप्नुयुः॥" इत्यन्तेन पञ्चाक्षरमन्त्रोद्धारं कृत्वा तस्य परशिवब्रह्मणो वाचकत्वम्, ब्रह्म विद्यात्वम्, परशिवब्रह्मानन्दप्रापकत्वं च सम्यक्तया प्रतिपादितम्।

पारमेश्वरागमे एकादशपटले पञ्चाक्षरीजपानुष्ठाननिरूपणसन्दर्भे सर्वविद्या-बीज-भूतत्व-वेदसारत्व-समस्तजीवानां मूलभूततत्त्वस्य शिवस्य वाचकत्वान्मूलमिति, सप्तकोटि-महामन्त्रोपमन्त्राणां सूत्ररूपत्वं शिवज्ञानविद्यास्थानानां षडक्षररूपभाष्यत्वमुपवर्णितम्।

एवं पञ्चाक्षरीमाहात्म्यमुपवर्ण्य एकैकाक्षरस्य वर्ण-ऋषि-च्छन्दो-देवतानिरूपणम्, मन्त्रवर्णन्यासादिकं, मन्त्र-ग्रहणविधिः, षडध्वशोधनम्, जपविधानं च समग्रतया निरूपितम्। मन्त्रपुरश्चर्या, जपविधिप्रकारः, तस्य च मानसिक-उपांशु-वाचिकत्वरूपत्रैविध्यम्, सगर्भत्वम्, अगर्भत्वम्, सध्यानत्वं च निरूप्य, जपमालालक्षणम्, जपे अङ्गुलीविनियोगविधिः, पञ्चाक्षरीमन्त्रमाहात्म्यम्, संख्याभेदेन फलभेदश्च प्रतिपादितः। नैष पञ्चाक्षरो मन्त्रो जापकानामेव मुक्तिप्रदः, अपि तु, तत्प्रभावेण सर्वेषां पापिनामपि उद्धारो भवतीति सानन्दोपाख्यानादवगम्यते।

श्रीमद्भगवत्पद्मपादाचार्यैः– "त्यागो हि नमसो वाच्य आनन्दप्रकृतेस्तथा" इत्यारभ्य अतोऽहं च समा भद्र शिवा योऽहं न संशयः" इत्यन्तैस्त्रयोविंशतिश्लोकैः पर- शिवाभिन्नमोक्षविद्यारूपब्रह्मविद्यायाः शिवपञ्चाक्षर्या भाष्यं लिखितम्।

१. अत्र नमःशब्दस्य त्यागार्थकत्वम्, आत्मेतरगेहदेहेन्द्रियान्तःकरणादिकं सर्वं त्यजामि अनात्मतया उत्सृजामि।

२. नमःशब्दस्य प्रणवार्थकत्वं दैन्यापरपर्यायसेवारब्धये परमभक्तिप्राप्तिः फलम्।

३. नमःशब्दस्य हे देवेश नत्वा अव्ययेन=जगदात्मनो जगदाकारेण भासमानस्य परमेश्वरस्यापि तव मनसः परिणामो भावविकार आकाशादिरूपो देहान्तःकरणादिरूपश्च निषिध्यते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

४. नमसो ध्यानमर्थः, ध्यानं च निदिध्यासनमेव शिवायेति तादर्थ्ये चतुर्थी, तस्याः शिवार्थमर्थः। प्रत्यगात्मतादात्म्यलाभाय इत्यर्थः। अहं शिवतादात्म्यलाभाय नमनं निदिध्यासनं करोमीति वाक्यार्थः।

५. नमःशब्दस्य दासार्थकत्वं **"ईशानः सर्वविद्यानां ईश्वरः सर्वभूतानाम्"** इत्यादिश्रुतिभिः सर्वभूतनियन्तृत्वकथनेन भूतानां दासत्वम्, ईश्वरप्रवर्त्यत्वं चोक्तमिति नमःशब्दस्य नमस्कारोऽर्थः। हे शिवः नमनकर्ता अहं तव दासः, "यो यच्छ्रद्धः स एव सः" इत्येवं मां ज्ञात्वा आत्मस्वरूपज्ञानप्रदानेन आत्मस्वरूपं मा कुरु।

६. नमःशब्दस्य न मा यस्यास्ति इति माशब्दस्य लक्ष्मीवाचकत्वं, मम लक्ष्मीर्नास्ति, सोऽहं नमःशब्दवाच्यः। हे मायेश! दरिद्रमज्ञानं निराकृत्य लक्ष्मीं विद्यां प्राप्तुमिच्छामि, तस्माद् विरक्ताय मुमुक्षवे अधिकारिणे मह्यं प्रापय।

७. नमःशब्दस्य परिणामराहित्यं, बृहदारण्यकोपनिषदि नेति नेतीत्यत्र प्रतिपादितं सकलनिषेधाधिष्ठानत्वेन ब्रह्मणः सर्वाश्रयत्वं परिच्छिन्नस्य जीवस्य स्वरूपज्ञानाद् अपरिच्छिन्नत्वरूपत्वं चार्थं निरूप्य, शिवं निरतिशयाखण्डैकरसानन्दस्वरूपं आप्राप्तः=आ समन्तात् परिपूर्णतया प्राप्तः शिवायेति त्वं निगद्यसे। शिवां यात इति शिवाय, शिवां शक्तिं ब्रह्मविद्यारूपां यातः अयासीदिति शिवाय तस्य सम्बोधने हे शिवाय अत एव हे महाभद्र परमकल्याणरूप त्वं शिवायोऽसि निजस्वरूपस्थोऽसि, अहं तु मायया अविद्यया निर्विद्योऽस्मीति नमः। शिवं राषि इति ज्ञप्तिः ज्ञानं स्वस्वरूपाविर्भावः, तया ज्ञप्त्या शिवं निरतिशयानन्दरूपमात्मतत्त्वं राषि जानासि यतः कारणात्, अतस्त्वं शिवाय इति। हे शिव! त्वं नमश्शब्दोक्तं निराकारं शिवाय परिपूर्णं ब्रह्मासि। सर्वदा एकरसोऽपि तव परिपूर्णत्वात् ममापि तद्रूपत्वाद् अहमपि परिणामरहितः शिवाय परिपूर्णरूपश्चाहं न संशयः। इति नमःशिवशब्दौ जीवब्रह्मप्रतिपादकौ, एतत्पञ्चाक्षरीब्रह्मविद्योपासनया जीवः स्वस्वरूपज्ञानं प्राप्य शिव एव भवतीति प्रतिपादयता हरिनामदत्तेन सकलोपनिषदर्थपरिबृंहणात्मकशारीरकमीमांसाभाष्यस्य शिवपञ्चाक्षरीभाष्यस्य च विषयैक्यं निरूप्य, शिवपञ्चाक्षर्या ब्रह्मविद्यात्वं सविस्तरं सयुक्तिप्रमाणं सुप्रतिष्ठापितम्।

एवं सगुणनिर्गुणप्रतिपादकयोः स्थूलसूक्ष्मपञ्चाक्षरीमहामन्त्रयोर्माहात्म्यं विस्तरशो वक्तुं ब्रह्मादीनामप्यशक्यम्। एषैव पञ्चाक्षरी वेदपुराणागमेषु "नमस्ताराय" "नातस्तारको नातस्तारकः" इति तारकत्वेन प्रतिपादिता एतामेव विश्वेश्वरः अविमुक्तक्षेत्रे मुमुर्षूणां प्राणावसानसमये स्वयमुपदिशतीति सुस्पष्टम्। स्थूलब्रह्मवाचकः पञ्चाक्षरः प्रणवसाहित्येन निर्गुणब्रह्मवाचकः सन् षडक्षरीति गीयमानो जीवानां षडूर्मिनिवृत्तिपूर्वकषट्स्थलपरशिवब्रह्मणः परानन्दरूपं मोक्षं ददातीत्यैहिकामुष्मिकरूपफलप्रदानपूर्वकं मोक्षैकान्तिकत्वेन

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मोक्षविद्या ब्रह्मविद्येति च नाम्ना वेदागमपुराणेषु प्रतिपादितः। अत एव पारमेश्वरागमादिषु तादृशब्रह्मविद्यायाः स्वरूपं साधकानुग्रहाय एव समुपवर्णितमस्ति। अतः सा–

तप्तचामीकरप्रख्या पीनोन्नतपयोधरा।
चतुर्भुजा त्रिनयना बालेन्दुकृतशेखरा॥
पद्मोत्पलकरा सौम्या वरदाभयपाणिका।
सर्वलक्षणसम्पूर्णा सर्वाभरणभूषिता॥
सितपद्मासनासीना नीलकुञ्चितमूर्धजा॥

इत्येवमस्माभिः स्तूयत। इति शिवम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चाक्षरी षडक्षरी चेति शिवमन्त्रस्य विस्तृतमीमांसा

डॉ. एम. शिवकुमारस्वामी

प्रस्तावना

वीरशैवमते साधनमार्गस्तु षट्स्थलात्मको भवति। भक्तस्थलं माहेश्वरस्थलं प्रसादिस्थलं प्राणलिङ्गिस्थलं शरणस्थलमैक्यस्थलं चेति षट्स्थलानि सन्ति। अस्य साधनमार्गस्यारम्भो वीरशैवदीक्षया भवति। वीरशैवदीक्षाद्वारा भक्तोऽष्टावरणसम्पन्नो भूत्वा साधनमार्गे प्रवर्तते। अष्टानामावरणानां समाहारोऽष्टावरणम्। गुरुः, लिङ्गम्, जङ्गमः, भस्म, रुद्राक्षः, मन्त्रः, पादोदकम्, प्रसादश्चेति अष्टौ आवरणानि भवन्ति। तानि साधनमार्गे प्रवृत्तस्य भक्तस्य श्रद्धारक्षकभूतानि, अत एवावरणानीति कथ्यन्ते। तत्र यो भक्तमिष्टप्राणभावाख्यलिङ्गत्रयप्रदानरूपया दीक्षयाऽनुगृह्णाति स गुरुः। वेधामनुक्रियाख्यत्रिविधदीक्षाद्वारा कारणसूक्ष्मस्थूलशरीरेषु स्थाप्यमानं भावप्राणेष्टलिङ्गाख्यं लिङ्गत्रयं लिङ्गम्। तत्र साक्षीभूतो ज्ञानवैराग्यसम्पन्नः शिवयोगी च जङ्गमः। एतानि त्रीणि पूज्यान्यावरणानि भवन्ति। भस्मरुद्राक्षमन्त्राश्चेति त्रीणि पूजासाधनभूतान्यावरणानि। 'नारुद्रो रुद्रमर्चयेत्'[१] इत्युक्तरीत्या भक्तो भस्मरुद्राक्षरूपै रुद्रचिह्नैः समलङ्कृतः सन् भावलिङ्गप्राणलिङ्गानुसन्धानपूर्वकमिष्टलिङ्गं पूजयित्वा शिवमन्त्रं जपति। पादोदकं प्रसादश्चेति पूजाफलरूपमावरणद्वयम्। भक्तः पादोदकप्रसादौ स्वीकरोति।

षट्स्थलात्मकस्य वीरशैवसाधनमार्गस्य प्रतिपादनं प्रथमतया शैवागमोत्तरभागेषु समुपलभ्यते। अष्टावरणानां चोल्लेखः प्रथमतया शैवोपनिषत्सु विद्यते। तत्राऽष्टावरणशब्दो न प्रयुक्तः। परन्त्वष्टावरणानां सर्वेषामुल्लेखो दृश्यते। तथा हि– रुद्रोपनिषदि गुरुलिङ्गजङ्गमाः शिवस्वरूपिण इति वर्ण्यन्ते– "जङ्गमरूपः शिवः, शिव एव जङ्गमरूपः। .....ओम् आत्मा परशिवद्वयो गुरुः शिवः। .....गुरुः शिव एव लिङ्गम्"[२] इति। तस्यामेवोपनिषदि मन्त्रभस्मपादोदकतीर्थानां माहात्म्यं वर्ण्यते– "ब्राह्मणः

---

१. "नाशिवः शिवमभ्यस्येन्नाशिवः शिवमर्चयेत्। नाशिवस्तु शिवं ध्यायेन्नाशिवः शिवमाप्नुयात्॥
(चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, २२.३८.)

२. Unpublished Upaniṣads, Adyar, Madras, 1933, p. 308.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चाक्षरमनुर्भवति । .....ब्राह्मणास्त्रिपुण्ड्रधृतः । .....लिङ्गाभिषेकं निर्माल्यं गुरोरभिषेकतीर्थं माहेश्वरपादोदकं जन्ममालिन्यं क्षालयन्ति"[1] इति । लिङ्गोपनिषदि– "सर्वदेहेषु लिङ्गधारणं भवति । .....इष्टप्राणभावेषु लिङ्गधारणं वदन्ति"[2] इति लिङ्गधारणस्य विषयो निरूपितः । वज्रपञ्जरोपनिषत्, सिद्धान्तशिखोपनिषत्, जाबाल्युपनिषत्, बृहज्जाबालोपनिषत्, भस्मजाबालोपनिषत्, रुद्राक्षजाबालोपनिषदित्यादिषु शैवोपनिषत्सु भस्मनिर्माणविधिः, भस्मोद्धूलनस्नान-त्रिपुण्ड्रधारणविधयः, रुद्राक्षोत्पत्तिविचारः, रुद्राक्षधारणविधिश्चेत्यादयः सम्यङ्निरूपिताः । शैवागमोत्तरभागेषु पुनरष्टावरणशब्दप्रयोगपूर्वकमष्टावरणानामुल्लेखो विवरणं च विद्येते । तथा हि– विशेषतया चन्द्रज्ञानागमोत्तरभागे द्वितीयपटले– "गुरुर्लिङ्गं जङ्गमश्च तीर्थं चैव प्रसादकः । भस्मरुद्राक्षमन्त्राश्चेत्यष्टावरणसंज्ञिताः ॥"[1] इत्यष्टावरणानामुल्लेखः कृतः, ततः परं सप्तपटलेषु तेषां विवरणं च दत्तम् । तत्र वीरशैवानां जपसाधनभूतो मन्त्रः पञ्चाक्षरी षडक्षरी चेति कथ्यते । स च शिवमन्त्र एक एव, ओङ्कारपूर्वकत्वे षडक्षर इति, अन्यथा पञ्चाक्षर इति च व्यवह्रियते । अस्मिन् प्रबन्धे तु शैवागमोत्तरभागानुसार-मुभयात्मकस्यास्य मन्त्रस्य विचारः प्रस्तूयते ।

मन्त्रस्याऽऽकारः स्वरूपं नामानि च

पञ्चाक्षरः षडक्षरश्चेत्युभयात्मकोऽयं शिवमन्त्रस्तैत्तिरीयसंहिताया रुद्राध्यायस्याऽष्टमा-नुवाकाद्[4] उद्धृतः । तत्र "नमः शिवाय" इत्यस्ति स्वरूपं मन्त्रस्य पञ्चाक्षरात्मकम् । पञ्चब्रह्मोपनिषदि पञ्चाक्षरमन्त्रस्य स्वरूपं महत्त्वं च निरूप्येते–

पञ्चाक्षरमयं शम्भुं परब्रह्मस्वरूपिणम् ।
नकारादियकारान्तं ज्ञात्वा पञ्चाक्षरं जपेत् ॥
सर्वं पञ्चात्मकं विद्यात् पञ्चब्रह्मात्मतत्त्वतः ॥
पञ्चब्रह्मात्मिकीं विद्यां योऽधीते भक्तिभावितः ।
स पञ्चात्मकतामेत्य भासते पञ्चधा स्वयम्[5] ॥ इति ।

पञ्चाक्षरमयं परब्रह्मस्वरूपिणं शङ्करं विदित्वा नकारादियकारान्तं पञ्चाक्षरमन्त्रं जपेत् । जगदिदं सर्वं पञ्चब्रह्मस्वरूपत्वात् पञ्चात्मकमिति जानीयात् । यो भक्तिभावान्वितः

---

१. चन्द्रागमः, पृ. ३०८-३०९ ।
२. तत्रैव, पृ. ३११ ।
३. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, २.२ ।
४. तैत्तिरीयसंहिता, ४.११.८ ।
५. The Śaiva Upaniṣads, पृ. ८४, पञ्चब्रह्मोपनिषद्, ३०-३२ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सन् पञ्चाक्षरमन्त्ररूपिणीं पञ्चब्रह्मात्मिकीं विद्यां ध्यायते, स पञ्चात्मकतां प्राप्य पञ्चब्रह्मस्वरूपेण भासते। अत्रापि "नकारादिमकारान्तम्" इत्युक्तिद्वारा रुद्राध्याये यो मन्त्रस्य क्रमो विहितः "नमः शिवाय" इति, स एव क्रमो विवक्षितः। स एव क्रमः शैवागमोत्तरभागेषु विहितः। तथा हि—

आदौ नमः प्रयोक्तव्यं शिवायेति ततः परम्।
सैषा पञ्चाक्षरी विद्या सर्वश्रुतिशिरोगता[१]॥
नमःशब्दं वदेत्पूर्वं यान्तं शिवपदं ततः[२]।
आदौ नमः प्रयोक्तव्यं शिवायेति ततः परम्[३]॥

एवं नमःशब्दं प्रथममुच्चार्याऽनन्तरं शिवायेति चतुर्थ्यन्तं पदमुच्चरेत्। अयं क्रमः सर्वश्रुतिशिरोगतस्य पञ्चाक्षरमन्त्रस्य विद्यते। समस्तानां विद्यानां मूलकारणं पञ्चाक्षरीविद्या। पृथिव्यां यथा वटबीजं सूक्ष्ममपि महतो वृक्षस्योद्भावकं भवति, तथाऽत्यन्तसूक्ष्मोऽप्ययं पञ्चाक्षरमन्त्रो महतः फलस्य दाता भवति। तथा चोक्तम्—

आद्यबीजमिदं देवि विद्यानामप्यशेषतः।
सूक्ष्मात् सूक्ष्मतरं सारं वटबीजं यथा भुवि[४]॥ इति।

अस्य मन्त्रस्य प्राशस्त्यं चान्यत्र सम्यग् वर्णितम्—

विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ।
मन्त्रः पञ्चाक्षरस्तत्र शिव इत्यक्षरद्वयम्[५]॥ इति।

विद्यासु वेदविद्यायाः श्रेष्ठत्वम्, वेदे रुद्राध्यायस्यैकादशानुवाकानां प्राशस्त्यम्, तत्राऽष्टमानुवाकस्थस्य पञ्चाक्षरमन्त्रस्य प्राशस्त्यतरत्वम्, तत्रापि "शिव" इत्यक्षरद्वयस्य प्राशस्त्यतमत्वमत्र सम्यगुद्घोषितम्। अत एवोक्तम्– "मम पञ्चाक्षरो मन्त्रः कल्पवृक्षो धरात्मजे"[६] इति। अयमेव मन्त्र ओङ्कारपूर्वकत्वे षडक्षरः सम्पद्यते। तथा चोक्तम्—

एषा पञ्चाक्षरी विद्या प्रणवाद्या षडक्षरी[७]।

---

१. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.५।
२. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.१३।
३. पारमेश्वरागमः, २२.३०।
४. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.११।
५. कारणागमः, उत्तरभागः, क्रियापादः, ८.४।
६. पारमेश्वरागमः, ११.२९।
७. तत्रैव, ११.३२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रणवेन समायुक्तं षडक्षरमिति स्मृतम्[१] ।।

पूर्वोदाहृतपञ्चब्रह्मोपनिषदुक्तदिशा सूक्ष्मागमे षडक्षरमन्त्रस्य शिवतनुत्वं पञ्चब्रह्मात्मकत्वं च प्रदर्शिते—

ओङ्कारो मम देहः स्यान्नकाराद्यास्तथैव च ।
सद्यादिपञ्चवक्त्राणि क्रमादेवं वरानने ।।
पञ्चब्रह्मात्मको मन्त्रः प्रणवाद्यः षडक्षरः[२] ।। इति ।

ओङ्कारः परशिवस्य शरीरं भवति, नकारादियकारान्तानि पञ्चाक्षराणि च तस्य सद्योजातादिपञ्चवक्त्राणि भवन्ति । एवं पञ्चाक्षरमन्त्रः पञ्चब्रह्मात्मकः, स एव प्रणवाद्यः सन् षडक्षर इति व्यवह्रियते । अयमेव भावः पारमेश्वरागमस्याऽस्यामुक्तौ वरीवर्ति—

ईशानाद्यानि सूक्ष्माणि ब्रह्माण्येकाक्षराणि तु ।
मन्त्रे नमः शिवायेति संस्थितानि यथाक्रमम्[३] ।। इति ।

ईशानादिपञ्चब्रह्ममन्त्राः सूक्ष्मातिसूक्ष्माः सन्तः पञ्चाक्षरमन्त्रस्यैकैकाक्षराणि भूत्वा नमः शिवायेति रूपं धृतवन्तः । त एवोकारपूर्वकत्वे षडक्षरमन्त्रस्वरूपं धारयन्ति । तदेव कथ्यते वटबीजन्यायेन—

तद् बीजं सर्वविद्यानां मन्त्रमाद्यं षडक्षरम् ।
अतिसूक्ष्मं महार्थं च ज्ञेयं तद्वटबीजवत्[४] ।। इति ।

अयं षडक्षरमन्त्रः सर्वस्मात् प्रथमः, सर्वविद्यानां बीजम्, अत्यन्तं सूक्ष्मोऽपि महदर्थगर्भितः । स च वटबीजवद् ज्ञेयः । यथा वटबीजं सूक्ष्ममपि महतो वृक्षस्य कारणं भवति, तथायं मन्त्रः सूक्ष्मोऽपि सर्वविद्यानां मूलं भवति ।

अस्य मन्त्रस्य नामानि एवं विधन्ते—

मूलं विद्या शिवं चैव सूत्रं पञ्चाक्षरस्तथा ।
नामान्यस्य विजानीयादोङ्कारो हृदयं मतम्[५] ।। इति ।

---

१. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.१३; ४.३५– "पञ्चाक्षरो महामन्त्रः प्रणवेन युतः शिवे" ।
२. तत्रैव, ४.३६-३७ । षडक्षर इति प्रोक्तो मन्त्रराजाह्वयः परः ।।
३. पारमेश्वरागमः, ११.२६ ।
४. तत्रैव, ११.२० ।
५. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.१७ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मूलं विद्या शिवः शैवं सूत्रं पञ्चाक्षरं तथा।
षडक्षरं च तस्याहुर्नामानि मुनयो मनोः[१] ।। इति च।

सर्वविद्यानां सर्वमन्त्राणां च बीजत्वान्मूलम्, "आद्यबीजमिदं देवि विद्यानामप्यशेषतः"[२] "तद् बीजं सर्वविद्यानाम्"[३] इत्यागमोक्तेः। अनेन मन्त्रेण शिवज्ञानरूपं शुद्धज्ञानं जायत इति, अयं मन्त्रः शिवज्ञानमेवेति वा विद्या, "एतावद्धि शिवज्ञानमेतावत्परमं पदम्"[४] इत्यागमोक्तेः। "यो जनः कीर्तयेद्भक्त्या शृणुयाद्वा समाहितः। सर्वपापविनिर्मुक्तः स याति मम सन्निधिम्।।"[५] इति पारमेश्वरागमोक्तदिशा, "पञ्चाक्षरात् परं नास्ति परित्राणं कलौ युगे"[६] इति चन्द्रज्ञानागमोक्तरीत्या च मङ्गलकारकत्वात् शिव इत्यस्य मन्त्रस्य नाम। "अल्पवर्णसमायुक्तमधिकार्थमसंशयम्। सारात्सारतरं शैवं मन्त्रं मोक्षैककारणम्।।"[७] इत्यागमोक्तदिशा सर्वेषां शिवसम्बन्धितत्त्वानां बोधोऽस्माज्जायत इति शैवसूत्रमुच्यते। पञ्चाक्षरः षडक्षरश्चेति वर्णसंख्याधारेण मन्त्रस्य प्रसिद्धे नामनी।

अस्य मन्त्रस्य ऋष्यादिनिर्देशः

अस्य मन्त्रस्य ऋषिर्वामदेवः, छन्दः पङ्क्तिः, देवता शिवः, प्रणवः बीजम्, शक्तिर्नम इति, कीलकं शिवायेति, मोक्षे च विनियोगः। तथा चोक्तम्–

वामदेव ऋषिः पङ्क्तिश्छन्दो देवो शिवः प्रभुः।
बीजं प्रणव एव स्यान्नमः शक्तिरुदाहृता।।
शिवाय कीलकं मोक्षे विनियोगः प्रकीर्तितः[८] ।।
वामदेव ऋषिश्चास्य पङ्क्तिश्छन्द उदाहृतः।
देवता च शिवः साक्षात् प्रणवो बीजमुच्यते।।
उमा शक्तिरिति प्रोक्ता न्यासश्चैव षडक्षरैः[९] ।।

---

१. पारमेश्वरागमः, ११.४४।
२. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.११।
३. पारमेश्वरागमः, ११.१०।
४. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.८५।
५. पारमेश्वरागमः, ११.१०४-१०५।
६. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.८३।
७. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.१०।
८. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.२३-२४।
९. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.१२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वेदमूलस्यास्य मन्त्रस्य साफल्यार्थमनुष्ठानमपेक्ष्यते। शैवागमाः शैवमन्त्राणामृष्यादीनुक्त्वाऽनुष्ठानविधानं निरूपयन्ति। मन्त्राणां स्वाधीनार्थं पुरश्चरणविधिरावश्यकः। पुरश्चरणे पुनः पञ्चाङ्गोपासना, जपः, होमः, तर्पणम्, अभिषेकः, रुद्रभोजनं चेति षडङ्गानि भवन्ति। गीता, सहस्रनाम, स्तवः, कवचम्, हृदयं चेति पञ्चाङ्गोपासनायां भवन्ति। प्रतिमन्त्रं नमः, स्वाहा, वषट्, हुम्, वौषट्, फट् इति पल्लवाः। करन्यासः, देहन्यासः, अङ्गन्यासश्चेति न्यासत्रयं दिग्बन्धनं चेति क्रिया अपेक्षिताः। अत्र शैवागमाः पूर्वोक्तरीत्या पञ्चाक्षरीमन्त्रस्य ऋष्यादिनिर्देशपूर्वकमनुष्ठानमुपदिशन्ति। अत्रोदाहृते चन्द्रज्ञानागमवाक्ये "न्यासश्चैव षडक्षरैः" इत्युक्तम्। न्यासक्रमः, पुरश्चरणविधानं जपविधानं च पश्चान्निरूप्यन्ते।

शैवागमोक्तानि मन्त्राङ्गानि

चन्द्रज्ञानागमे पारमेश्वरागमे च पञ्चाक्षरमन्त्रस्याङ्गानि सम्यङ् निरूपितानि—

नकारः शिर उच्येत मकारस्तु शिखोच्यते।
शिकारः कवचं तद्वद्वाकारो नेत्रमुच्यते।।
यकारोऽस्त्रं नमः स्वाहा वषट् हुं वौषडित्यपि।
फडित्यपि च वर्णानां मन्त्राङ्गत्वं यथा तथा[1] ।। इति।
हृदयं मूलविद्येयं नकारः शङ्करः शिवः।
शिखा मकारः कवचं शिकारो वापि दृक्त्रयम्।।
यकारोऽस्त्रं नमः स्वाहा वषड् वौषट् फडित्यपि।
षड्भिर्वर्णैः षडङ्गानि कुर्यान्मन्त्रस्य पार्वति[2] ।। इति च।

अत्र मूलविद्या हृदयस्थानीया। शङ्करस्वरूपवान्नकारः शिरः, मकारः शिखा, शिकारः कवचम्, वाकार नेत्रत्रयम्, यकारोऽस्त्रस्थानीय इति पञ्चाक्षराणि परमात्मनः पञ्चाङ्गानि भवन्ति। एवं षडक्षरमन्त्रस्य षडक्षराणि नमः, स्वाहा, वषट्, हुम्, वौषट्, फट्, इति षट् पल्लवरूपाणि भवन्ति। एतेषां पल्लवानां विनियोगस्त्वङ्गन्यासे दृश्यते। तथा हि– हृदयाय नमः, शिरसे स्वाहा, शिखायै वषट्, कवचाय हुम्, नेत्रत्रयाय वौषट्, अस्त्राय फट्। भूर्भुवस्स्वरोमिति दिग्बन्धः। इत्येवं पञ्चाक्षरमहामन्त्रस्य यकारादि-ओङ्कारान्ताक्षराणां प्रयोगपूर्वकं सृष्टिन्यासक्रमेऽङ्गन्यासे प्रयोगो विद्यते। एवमेव स्थितिन्यास-संहारन्यास-क्रमयोरप्यङ्गन्यासे एतेषां प्रयोगो दृश्यते। पञ्चादीयमाने न्यासक्रमे द्रष्टव्यम्।

---

१. चन्द्रज्ञानागमः, उत्तरभागः, ८.२८-२९
२. पारमेश्वरागमः, १२.४५-४६

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रकृतं शैवागमोक्तदिशा पञ्चाक्षरमन्त्रस्य प्रत्यक्षरं वर्णादिषोडशरूपत्वं ऋष्यादिषड्रूपत्वं देवतादित्रिरूपत्वं च तुलनात्मकरीत्या दीयन्ते।

पञ्चाक्षरस्य प्रत्यक्षरं रूपाणि

चन्द्रज्ञानागमेऽस्य पञ्चाक्षरमन्त्रस्य प्रत्यक्षरं वर्णादिषोडशरूपता प्रदर्शिता। सूक्ष्मागमे पारमेश्वरागमे च भिन्नक्रमेण प्रत्यक्षरं षड्रूपता त्रिरूपता च प्रदर्शिते।

१. प्रथमं तावच्चन्द्रज्ञानागमोक्तरीत्या वर्णादिषोडशरूपता[१]– तत्र वर्णः, देवता, शक्तिः, आधारः, छन्दः, ऋषिः, स्थानम्, ब्रह्म, आयुधम्, कला, गुणः, चक्रम्, प्रकाशः, करणम्, वायुः, ज्ञानेन्द्रियं चेति षोडशरूपाणि मन्त्रस्य प्रत्यक्षरमुक्तानि। तथा हि–

नकारस्य वर्णः पीतः, देवता ब्रह्मा, शक्तिः सावित्री, आधारः पृथिवी, छन्दोऽनुष्टुप्, ऋषिर्वसिष्ठः, स्थानं पश्चिममुखम्, ब्रह्म सद्योजातः, आयुधं वज्रम्, कला निवृत्तिः, गुणः कठिनः, चक्रं चतुरस्राकारवत्, प्रकाशो ज्वलदग्निसदृशः, करणं मनः, वायुः प्राणः, ज्ञानेन्द्रियं घ्राणं च।

मकारस्य वर्णो जलसदृशश्वेतः, देवता विष्णुः, शक्तिर्लक्ष्मीः, आधारो जलम्, छन्दस्त्रिष्टुप्, ऋषिर्विश्वामित्रः, स्थानमुत्तरवक्त्रम्, ब्रह्म वामदेवः, आयुधं पद्मम्, कला प्रतिष्ठा, गुणो द्रवस्वभावः, चक्रं चन्द्रार्धाकारवत्, प्रकाशो चन्द्रिकावत्, करणं बुद्धिः, वायुरपानः, ज्ञानेन्द्रियं जिह्वा च।

शिकारस्य वर्णो वह्निसदृशरक्तः, देवता रुद्रः, शक्तिर्गौरी, आधारोऽग्निः, छन्द उष्णिक्, ऋषिर्जमदग्निः, स्थानं दक्षिणाननम्, ब्रह्म अघोरः, आयुधं स्वस्तिकः, कला विद्या, गुणो दीप्तः, चक्रं त्रिकोणाकारवत्, प्रकाशस्तडित्सदृशः, करणमहङ्कारः, वायुर्व्यानः, ज्ञानेन्द्रियं नेत्रं च।

वाकारस्य वर्णो वायुसदृशहरितः, देवता ईश्वरः, शक्तिरम्बिका, आधारो वायुः, छन्दो बृहती, काश्यप ऋषिः, स्थानं पूर्ववक्त्रम्, ब्रह्म तत्पुरुषः, आयुधं बिन्दुस्वरूपम्, कला शान्तिः, गुणः स्पर्शः, चक्रं षडस्राकारवत्, प्रकाश इन्द्रनीलद्युतिवत्, करणं चित्तम्, वायुरुदानः, ज्ञानेन्द्रियं स्पर्शश्च।

यकारस्य वर्णो व्योमसदृशनीलः, देवता सदाशिवः, शक्तिरुन्मनी, आधारो व्योम, छन्दो जगती, ऋषिर्भारद्वाजः, स्थानमूर्ध्वमुखम्, ब्रह्म ईशानः, आयुधं त्रिशूलम्,

---

१. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.२२-४७; स्थानविषये ८.२६, अस्मिन् श्लोके भेदो दृश्यते– पञ्चब्रह्ममुखान्याहुः स्थानं तेषां सुरोत्तम। पूर्वादि चोर्ध्वपर्यन्तं नकारादि यथाक्रमम्॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कला शान्त्यतीता, गुणः शून्यम्, प्रकाशश्चन्द्रमणिप्रकाशवत्, करणं प्रकृतिः, वायुः समानः, ज्ञानेन्द्रियं श्रोत्रं च।

२. सूक्ष्मागमे तावत् पञ्चाक्षरमन्त्रस्य प्रत्यक्षरमृष्यादिषड्रूपता एवं प्रदर्शिता[1]– ऋष्यादिषड्रूपाणि नाम ऋषिः, छन्दः, देवता, वर्णः, स्वरः, मुखं चेति।

तत्र प्रथमाक्षरस्य नकारस्य ऋषिर्गौतमः (चन्द्रज्ञानागमे वसिष्ठः), छन्दो गायत्री (चन्द्रज्ञानागमे अनुष्टुप्), देवता नन्दी (चन्द्रज्ञानागमे ब्रह्मा), स्वर आद्यः (उदात्तः। चन्द्रज्ञानागमे नोक्तः), वर्णः पीतः (चन्द्रज्ञानागमेऽपि पीतः), मुखं पूर्वम् (चन्द्रज्ञानागमे पश्चिमम्) च।

द्वितीयाक्षरस्य मकारस्य ऋषिरत्रिः (चन्द्रज्ञानागमे विश्वामित्रः), छन्द उष्णिक् (चन्द्रज्ञानागमे त्रिष्टुप्), देवता रुद्रः (चन्द्रज्ञानागमे विष्णुः) वर्णः कृष्णः (चन्द्रज्ञानागमे श्वेतः), स्वर अनुदात्तः (चन्द्रज्ञानागमे नोक्तः), मुखं दक्षिणं (चन्द्रज्ञानागमे उत्तरम्) च।

तृतीयाक्षरस्य शिकारस्य ऋषिर्विश्वामित्रः (चन्द्रज्ञानागमे जमदग्निः) छन्द अनुष्टुप् (चन्द्रज्ञानागमे उष्णिक्), देवता हरिः (चन्द्रज्ञानागमे रुद्रः), वर्णो धूम्रः (चन्द्रज्ञानागमे रक्तः), स्वर उदात्तः (चन्द्रज्ञानागमे नोक्तः), मुखं पश्चिमं (चन्द्रज्ञानागमे दक्षिणं) च।

चतुर्थाक्षरस्य वाकारस्य ऋषिरङ्गिराः (चन्द्रज्ञानागमे काश्यपः), छन्दो बृहती (चन्द्रज्ञानागमेऽपि बृहती), देवता ब्रह्मा (चन्द्रज्ञानागमे ईश्वरः), स्वरः प्रचयः (चन्द्रज्ञानागमे नोक्तः), वर्णः स्वर्णवर्णः (चन्द्रज्ञानागमे हरितः), मुखमुत्तरं (चन्द्रज्ञानागमे पूर्वं) च।

पञ्चमाक्षरस्य यकारस्य च ऋषिर्भारद्वाजः (चन्द्रज्ञानागमेऽपि भरद्वाजः), छन्दो विराट् (चन्द्रज्ञानागमे जगती), देवता स्कन्दः (चन्द्रज्ञानागमे सदाशिवः), स्वरः स्वरितः (चन्द्रज्ञानागमे नोक्तः), वर्णो रक्तः (चन्द्रज्ञानागमे नीलः), मुखमूर्ध्वम् (चन्द्रज्ञानागमेऽप्यूर्ध्वं) च।

३. पारमेश्वरागमे तु पञ्चाक्षरस्य प्रत्यक्षरं देवता, मुखम्, स्वरश्चेति त्रिरूपता प्रदर्शिता[2]–

नकारस्य देवता शिवः चन्द्रज्ञानागमे ब्रह्मा, सूक्ष्मागमे नन्दी, मुखं पूर्वम् (चन्द्रज्ञानागमे पश्चिमम्, सूक्ष्मागमेऽपि पूर्वम्), स्वर उदात्तश्च (चन्द्रज्ञानागमे नोक्तः,

---

१. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.२६-३०; पारमेश्वरागमेऽपि पञ्चाक्षराणां क्रमशः– गौतमः, अत्रिः, विश्वामित्रः, अङ्गिराः, भारद्वाजश्च ऋषयः; गायत्री, उष्णिक्, अनुष्टुप्, बृहती, विराट् चेति छन्दांसि। (१२.३१-४०)

२. पारमेश्वरागमः, २२.४२-४३।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सूक्ष्मागमेऽप्युदात्तः)। मकारस्य देवता रुद्रः (चन्द्रज्ञानागमे विष्णुः, मुखं दक्षिणम् (चन्द्रज्ञानागमे उत्तरम्, सूक्ष्मागमेऽपि दक्षिणम्), स्वर उदात्तश्च (चन्द्रज्ञानागमे नोक्तः, सूक्ष्मागमे त्वनुदात्तः)। शिकारस्य देवता महादेवः (चन्द्रज्ञानागमे रुद्रः, सूक्ष्मागमे हरिः), मुखं पश्चिमम् (चन्द्रज्ञानागमे दक्षिणम्, सूक्ष्मागमेऽपि पश्चिमम्), स्वर अनुदात्तश्च (चन्द्रज्ञानागमे नोक्तः, सूक्ष्मागमे तु उदात्तः)। वकारस्य देवता ईश्वरः (चन्द्रज्ञानागमेऽपि ईश्वरः, सूक्ष्मागमे तु ब्रह्मा), मुखम् उत्तरम् (चन्द्रज्ञानागमे पूर्वम्, सूक्ष्मागमेऽपि उत्तरम्), स्वर उदात्तश्च (चन्द्रज्ञानागमे नोक्तः, सूक्ष्मागमे तु प्रचयः)। यकारस्य देवता परमेश्वरः (चन्द्रज्ञानागमे सदाशिवः, सूक्ष्मागमे स्कन्दः), मुखम् ऊर्ध्वम् (चन्द्रज्ञानागमे सूक्ष्मागमे चोभयत्राप्यूर्ध्वम्), स्वरः स्वरितश्च (चन्द्रज्ञानागमे नोक्तः, सूक्ष्मागमेऽपि स्वरितः)।

एवं पञ्चाक्षरमन्त्रस्य प्रत्यक्षरमुक्तप्रकारेण वर्णादिषोडशरूपत्वेन, ऋष्यादिषड्रूपत्वेन, देवतादित्रिरूपत्वेन वा ज्ञेयं ध्येयं च। एकैकमक्षरमपि तथा वर्णादिरूपवैभवयुक्तत्वेन भाव्यते चेन्मन्त्रसमृद्धिर्जायते। मन्त्रसमृद्ध्या फलसमृद्धिर्निश्चिता। यद्यप्येवं शैवागमेषु ऋष्यादिविषये परम्पराभेदेन मतभेदो वर्तते, तथापि स्वगुरूक्तदिशा स्वकीयपरम्परानुसारमृष्यादिविषयं सम्यग् ज्ञात्वा पञ्चाक्षरमन्त्रस्याऽनुष्ठानं करणीयम्। उक्तं च चन्द्रज्ञानागमे—

एकमेव प्रधानं तु पञ्चाक्षरमिति स्मृतम्।
काम्यसिद्धिप्रयोगेण प्रत्यक्षं पञ्चधा भवेत्॥
ततः प्रस्तारकं प्रोक्तं विंशत्येकशतं भवेत्।
एवं पञ्चाक्षरोत्पत्तिर्गुरोर्वक्त्रेण लभ्यते[1]॥ इति।

पञ्चाक्षरमन्त्र एक एव प्रधानतया ज्ञातः। काम्यफलप्राप्त्यर्थं ये प्रयोगा विद्यन्ते, तेषामनुसारेण पञ्चाक्षरमन्त्रः साक्षात् पञ्चस्वरूपधारणं करोति। प्रस्तारभेदेनास्य मन्त्रस्य विंशत्युत्तरशतं (१२०) प्रकाराः शास्त्रेषूक्ताः। एवं पञ्चाक्षरोत्पत्तिं गुरुमुखेन ज्ञात्वा तदनुष्ठानं करणीयमिति रहस्यम्। "जपेदक्षरलक्षं वै चतुर्गुणितमादरात्"[2] इत्युक्तरीत्या पुरश्चरणविधौ वर्णादिरूपत्वेन मन्त्रस्य प्रत्यक्षरग्रहणं तु मन्त्रसमृद्ध्यर्थमपेक्षितमेव।

"मन्त्रं पञ्चविधं प्रोक्तम्"[3] इत्युक्तरीत्या पञ्चाक्षरमन्त्रस्य पञ्चविधत्वं सुप्रभेदागमे उक्तम्। तत्र पञ्चमस्वरूपनिरूपणात्मके पञ्चमप्रकरणे प्रसादपञ्चाक्षरी, मायापञ्चाक्षरी, सूक्ष्मपञ्चाक्षरी, स्थूलपञ्चाक्षरी, मूलपञ्चाक्षरी चेति पञ्चाक्षरमन्त्रस्य पञ्चविधत्वं प्रोक्तम्।

---

१. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.४२-४३।
२. तत्रैव, ८.५०।
३. तत्रैव, ८.४४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चानामपि प्रकाराणामोङ्कारपूर्वकत्वं विहितम्। ह्रां ह्रीं ह्रूं ह्रैं ह्रौम् इति सर्वेषां बीजाक्षराणां पञ्चाक्षरमन्त्रात्पूर्वम्, ओङ्कारादनन्तरं च समावेशे प्रसादपञ्चाक्षरी। बीजाक्षरेष्वन्तिमस्य हाने मायापञ्चाक्षरी। अन्तिमयोर्द्वयोर्हाने सूक्ष्मपञ्चाक्षरी। अन्तिमानां त्रयाणां हाने स्थूलपञ्चाक्षरी। सर्वेषां बीजाक्षराणां हाने मूलपञ्चाक्षरी च। रम्यापुरी, उज्जयिनी, हिमवत्केदारः, श्रीशैलम्, काशी चेति पञ्चपीठानामधिपतयो वीर-नन्दि-भृङ्गि-वृषभ-स्कन्दगोत्राधीशा जगद्गुरवस्तत्परम्परानुयायिन उपाचार्याः क्रमेणैतेषां पञ्चविधमन्त्राणामुपदेशेऽधिकृताः।

चन्द्रज्ञानागमे पञ्चाक्षरस्य मन्त्रस्य स्थूलसूक्ष्मप्रकारौ केवलौ भिन्नस्वरूपेणोक्तौ—

अ-उ-माश्चैव नादश्च कला चेत्यंशपञ्चकम्।
मिलित्वा प्रणवो जज्ञे सूक्ष्मपञ्चाक्षरात्मकः॥
तथा नमः शिवायेति स्थूलपञ्चाक्षरो भवेत्[1]॥ इति।

अ उ म नादः कला चेति प्रणवस्य पञ्चांशा भवन्ति। तादृशः प्रणवा मिलित्वा सूक्ष्मपञ्चाक्षरो जायते। तथैव 'नमः शिवाय' इति स्थूलपञ्चाक्षरो भवति। "सूक्ष्मं मूलं भवेदस्य स्थूलं विवरणं मतम्"[2] इत्युक्तरीत्याऽनयोर्महत्त्वे भेदो नास्ति।

पञ्चाक्षरस्य पञ्चतत्त्वस्वरूपत्वम्

सूक्ष्मागमोक्तदिशा पञ्चाक्षरमन्त्रः पञ्चतत्त्वात्मकः। तथा हि– पृथिवी, जलम्, तेजः, वायुः, आकाशश्चेति पञ्चमहाभूतानि; गन्धतन्मात्रा, रसतन्मात्रा, रूपतन्मात्रा, स्पर्शतन्मात्रा, शब्दतन्मात्रा चेति तन्मात्रापञ्चकम्; घ्राणः, जिह्वा, नेत्रम्, चर्म, श्रोत्रं चेति पञ्चज्ञानेन्द्रियाणि; वाक्, पाणि, पादः, पायुः, उपस्थश्चेति पञ्चकर्मेन्द्रियाणि; सद्योजातः, वामदेवः, अघोरः, तत्पुरुषः, ईशानश्चेति पञ्चब्रह्माणि; सृष्टिः, स्थितिः, लयः, तिरोधानम्, अनुग्रहश्चेति पञ्चकृत्यानि– एतानि सर्वाणि महतो मन्त्रस्य पञ्चाक्षरस्य पञ्चाक्षरैर्बोध्यानि।[3] किं बहुना, यानि यानि लोके विशेषतः पञ्चविधत्वेन प्रसिद्धानि, तानि सर्वाणि पञ्चाक्षरमयानीति बोध्यम्। तथा चोक्तं सूक्ष्मागमे—

लोके हि पञ्चधा यानि प्रसिद्धानि विशेषतः।
ज्ञेयानि तानि सर्वाणि पञ्चाक्षरमयानि हि[4]॥ इति।

---

१. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ११.४३-४४।
२. तत्रैव, ११.४५।
३. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ४.५८-५९।
४. तत्रैव, ४.६०।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

षडक्षरमन्त्रस्य षट्तत्त्वस्वरूपत्वम्

सूक्ष्मागमे एव षडक्षरमन्त्रस्य षडक्षराणां यकारादि-ओङ्कारान्तक्रमेण निवृत्तिमार्गतः सुसूक्ष्मं षट्तत्त्वस्वरूपत्वं प्रदर्शितम्। तथा हि– पूर्णता, नित्यता, आनन्दः, चिद्रूपता, सत्यरूपता, मिश्ररूपता चेति षट्तत्त्वरूपाणि; परः, गूढः, शरीरस्य शिवः, लिङ्गम्, अनादिः, महांश्चेत्यपराणि षट्तत्त्वरूपाणि; पराशक्तिः, आदिशक्तिः, इच्छाशक्तिः, ज्ञानशक्तिः, क्रियाशक्तिः, चिच्छक्तिश्चेति षट् शक्तयः; शिवसादाख्यम्, अमूर्तसादाख्यम्, मूर्तसादाख्यम्, कर्तृसादाख्यम्, कर्मसादाख्यम्, महासादाख्यं चेति षट् सादाख्यानि; महालिङ्गम्, प्रसादलिङ्गम्, चरलिङ्गम्, शिवलिङ्गम्, गुरुलिङ्गम्, आचारलिङ्गं चेति षड्लिङ्गानि; ऐक्यस्थलम्, शरणस्थलम्, प्राणलिङ्गिस्थलम्, प्रसादिस्थलम्, माहेश्वरस्थलम्, भक्तस्थलं चेति षट्स्थलानि; सद्भावः, सुज्ञानम्, सुमनाः, निरहङ्कारः, सद्बुद्धिः, सुचित्तं चेति षट् हस्ताः; ब्रह्मा, विष्णुः, रुद्रः, ईश्वरः, सदाशिवः, परशिवश्चेति षड्देवताः। एवं यानि यानि षडात्मकानि भवन्ति, तानि सर्वाणि षडक्षरमन्त्रस्य षडक्षररूपाणि भवन्ति[1]।

स्फटिकवर्णः, श्वेतवर्णः, नीलवर्णः, रत्नवर्णः, पीतवर्णश्चेति पञ्चवर्णरूपाणि यानि षडक्षरमन्त्रस्य यकारादिनकारान्तानि पञ्चाक्षराणि, तानि पृथिवी, जलं, तेजः, वायुः, आकाशश्चेति पञ्चमहाभूततत्त्वानां बीजानि, वर्णातीत ओङ्कारस्तु सर्वतत्त्वानां बीजम्। तेषामेव यादीनामक्षराणां क्रमेण ईशः, महेश्वरः, शिवः, विद्या, आत्मा, परशिवश्चेति तत्त्वतः षड्रूपाणि विद्यन्ते।[2] पुनस्तत्र यकारो वेदसहस्रस्वरूपः, वाकार अथर्ववेदस्वरूपः, शिकारः सामवेदरूपः, मकारो यजुर्वेदस्वरूपः, नकारः ऋग्वेदरूपः, ओङ्कारस्तु सर्वज्ञानस्वरूप इति सर्ववेदमयोऽयं षडक्षरमन्त्रः[3]। अत एवोक्तम्—

> तस्मादशेषवेदानां मन्त्राणां च विशेषतः।
> मूलबीजमयं मन्त्रश्चिन्तारत्नमिवापरम्[4]॥ इति।

अस्यायमर्थः— सर्वेषां वेदानां सर्वेषां च मन्त्राणां मूलबीजभूतोऽयं षडक्षरमन्त्रश्चिन्तामणिरिव वाञ्छितफलप्रदायको भवति। सारवती चेयमुक्तिः—

> षडात्मकं जगत्सर्वं षडक्षरसमुद्भवम्।
> स्थीयते लीयते चास्मिन् तस्माद् ब्रह्मात्मको मनुः[5]॥ इति।

---

१. सूक्ष्मागणः, उत्तरभागः, क्रियापादः, ४.३७-४७।
२. तत्रैव, ४.४८-५२।
३. तत्रैव, ४.५२।
४. तत्रैव, ४.५३।
५. तत्रैव, ४.५४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यद् यत् षट्तत्त्वस्वरूपं जगत्, तत्सर्वं षडक्षरमन्त्रादुत्पद्यते, तत्रैव स्थीयते, तस्मिन्नेव लीयते च। अतः स मन्त्रो जगत्सृष्टिस्थितिलयकारणभूतस्य ब्रह्मणः स्वरूपमिति ज्ञेयम्।

पञ्चाक्षरमन्त्रमहिमा

पञ्चाक्षरमन्त्रस्य षडक्षरमन्त्रस्य च महिमानं प्रत्येकतया वर्णयन्ति। तत्र प्रथमं पञ्चाक्षरमन्त्रस्य महिमा शैवागमोक्तदिशा विमृश्यते। सूक्ष्मागमे पञ्चाक्षर्या माहात्म्यं सम्यङ् निरूपितम्। सप्तकोटिमन्त्रेषु पञ्चाक्षरीमन्त्रस्य श्रेष्ठत्वं तत्रादौ प्रतिपादितम्। शैवमन्त्राणां ये जापका भवन्ति, ते शिवप्रसादेन जन्ममृत्युभयाकुलात् संसारात् समुद्धृता भवन्ति। तत्रापि पञ्चाक्षरीमन्त्रः श्रेष्ठतरो भवति। तथा चोक्तम्—

मन्त्राणामपि शैवानां मुख्या एकादश स्मृताः।
तत्राघोरो महामन्त्रः सर्वाभीष्टप्रदो नृणाम्॥
तस्मादपि श्रेष्ठतरा मम पञ्चाक्षरी शिवे।
अस्य मन्त्रस्य चैवान्ये उपमन्त्राः प्रकीर्तिताः[1]॥ इति।

शैवमन्त्रेषु षडङ्गमन्त्राः पञ्चब्रह्ममन्त्राश्चेत्याहत्यैकादशमन्त्रा मुख्या भवन्ति। तेषां मध्येऽघोरमन्त्रः (अघोरेभ्योऽथ घोरेभ्य इत्यादिमन्त्रः) मनुष्याणां सर्वाभीष्टफलप्रदः। तस्मादपि पञ्चाक्षरमन्त्रः श्रेष्ठतरः। अन्ये मन्त्रा अस्य पञ्चाक्षरमन्त्रस्यैवोपमन्त्रा इति संस्तुताः। अस्य मन्त्रस्य महता प्रभावेण वेदधर्माः शाश्वताः सञ्जाताः, इतिहासपुराणानि समस्ताश्चागमाः सर्वलोकोपकारकाः सञ्जाताः, ब्रह्मा, विष्णुः, रुद्रः, देवेन्द्रः, अन्याश्च देवताः, आदित्यादयः सर्वे ग्रहाः, भूर्भुवस्स्वरादयो लोकाः, गन्धर्वाः, किन्नराः, सिद्धाः, अन्ये च देवतात्मानः सनातनाः सम्भूताः। एतावत्प्रभावयुक्तोऽयं पञ्चाक्षरात्मको महामन्त्रः[2]। अयं मन्त्रः सर्वसिद्धिप्रदः सर्वतत्त्वप्रकाशकश्च।[3] अन्यमन्त्रापेक्षयाऽस्य मन्त्रस्य वैशिष्ट्यं वर्तते। तदुक्तम्—

सूक्ष्मा क्रियाऽधिकफलं सर्वसाधारणं शिवे।
विनाऽऽयासेन संसिद्धिः पञ्चाक्षरमहामनोः॥
अस्मादायासबहुलाः सर्वे मन्त्राश्च तत्क्रियाः[4]॥ इति।

---

१. सूक्ष्मागमः, उत्तरभागः, क्रियापादः ३. ५-६।
२. तत्रैव, ३. ७-९।
३. तत्रैव, ३. १०४।
४. तत्रैव, ३. ५९।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अन्ये मन्त्राः सर्वे तत्क्रियाश्चाऽऽयासबहुलाः, परं तु पञ्चाक्षरमहामन्त्र आयासेन विना फलप्रदः, सर्वसाधारणश्च; लिङ्गवर्णादिभेदं विना सर्वेऽस्याधिकारिणः। तत्क्रिया तु सूक्ष्मा, परन्तु अधिकफलदा। एवमेवोक्तं पारमेश्वरागमे– "तदल्पं वेदसाराख्यं भुक्तिदं च विमुक्तिदम्"[१] इति। यानि विद्यास्थानानि भवन्ति, तानि सर्वाणि पञ्चाक्षरमन्त्रे विलीयन्ते, पुनस्ततो निर्गच्छन्ति।[२] ये चेमं मन्त्रमाश्रयन्ते, ते कलियुगेऽपि दृढव्रता भूत्वा मुक्तिं प्राप्नुवन्ति[४]।

चन्द्रज्ञानागमोक्तदिशा सदाचारविहीनस्यापि पतितस्यापि रक्षकोऽयं पञ्चाक्षरमन्त्रः। अस्मात् परो न कश्चिन्मन्त्रः। सर्वास्ववस्थासु शिवभक्तिमतोऽयं मन्त्रो निष्फलो न भवति। कस्याप्ययं न शत्रुः सुसिद्धस्याऽसिद्धस्य वा। तथा चोक्तम्—

सर्वावस्थां गतस्यापि मयि भक्तिमतः सदा।
सिद्ध्यत्येष न सन्देहो नापरस्य तु कस्यचित्॥
न कदाचन कस्यापि रिपुरेष महामनुः।
सिद्धो वाऽथ सुसिद्धो वा साध्यो वाऽथ भविष्यति[५]॥ इति।

तत्र सिद्धेन गुरुणोपदिष्टो मन्त्रः सुसिद्धः, असिद्धेन गुरुणोपदिष्टः सिद्धः, स्वयमाराधितः साध्यश्चेत्युच्यते। तदुक्तम्—

सिद्धेन गुरुणादिष्टः सुसिद्ध इति कथ्यते।
असिद्धेनापि वा दत्तः सिद्धः साध्यस्तु केवलम्[६]॥ इति।

सर्वदाऽयं मन्त्रः सफलः। गच्छंस्तिष्ठन्, उपविशन्, स्वस्थः परवशो वा, शान्तो कुपितो वा, स्वेच्छकर्म कुर्वन्, शुचिर्वाऽशुचिर्वा, आचारवाननाचारवान् वा, सर्वोऽपि पञ्चाक्षरीजपस्य फलभाग् भवति।[७] मन्त्रान्तरेषु सिद्धेष्वयं मन्त्रः सिद्ध इति वक्तुं न शक्यते। परं तु महामन्त्रेऽस्मिन् सिद्धे सर्वे मन्त्राः सिद्धा भवन्तीति निश्चितम्। एतावान् महिमाऽस्य मन्त्रस्य[७]।

पारमेश्वरागमे त्विदमुक्तम्– सर्ववेदोक्तिप्रकारेण सर्वकाले सर्वस्थानेषु सर्वदोऽयं

---

१. पारमेश्वरागमः, ११.९।
२. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.७५।
३. तत्रैव, ३.७६।
४. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.८७-८८।
५. तत्रैव, ८.८९।
६. तत्रैव, ८.८४-८६; पारमेश्वरागमः, १०.८५-८७।
७. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.९२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चाक्षरमन्त्र इति। अतस्तं सर्वत्र सर्वदा जपेत्।[1] यथा लोकेषु कैलासः, देवेषु शङ्करः, मुक्तिपरेषु मतेषु वीरशैवम्, मित्रेषु ज्ञानम्, मुक्तिसाधनेषु भक्तिः, मर्त्येषु शैवश्च श्रेष्ठतया परिगण्यते, तथा मन्त्रेषु पञ्चाक्षरः श्रेष्ठतया निश्चीयते। तथा चोक्तम्—

न कैलासात् परो लोको न दैवं शङ्करात्परम्।
न वीरशैवाच्च मतं नास्ति मुक्तिपरं सुखम्॥
नास्ति ज्ञानात्परं मित्रं न भक्तेः साधनं परम्।
न शैवादधिको मर्त्यो मन्त्रः पञ्चाक्षरः परः[2]॥

यदि शाठ्येनाऽऽलस्येन परिहासेन मायया स्वभावेन वा, येन केनापि प्रकारेण वा शैवः पञ्चाक्षरः सकृदेव स्मर्यते चेत्, शिवस्वरूपं प्राप्यते; किं पुनर्भक्तिपूर्वकमयं मन्त्रो जप्यते चेत्, अस्मिन् मन्त्रे भक्तितो जप्ते सति भुक्तिर्मुक्तिश्च निःसंशयं प्राप्येते।[3] पञ्चाक्षरजापको ब्रह्महत्यादिभिः पापैर्मुच्यते। अत्र संशयो नास्ति[4]। एवं शैवागमेषु पञ्चाक्षरस्य माहात्म्यं सम्यगुक्तम्।

षडक्षरमन्त्रमहिमा

ओङ्कारपूर्वकत्वे पञ्चाक्षरमन्त्र एव षडक्षरमन्त्रो भवतीत्युक्तम्। षडक्षरमन्त्रस्त्वधिकेनोङ्कारमाहात्म्येन वैशिष्ट्यं प्राप्नोति। ओङ्कारस्य तु माहात्म्यमथर्वशिर उपनिषदि सम्यग् वर्णितम्– "तस्योत्तरतः शिरो दक्षिणतः पादो य उत्तरतः स ओङ्कारो य ओङ्कारः स प्रणवो यः प्रणवः स सर्वव्यापी यः सर्वव्यापी सोऽनन्तो योऽनन्तस्तत्तारं यत्तारं तत्सूक्ष्मं यत्सूक्ष्मं तच्छुक्लं यच्छुक्लं तद्वैद्युतं यद्वैद्युतं तत्परं ब्रह्म स एकः स रुद्रः स ईशानः स भगवान् स महेश्वरः स महादेवः"[5] इति। ममोङ्कारमुद्दिश्य पारमेश्वरागमे यदुच्यते, तस्यायं भावः– ओमित्येकाक्षरे मन्त्रे त्रिगुणातीतः सर्वज्ञः सर्वकृत्प्रभुः शिवः विशेषतया स्थितः। शिवः परमात्मा प्रणवस्वरूपेणाऽधिकः। अत एव प्रणवाभ्यासप्रसम्भवया भक्त्या तत्स्वरूपं ज्ञातुं शक्यते। शिवरुद्रादिशब्दाः प्रणवपरा एव। प्रणववाच्यस्य शिवस्य भावनात् प्रणवजपाच्च परा सिद्धिः प्राप्यते। नास्त्यस्मिन् विषये संशयलेशोऽपि। तस्मादागमविशारदाः प्रणवमेकाक्षरं देवमाहुरिति।[6] तत् कीदृशमिति चेत्तत्रैवोच्यते—

---

१. पारमेश्वरागमः, १०.८८।
२. तत्रैव, १०.८९-९०।
३. तत्रैव, १०.९३-९५।
४. तत्रैव, १०.९९।
५. अथर्वशिरः, ४४।
६. पारमेश्वरागमः, २२.१२-२४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वाच्यवाचकयोरैक्यं मन्यमाना मनस्विनः ।
ज्ञायते योगिभिर्ध्यानि बोधानन्दाव्ययाद्वयः[१] ।।

अर्थान्मनस्विनो वाच्यं शिवं वाचकमोङ्कारं चैकत्वेन मन्यन्ते। अत ओङ्कारः साक्षात् शिव एव। अयमेवोङ्कारो योगिभिर्ध्यानद्वारा ज्ञानानन्दाव्ययाद्वयतत्त्वरूपेण भाव्यते। एवं ज्ञानानन्दाव्ययाद्वयतत्त्वरूपस्य शिवस्य वाचकत्वेनोङ्कारः परमश्रेष्ठः।

अ-उ-म इति वर्णैर्युक्तः सन् प्रणवस्त्रिवर्णः। ह इति नादस्य योजनया स प्रशस्ततरो भवति। परमात्मनो दक्षिणमुखाद् अकारः, वाममुखाद् उकारः, मध्यममुखात् (ऊर्ध्वमुखात्) मकारः, इति प्रणवघटकानां त्रिवर्णानामुत्पत्तिरुक्ता[२]। एतैः सह हकारयोजनया प्रणवो मोक्षदः सम्पद्यते। तत्राऽकारो ब्रह्मबीजमुकारो विष्णुबीजं मकारो रुद्रबीजं च। तेषां मेलनेन शिवस्य शरीरं सम्पन्नम्[३]। एवमेवाऽकारोकारौ प्रकृतिपुरुषात्मकौ, मकारस्तयोर्द्वयोर्नियन्ता, नादः (हकारः) साक्षात् सदाशिवश्च। अकारोकारमकाराः क्रमेणेच्छाक्रियाज्ञानशक्तिस्वरूपाः, नादः परशिवस्वरूपश्चेत्युच्यते।[४] इत्येवमादिभिर्माहात्म्यांशैः सम्पन्नः प्रणवः साकल्यं शाम्भवं सौख्यं सावश्यं सायुज्यं चेति पञ्चविधो भवति। तत्र अ उ म ह– इति साकल्यप्रणवः, अ उ म ह इ– इति शाम्भवप्रणवः, अ उ म ह ई– इति सौख्यप्रणवः, अ उ म ह ए– इति सावश्यप्रणवः, अ उ म ह औ– इति सायुज्यप्रणवश्च।[५] एतादृशमहिमवतः प्रणवस्य योजनया पञ्चाक्षरमन्त्रः षडक्षरात्मकत्वेन बहु प्राशस्त्यं भजते। तथा चोक्तम्—

तस्मादिदं समस्तानामादिबीजमुदीरितम् ।
अनेन सहितो मन्त्रः सर्वमन्त्रोत्तमोत्तमः[६] ।। इति।

एतादृशैर्विशेषैर्युक्तत्वात् प्रणवः समस्तानां मन्त्राणामादिबीजमुक्तम्। अनेन सहितो मन्त्रः (षडक्षरः) सर्वस्मान्मन्त्रादुत्तमः। अपि चास्य पूर्वोक्तिदिशा सर्वषट्तत्त्वस्वरूपत्वात् प्रशस्ततमत्वं निश्चितम्।

मन्त्रराजत्वेन परिगृहीत ओङ्कारः पञ्चाक्षरैर्युक्तः सन् सायुज्यकारणं भवति सर्वसिद्धिकरश्च। स सर्वमन्त्रेषु निहितः सन् विद्यानामादिभूतः[७]। इदं च ज्ञेयम्–

---

१. तत्रैव।
२. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ४.६-८.४।
३. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ४.२०।
४. तत्रैव, ४.११-१२।
५. तत्रैव, ४.१९-२४; वातुलशुद्धागमः, ६ प्रणवभेदपटलः, २०-२४।
६. तत्रैव, ४.३४।
७. तत्रैव, ४.५५-५६।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इदं रहस्यं पापघ्नमात्मज्ञानप्रकाशकम् ।
सारात्सारतरं दध्नो नवनीतमिवोद्धृतम् ।।
षडक्षरमनुज्ञानं सर्वज्ञानोत्तमोत्तमम्[1] ।। इति ।

इदं रहस्यभूतं षडक्षरमन्त्रज्ञानं पापहरमात्मज्ञानप्रकाशकं च । यथा नवनीतं दध्नो मथनेन जायते, तथा सारात्सारभूतं सर्वस्मात् ज्ञानादुत्तमं ज्ञानं षडक्षरमन्त्रजपादुत्पद्यते । यथा च शम्भुर्मुमुक्षूणां संसारभयनाशकस्तथाऽयं षडक्षरात्मको मन्त्रः संसारभयनाशकः ।[2] सर्वे शिवमन्त्रा अस्य मन्त्रस्यार्थप्रकाशकाः[3] । अत एवास्य मन्त्रराजत्वम् । तदुक्तम्—

प्रमाणभूतः सर्वेषां वेदोक्तत्वाद्विशेषतः ।
प्रणवेन युतो देवि मन्त्रराजः प्रकीर्तितः[4] ।। इति ।

वेदोक्तत्वादयं मन्त्रः सर्वेषां विशेषतया प्रमाणभूतः । ओङ्कारयुक्तः सन्नयं मन्त्रराज इति कीर्त्यते । अस्य महिम्ना मनुष्यः श्रेष्ठत्वं भजते । तथा चोक्तम्—

नगानां हि यथा मेरुः सरसां सागरो यथा ।
सरितां च यथा गङ्गा पशूनां गौर्यथा वरा ।।
मणीनां कौस्तुभो यद्वल्लोहानां काञ्चनो यथा ।
तथा षडक्षरपरो मानुषेषु वरः प्रिये[5] ।। इति ।

यथा पर्वतेषु मेरुः, जलनिधिषु सागरः, नदीषु गङ्गा, पशुषु गौः, मणिषु कौस्तुभः, लोहेषु काञ्चनं च श्रेष्ठतां भजन्ते, तथा मनुष्येषु षडक्षरमन्त्रनिष्ठः श्रेष्ठत्वं भजते । अस्य मन्त्रस्य ज्ञानमेव परमोत्कृष्टं शिवज्ञानम् । तदेव ज्ञानस्य परमावधित्वेनोक्तम्—

एतावद्धि शिवज्ञानमेतावत्परमं पदम् ।
यस्यों नमः शिवायेति सदा वाचि प्रवर्तते[6] ।। इति ।

यस्य वाचि ओन्नमः शिवायेति षडक्षरमन्त्रः प्रवर्तते, तेनैव शिवज्ञानस्य परमावधिः प्राप्यते परमपदं च वशीक्रियते ।

पारमेश्वरागमे च षडक्षरमन्त्रस्य माहात्म्यं सम्यग्वर्णितम् । अस्मिन् मन्त्रे साक्षात् शिवः प्रतिष्ठितः । तथा चोक्तम्—

---

१. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ४.६८ ।
२. तत्रैव, ३.५४ ।
३. तत्रैव, ३.१५ ।
४. तत्रैव ३.१६ ।
५. तत्रैव, ३.८२-८३ ।
६. तत्रैव, ३.८४ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मन्त्रस्त्वक्षरतः सूक्ष्मः पञ्चब्रह्मतनुः शिवः ।
वाच्यवाचकभावेन स्थितः साक्षात् स्वभावतः ।।
वाच्यः शिवः प्रमेयत्वान्मन्त्रस्तद्वाचकः स्मृतः ।
वाच्यवाचकभावोऽयमनादिः संस्थितस्तयोः[१] ।। इति ।

अयं षडक्षरमन्त्रः प्रत्यक्षरं सूक्ष्मः । मन्त्रेऽस्मिन् पञ्चब्रह्मशरीरः शिवो वाच्यवाचकसम्बन्धेन साक्षात्स्वभावतया तिष्ठति । तत्र वाच्यः शिवः प्रमेयत्वात्, अयं षडक्षरमन्त्रस्तस्य वाचक इति ज्ञायते । शिवस्य मन्त्रस्य च यो वाच्यवाचकरूपः सम्बन्धो विद्यते, स अनादित्वेन तिष्ठति । मन्त्राणामधिपेन शिवेन प्रणीतोऽयं मन्त्रो निर्मलभावेनानन्यसदृशः प्रतिभाति । तस्मिन्नेव मन्त्रे साङ्गानि वेदशास्त्राणि निलीनानि ।[२] इदमत्र रहस्यम्—

शिवज्ञानानि यावन्ति विद्यास्थानानि यानि च ।
षडक्षरस्य सूत्रस्य तानि भाष्यं समासतः[३] ।। इति ।

षडक्षरमन्त्रः सङ्क्षेपतया सूत्ररूपो यस्य सर्वाणि शिवज्ञानपराणि शास्त्राणि भाष्यभूतानि । अतः षडक्षरमन्त्रे हृदि स्थिते मन्त्रैरन्यैः शास्त्रैर्वा किं फलम् ? येन षडक्षराभ्यासः स्थिरीकृतस्तेन सर्वमधीतं श्रुतं च । येन षडक्षराभ्यासः क्रियते, तस्य वीरशैवस्याऽऽचारः स्थिरीकृतः, जीवितं सफलम्, मुक्तिः करस्था च[४] ।

पुरश्चरणविधिः

उपासनायां मन्त्रस्य स्थानं विशिष्टं वर्तते । तस्यां मन्त्रस्य जपोऽनिवार्यः । जपार्थं मन्त्रस्य सिद्धिरावश्यकी । मन्त्रसिद्ध्यर्थं पुरश्चरणविधिर्विहितः । पुरश्चरणं विना मन्त्रसिद्धिर्न भवति । पञ्चाङ्गपुरश्चरणं दशाङ्गपुरश्चरणं चेति द्विविधं विद्यते । जपः, होमः, तर्पणम्, अभिषेकः, ब्राह्मणभोजनं (जङ्गमभोजनं) चेति पञ्चाङ्गानि । एतैः सह पटलः, पद्धतिः, कवचम्, सहस्रनाम, स्तोत्रं चेति पञ्चाङ्गानां मेलनेन दशाङ्गानि भवन्ति । तत्र मन्त्रजपसंख्याया दशांशेन होमः, तद्दशांशेन तर्पणम्, तद्दशांशेनाभिषेकः, पुनस्तद्दशांशेन ब्राह्मणभोजनं (जङ्गमभोजनं) चेति पञ्चाङ्गविधिः । अनन्तरं पद्धतिमनुसृत्य पटल-कवच-सहस्रनाम-स्तोत्राणां पाठो दशाङ्गविधौ कर्तव्यः ।

---

१. पारमेश्वरागमः, ६-२८.४
२. तत्रैव, ११.१९-२० ।
३. तत्रैव, ११.२२ ।
४. तत्रैव, ११.२२-२५,२७ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सूक्ष्मागमे तावज्जप-तर्पण-होम-माहेश्वरभोजनानीति क्रमेण चत्वार्यङ्गान्युक्तानि। अभिषेको नामाऽङ्गं तु नोक्तम्। तत्रैव हि पुरश्चरणविधिरुक्तः। तथा हि–

पञ्चलक्षं जपेद्देवि दीक्षितश्च विशेषतः।
अनन्यतत्परो भूत्वा तावत्संख्यादशांशकैः॥
क्षीराज्यैस्तर्पयित्वाऽथ जुहुयात्तद्दशांशकम्।
पायसैः शर्कराभिश्च माहेशांस्तु शिवव्रतान्॥
वेदमार्गैकनिरतान् सदाचारपरायणान्।
स्वधर्मनिरतान् शान्तान् भोजयेत्तद्दशांशतः॥
एवंकृतो महादेवि पौरश्चरणिको भवेत्[1]॥ इति।

दीक्षासम्पन्नः साधकोऽनन्यपरो भूत्वा पञ्चलक्षवारं (पञ्चाक्षरं षडक्षरं वा) मन्त्रं जपेत्। तद्दशांशकैर्मन्त्रैः (पञ्चाशत्सहस्रवारं मन्त्रपठनेन) क्षीरमिश्रितजलेन तर्पणं कुर्यात्। तद्दशांशेन (पञ्चसहस्रवारं मन्त्रपठनेन) होमः कार्यः। तद्दशांशकान् मन्त्रस्वरूपिण इति मत्वा शिवव्रतनिष्ठान् वेदमार्गैकनिरतान् सदाचारव्यापृतान् स्वधर्मपरायणान् शान्तान् माहेश्वरान् पायसैः शर्करादिभिश्च भोजयेत्। एवंकृतः पौरश्चरणिको भवति। एवं पुरश्चरणविधिना मन्त्रसिद्धिं सम्प्राप्याऽतन्द्रितः सन् नित्यमष्टोत्तरसहस्रवारं वाऽष्टोत्तरशतवारं वा यो जपं कुरुते, स सर्वपापानि निर्धूय शिवलोके महीयते[2]।

चन्द्रज्ञानागमे पारमेश्वरागमे च केवलं पुरश्चरणे कतिवारं मन्त्रजपः कर्तव्यः, इत्यस्मिन् विषये किञ्चिदुच्यते। तत्रेदमुक्तम्—

जपेदक्षरलक्षं वै चतुर्गुणितमादरात्।
युक्ताशी संयमी यः स पौरश्चरणिकः स्मृतः॥
यः पुरश्चरणं कृत्वा नित्यजापी भवेत्पुनः।
तस्य नास्ति समो लोके स सिद्धः सिद्धिदो भवेत्[3]॥ इति।

पञ्चाक्षरमन्त्रमक्षरलक्षं जपेदित्यत्रैकैकाक्षरं लक्षवारमित्येव क्रमेण पञ्चलक्षवारं तं मन्त्रं जपेदित्यर्थः। चतुर्गुणितमित्यनेन विंशतिलक्षवारं मन्त्रजपः कर्तव्य इत्युक्तं भवति।

---

१. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.४५-४८।
२. तत्रैव, ३.४९।
३. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.५०-५१; पारमेश्वरागमः १२.७७-७९– 'युक्ताशी' इत्यत्र 'नक्ताशी' इत्यत्र 'यः पुरश्चरणम्' इत्यत्र 'तत्पुरश्चरणम्' इति च पाठान्तरे।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यो युक्ताशी संयमी भूत्वा विंशतिलक्षवारं मन्त्रजपं करोति, स पौरश्चरणिक इत्युच्यते। एवं पुरश्चरणं कृत्वा यो नित्यजापी भवति, तस्य लोके न कोऽपि समानः। स एव सिद्धः सिद्धिदश्च।

जपविधिः

सूक्ष्मागमोक्तदिशा स्नानानन्तरमावाहिनी, स्थापिनी, सन्निधापिनी, सम्मुखीकरणी, अवकुण्ठिनी, वरदा चेति षण्मुद्राः प्रदर्श्य साधको गन्धपुष्पधूपदीपनैवेद्यमुद्राभिर्मानसैः पञ्चोपचारैः पूजयित्वा शान्तभावेन नदीतीरे पर्वताग्रे देवागारे वा, विशेषतया निर्दोषे निरुपद्रवे च विविक्तदेशे वा मन्त्रजपं कुर्यात्[१]। तदा साधकः प्राङ्मुखो वोदङ्मुखो वा पद्मासने उपविष्टः समकायशिरोग्रीवः सन् त्रपालस्यादिवर्जितो भूत्वा शिवध्यानपूर्वकं जपं कुर्यात्। तादृशजपाद्योगी निःसंशयं जीवन्मुक्तो भवति[२]। चन्द्रज्ञानागमोक्तरीत्या स्नानं कृत्वा प्राङ्मुखो वा उदङ्मुखो वोपविश्य रुचिरमासनं बद्ध्वा, हृदि शङ्करं ध्यात्वा, स्वगुरुं तद्गुरुञ्च सञ्चिन्त्य, मौनी एकाग्रचित्तश्च भूत्वा, प्राणायामद्वारा शोषणं दहनमाप्यायनं चेति विधिभिः पञ्चभूतशुद्धिं साधयित्वा, मन्त्रन्यासादिद्वारा शिवकलाभिः स्वकीयं शरीरं पवित्रीकृत्य, शक्तिविशिष्टं शिवं ध्यायन्, विद्यां, स्थानं स्वरं रूपमृषिं छन्दो देवतां बीजं शक्तिं तथा वाच्यमीश्वरं च स्मृत्वा पञ्चाक्षरं जपेत्[३]। अत्र मन्त्रन्यासद्वारा सकलीकरणमुक्तम्। न्यासविधिः पश्चान्निरूप्यते।

प्रथमं वाचिक उपांशुर्मानसश्चेति जपस्त्रिविधः। एते क्रमेणोत्तममध्यमाधमत्वेन परिगणिताः। अस्य जपत्रैविध्यस्योल्लेखो मनुस्मृतावपि दृश्यते। शैवागमेषु त्रयाणां जपानां स्वरूपं सम्यग्वर्णितम्। तत्र सूक्ष्मागमोक्तदिशा त्रयाणां जपानां लक्षणान्येवं वर्तन्ते—

उच्चैस्ताल्वादिकस्पर्शाज्जपेत् स्पष्टपदाक्षरम्।
सम्यक्श्रोत्रगतश्चैव स जपो वाचिकः स्मृतः॥
शनैस्ताल्वादिकस्पर्शात् किञ्चित् स्पष्टपदाक्षरम्।
जपेदीषत्कर्णगतमुपांशुः स जपो भवेत्॥
मन्त्रार्थं मनसा ध्यायन् वर्णाद्वर्णं पदात्पदम्।
आवृत्य गणनात्पूर्वं जपेन्मानस उच्यते[४]॥ इति।

---

१. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.३८-३९।
२. तत्रैव, ३.४०।
३. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.५२-५५; पारमेश्वरागमः, ११.७९-८३।
४. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.४२-४३।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ताल्वादिवर्णोत्पत्तिस्थानस्पर्शपूर्वकं स्पष्टपदाक्षरमुच्चैः पार्श्वस्थैर्यथा श्रूयते तथोच्चार्यमाणो जपो वाचक इति स्मृतः। तेषामेव स्थानानां स्पर्शपूर्वकमस्पष्टपदाक्षरमीषदिव पार्श्वस्थैर्यथा श्रूयते, तथोच्चार्यमाणो जप उपांशुरित्युक्तः। मन्त्रस्यार्थं मनसि ध्यायन् वर्णाद्वर्णं पदात्पदं चावृत्य मनस्येव स्मर्यमाणो जपो मानस इति मन्यते। चन्द्रज्ञानागमे पारमेश्वरागमे च किञ्चिद्भिन्नरीत्या त्रयाणां जपानां वर्णनं कृतम्। तथा हि—

यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः।
मन्त्रमुच्चारयेद्वाचा वाचिकोऽयं जपः स्मृतः॥
जिह्वामात्रपरिस्पन्दादीषदुच्चारितोऽपि वा।
अपरैरश्रुतः स्वेन श्रुतश्चोपांशुरुच्यते॥
धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम्।
शब्दार्थचिन्तनं भूयः कथ्यते मानसो जपः[1]॥ इति।

उदात्तानुदात्तस्वरितैः स्पष्टपदाक्षरैः शब्दैर्यो मन्त्रस्योच्चारो वाचा क्रियते, स वाचिको जपः। जिह्वामात्रचलनेन य ईषदुच्चारितः सन्, अपरैरश्रुतोऽपि स्वेन श्रूयमाणः स उपांशुः जपः। यश्च मनसाऽक्षरक्रमेण वर्णाद्वर्णं पदात् पदं शब्दार्थयोश्चिन्तनं स मानसो जपः।

त्रिविधे जपे मानसो जप उत्तम इत्युक्तम्। तथा हि–

(अ) त्रयाणामपि चैतेषां वरं स्यादुत्तरोत्तरम्।
(आ) उत्तमो मानसः प्रोक्त उपांशुर्मध्यमस्तथा।
अधमो वाचिकः प्रोक्त इत्येतच्छिवशासनम्॥
(इ) उत्तमं मानसं जप्यमुपांशुं मध्यमं विदुः।
अधमं वाचिकं प्राहुरागमार्थविशारदाः[2]॥

मानसादपि जपात् सगर्भो नामान्यो जपः श्रेष्ठ इति शैवागमा वदन्ति। अत्र सगर्भोऽगर्भश्चेति पुनर्जपो द्विविध इति ज्ञेयम्। सूक्ष्मागमानुसारेण प्राणायामसमायुक्तः सगर्भजपः, तद्रहितश्चागर्भजपः। तदुक्तम्–

प्राणायामसमायुक्तः सगर्भो जप उच्यते।
प्राणायामेन रहितो ह्यगर्भो जप उच्यते[3]॥ इति।

---

१. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.५६-५९; पारमेश्वरागमः, ११.८६-८८।
२. (अ) सूक्ष्मागमः, क्रि.पा., ३.४३; (आ) चन्द्रज्ञानागम, क्रि.पा., ८.५६; पारमेश्वरागमः।
३. चन्द्रज्ञानागमः, क्रि. पा., ८.६२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पारमेश्वरागमोक्तदिशा तु कुम्भकप्राणायामसहितः सगर्भजपः, पूरकरेचकप्राणायाम-सहितश्चाऽगर्भजपः। तथा चोक्तम्–

कुम्भकेन समायुक्तः सगर्भो जप उच्यते।
आद्यन्तयोरगर्भोऽपि प्राणायामः प्रशस्यते[1]।। इति।

सध्यान इति षष्ठः प्रभेदोऽप्यस्ति। तस्य लक्षणं तु न दत्तम्। अगर्भं विहाय पञ्चविधेषु शक्त्यनुसारेणैको जपः कर्तव्य इत्यागमशासनम्। तदुक्तम्–

एषु पञ्चविधेष्वेव कर्तव्यः शक्तितो जपः[2]।। इति।

एतेषु तारतम्यमेवमुद्घाटितम्–

वाचिकस्त्वेक एव स्यादुपांशुः शतमुच्यते।
साहस्रं मानसं प्रोक्तं सगर्भस्तच्छताधिकः।।
.....
सगर्भादपि साहस्रं सध्यानो जप उच्यते[3]।। इति।

एवं वाचिकजपाद् उपांशुजपस्य शतगुणफलम्, उपांशुजपान्मानसस्य सहस्रगुणफलम्, मानसजपात् सगर्भजपस्य शतगुणफलम्, सगर्भजपादपि सध्यानजपस्य सहस्रगुणफलम्। अतो वाचिकाद् उपांशुः श्रेष्ठः, उपांशोर्मानसः, मानसात् सगर्भः, सगर्भात् सध्यानश्च।

जपसंख्याभेदेन फलभेदरूपः काम्यजपोऽप्युक्तः। तथा हि सूक्ष्मागमे पारमेश्वरागमे चोक्तप्रकारेण रोगाणां निवारणाय द्विसहस्रं जपं कुर्यात्; आयुष्यवृद्ध्यर्थं त्रिसहस्रम्, उत्तरोत्तरवृद्ध्यर्थं नित्यं सहस्रशो जपं कुर्यात्। आज्यान्वितैस्तिलैर्लक्षजपपूर्वकं होमे कृते उत्पातजनितक्लेशानां निवारणं भवति। शतलक्षजपेन साधकः साक्षात् शिव एव भवति[4]। एवं रोगनिवारणादिफलेच्छव उक्तरीत्या मन्त्रजपं विधाय स्वेष्टफलं प्राप्तुं शक्नुवन्ति। सकामजपैरैहिकफलम्, अकामजपैरामुष्मिकफलमित्यकामजपः श्रेयान्।

न्यासविधिः

पञ्चाक्षरमन्त्रन्यासः किमर्थं करणीय इति चेत्, चन्द्रज्ञानागमे उत्तरं दत्तम्। तत्रोक्तदिशा निवृत्तिः, प्रतिष्ठा, शान्तिः, शान्त्यतीता चेति पञ्चकलाः पृथिव्यप्तेजोवाय्वा-

---

१. पारमेश्वरागमः, ११.८९-९०।
२. चन्द्रज्ञानागमः, ८.६४; पारमेश्वरागमः, ११.९२– 'पञ्चविधेष्वेव' इत्यत्र 'पञ्चविधेष्वेक' इति पाठान्तरम्।
३. चन्द्रज्ञानागमः, ८.६०,६४; पारमेश्वरागमः, ११.८८,९२।
४. पारमेश्वरागमः, ११.१०५-१०८।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

काशरूपपञ्चभूतात्मिका भवन्ति। तासां चिह्नैः पञ्चभूताधिपतिभिश्च सह हृदय-कण्ठ-तालु-भ्रूमध्य-ब्रह्मरन्ध्रेषु तासां कलानां पञ्चभूतात्मकदेहस्य च शोधनार्थं पञ्चाक्षरमन्त्रं (तदीयान्यक्षराणीति यावत्) न्यसेत[1]। एवं स्वदेहं संशोध्य विद्यामयं कर्तुं न्यासविधिर्विहितः। देहस्य विद्यामयीकरणप्रक्रिया तावच्चन्द्रज्ञानागमे सम्यग्वर्णिता—

प्राणवायुं निरुद्ध्याथ गुणसंख्यानुसारतः।
भूतग्रन्थिं ततश्छिन्द्यादस्त्रेणैवास्त्रमुद्रया।।
नाड्या सुषुम्नयात्मानं प्रेरितं प्राणवायुना।
निर्गतं ब्रह्मरन्ध्रेण योजयेच्छिवतेजसा।।
वायुना च विशोष्यैव देहं कालाग्निना दहेत्।।
अमृतप्लावनं कृत्वा भस्मीभूतस्य तस्य वै।
ततो विद्यामयं देहं सम्भूतमिति भावयेत्।।
ततो विद्यामये तस्मिन् देहे दीपशिखाकृतिम्।
शिवान्निर्गतमात्मानं ब्रह्मरन्ध्रेण योजयेत्।।
अन्तर्देहं प्रविष्टं तं ध्यात्वा हृदयपङ्कजे।
पुनश्चामृतवर्षेण सिञ्चेद् विद्यामयं वपुः[2]।। इति।

प्राणायामेन प्राणवायुं निरुद्ध्य गुणसंख्यानुसारमस्त्रमन्त्रं जपन् अस्त्रमुद्रां प्रदर्श्य भूतग्रन्थीन् छिन्द्यात्। प्राणवायुद्वारा प्रेरितं सुषुम्नानाड्या ब्रह्मरन्ध्रान्निर्गतं चात्मानं शिवतेजसा योजयेत्। वायुना स्वकीयं पापमयं शरीरं विशोष्य कालाग्निना तस्य दहनं भावयेत्। भस्मीभूतमिति भावितं तच्छरीरममृतेनाऽऽप्यायितं कृत्वा तदेव नवीनं विद्यामयं शरीरं सञ्जातमिति भावयेत्। तस्मिन् विद्यामये शरीरे दीपशिखाकृतिं स्वकीयमात्मानं शिवतेजसाऽऽप्लाव्य पुनर्ब्रह्मरन्ध्रद्वारा स्वशरीरे संयोजयेत्। एवमन्तर्देहप्रविष्टं विद्यामयं शिवतेजसं स्वकीये हृदयकमले ध्यात्वा पुनस्तद् विद्यामयं शरीरममृतवर्षेणाऽऽप्यायितं कुर्यात्। एवं स्वकीयं शरीरं विद्यामयं कृत्वा पुनर्मन्त्रन्यासं कुर्यादिति नियमः।

करन्यासः, देहन्यासः, अङ्गन्यासश्चेति न्यासत्रैविध्यं प्रसिद्धम्। तत्र चन्द्रज्ञानागमे करन्यासस्य स्थित्युत्पत्तिलयाख्यं त्रैविध्यमुक्तम्। स्थितिकरन्यासो गृहस्थानां सुवासिनीनां च, उत्पत्तिकरन्यासो (सृष्टिन्यासो) ब्रह्मचारिणां कन्यानां च, लयकरन्यासो (संहारन्यासो) वानप्रस्थानां संन्यासिनां विधवानां चेष्यन्ते[3]। एतेषां न्यासानां क्रमस्तत्रैवोक्तः—

---

१. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ११.२५-२६।
२. तत्रैव, ११.२७-३१।
३. तत्रैव, ११.२१-२२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अङ्गुष्ठादिकनिष्ठान्तं स्थितिन्यास इति स्मृतः ।
दक्षिणाङ्गुष्ठमारभ्य वामाङ्गुष्ठान्तमेव च ।।
उत्पत्तिन्यास आख्यातो विपरीतस्तु संहृतिः[१] ।। इति ।

अङ्गुष्ठादिकनिष्ठान्तं स्थितिन्यासः, दक्षिणाङ्गुष्ठादिवामाङ्गुष्ठान्तं सृष्टिन्यासः, विपरीतं च (अर्थाद् वामाङ्गुष्ठादिदक्षिणाङ्गुष्ठान्तं च) संहारन्यास इति हि तेषां लक्षणम् । 'न-म-शि-वा-य' इति पञ्चाक्षराणि सबिन्दुकान्यङ्गुष्ठादारभ्य कनिष्ठिकापर्यन्तमङ्गुलीषु न्यस्येत्, करतलकरपृष्ठे च शिवं न्यस्येत् । अनन्तरं दशदिक्षु अस्त्रमन्त्रं पठन् अस्त्रन्यासः करणीयः[२] । पूर्वोक्तरीत्या शरीरस्य विद्यामयीकरणानन्तरं करशुद्धिपूर्वकं करन्यासो देहन्यासोऽङ्गन्यासश्च करणीय इत्युक्तम्[३] ।

सूक्ष्मागमे तु करन्यासः, अङ्गन्यासः (देहन्यासः), षडङ्गन्यास(अङ्गन्यास)श्चेति न्यासत्रयं भिन्नरीत्या निरूपितम् । तत्र नकारादीन् बिन्दुयुक्तान् चतुर्थ्यन्तैः पञ्चब्रह्मनामभिः सह कनिष्ठाद्यङ्गुलीषु न्यस्यते चेत्, स करन्यासः । तान् तैरेव सह मुखे, हृदये, पादद्वये, गुह्ये, शिरसि च न्यस्यते चेत्, स देहन्यासः । ओङ्कारस्य नकारादीनां च बिन्दुयुक्तानामनन्त-सर्वज्ञ-नित्यतृप्ति-अनादिबोध-स्वतन्त्र-अलुप्तशक्तिधामभिश्चतुर्थ्यन्तैः सह, हृदय-शिरः-शिखा-कवच-नेत्रत्रय-अस्त्राणां चतुर्थ्यन्तानां पल्लवैश्च सह न्यासः षडङ्गन्यासः[४] । एतेषां न्यासानां क्रमो वैशद्यार्थमधस्ताद् दत्तः—

करन्यासः— नं सद्योजाताय कनिष्ठिकाभ्यां नमः, मं वामदेवाय अनामिकाभ्यां नमः, शिं अघोराय मध्यमाभ्यां नमः, वां तत्पुरुषाय तर्जनीभ्यां नमः, यं ईशानाय अङ्गुष्ठाभ्यां नमः ।। **अङ्गन्यासः (देहन्यासः)**— नं सद्योजातायं नमो मुखे, मं वामदेवाय नमो हृदये, शिं अघोराय नमः पादद्वये, वां तत्पुरुषाय नमो गुह्ये, यं ईशानाय नमः शिरसि ।। **षडङ्गन्यासः (अङ्गन्यासः)**— ओं अनन्तशक्तिधाम्ने हृदयाय नमः, नं सर्वज्ञशक्तिधाम्ने शिरसे स्वाहा, मं नित्यतृप्तिशक्तिधाम्ने शिखायै वषट्, शिं अनादिबोधशक्तिधाम्ने कवचाय हुम्, वां स्वतन्त्रशक्तिधाम्ने नेत्रत्रयाय वौषट्, यं अलुप्तशक्तिधाम्ने अस्त्राय फट् । (भूर्भुवस्स्वरोमिति दिग्बन्धः) ।

पारमेश्वरागमोक्तप्रकारेण 'न-म-शि-वा-य' इति मन्त्रवर्णान् सबिन्दुकान् चतुर्थ्यन्तैस्तत्पुरुषाघोरसद्योजातवामदेवेशानैः सह तर्जनीमध्यमाकनिष्ठिकानामिकाङ्गुष्ठेषु

---

१. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ११.२३ ।
२. तत्रैव, ११.२४ ।
३. तत्रैव, ११.३२ ।
४. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.३१-३३ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न्यस्येत्। अयं करन्यासः। तानेव तैरेव सह मुखहृदयपादगुह्यशिरःसु न्यासं कुर्यात्। अयं चाङ्गन्यासः[1]। अनयोः क्रमो वैशद्यार्थमत्र दत्तः– करन्यासः– ओं नं तत्पुरुषाय तर्जनीभ्यां नमः, ओं मं अघोराय मध्यमाभ्यां नमः, ओं शिं सद्योजाताय कनिष्ठिकाभ्यां नमः, ओं वां वामदेवाय अनामिकाभ्यां नमः, ओं यं ईशानाय अङ्गुष्ठाभ्यां नमः ॥

अङ्गन्यासः (देहन्यासः)– ओं नं तत्पुरुषाय नमो मुखे, ओं मं अघोराय नमः हृदये, ओं शिं सद्योजाताय नमः पादयोः, ओं वां वामदेवाय नमः गुह्ये, ओं यं ईशानाय नमः शिरसि ॥

एवं शैवागमेषु विभिन्नक्रमेण करन्यासः, अङ्गन्यासः (देहन्यासः), षडङ्गन्यास-(अङ्गन्यासः)श्चेति न्यासत्रयं निरूपितम्। केवलं चन्द्रज्ञानागमे करन्यासविषये सृष्टिस्थितिसंहारन्यासक्रमा उक्ताः। वर्णन्यासः, मातृकान्यासः, मातृकाक्षरन्यासः, ब्रह्मन्यासः, प्रणवन्यासः, पञ्चाक्षरन्यासः, गोलकन्यासश्चेति न्यासान्तराण्युक्तानि[2]। तत्र वर्णन्यासः, मातृकान्यासः, मातृकाक्षरन्यासश्चेति न्यासा अभिन्नाः। ब्रह्मन्यासः पञ्चब्रह्मन्यास एव। पञ्चाक्षरन्यासः पश्चात् प्रदर्श्यते। हृदि, वक्त्रे, अंसयोः, ऊर्वोः, कण्ठे, नाभौ, पार्श्वद्वये, पृष्ठे, हृदि, मूर्ध्नि, वदने, नेत्रयोः, दोषोः, सन्धिषु, मणिबन्धयोश्च षडक्षरविद्याया न्यासो गोलकन्यास इत्युच्यते[3]।

सृष्ट्यादिक्रमेण करन्यासादीनां परिष्कृतं स्वरूपमत्र दीयते—

मूलपञ्चाक्षरमन्त्रन्यासाः

ओं नमः शिवाय इत्यस्य श्रीमूलपञ्चाक्षरीमहामन्त्रस्य वामदेव ऋषिः (शिरसि), पङ्क्तिश्छन्दः, (मुखे), श्रीसदाशिवो देवता (हृदये), ओं बीजम् (नाभौ), उमा शक्तिः (गुह्ये), शिव इति कीलकम् (पादयोः), श्रीसदाशिवप्रीत्यर्थे जपे विनियोगः।

सृष्टिन्यासक्रमः

करन्यासः

ओं यं ओं सर्वज्ञशक्तिधाम्ने अङ्गुष्ठाभ्यां नमः।
ओं वां ओं नित्यतृप्तिशक्तिधाम्ने तर्जनीभ्यां नमः।
ओं शिं ओं अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः।
ओं मं ओं स्वतन्त्रशक्तिधाम्ने अनामिकाभ्यां नमः।

---

१. पारमेश्वरागमः, ११.४६-४८
१. चन्द्रज्ञानागमः, उत्तरभागः क्रियापादः, ११.३३, ३५-३७।
३. पारमेश्वरागमः, ११.५०-५१

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं नं ओं अलुप्तशक्तिधाम्ने कनिष्ठिकाभ्यां नमः ।
ओं ओं ओं अनन्तशक्तिधाम्ने करतलकरपृष्ठाभ्यां नमः ।

देहन्यासः

ओं यं ओं ईशानाय नमः शिरसि ।
ओं वां ओं तत्पुरुषाय नमो मुखे ।
ओं शिं ओं अघोराय नमो हृदये ।
ओं मं ओं वामदेवाय नमो गुह्ये ।
ओं नं ओं सद्योजाताय नमः पादद्वये ।
ओं ओं ओं प्रणवाय नमः सर्वाङ्गे ।

अङ्गन्यासः

ओं यं ओं सर्वज्ञशक्तिधाम्ने हृदयाय नमः ।
ओं वां ओं नित्यतृप्तिशक्तिधाम्ने शिरसे स्वाहा ।
ओं शिं ओं अनादिबोधशक्तिधाम्ने शिखायै वषट् ।
ओं मं ओं स्वतन्त्रशक्तिधाम्ने कवचाय हुँ ।
ओं नं ओं अलुप्तशक्तिधाम्ने नेत्रत्रयाय वौषट् ।
ओं ओं ओं अनन्तशक्तिधाम्ने अस्त्राय फट् ।
भूर्भुवस्स्वरोमिति दिग्बन्धः ।

स्थितिन्यासक्रमः

करन्यासः

ओं शिं ओं अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः ।
ओं वां ओं नित्यतृप्तिशक्तिधाम्ने तर्जनीभ्यां नमः ।
ओं यं ओं सर्वज्ञशक्तिधाम्ने अङ्गुष्ठाभ्यां नमः ।
ओं नं ओं अलुप्तशक्तिधाम्ने कनिष्ठिकाभ्यां नमः ।
ओं मं ओं स्वतन्त्रशक्तिधाम्ने अनामिकाभ्यां नमः ।
ओं ओं ओं अनन्तशक्तिधाम्ने करतलकरपृष्ठाभ्यां नमः ।

देहन्यासः

ओं शिं ओं अघोराय नमो हृदये ।
ओं वां ओं वामदेवाय नमो गुह्ये ।
ओं यं ओं सद्योजाताय नमः पादद्वये ।
ओं नं ओं ईशानाय नमः शिरसि ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं मं ओं तत्पुरुषाय नमो मुखे।
ओं ओं ओं प्रणवाय नमः सर्वाङ्गे।

अङ्गन्यासः

ओं शिं ओं अनादिबोधशक्तिधाम्ने कवचाय हुँ।
ओं वां ओं नित्यतृप्तिशक्तिधाम्ने नेत्रत्रयाय वौषट्।
ओं यं ओं सर्वज्ञशक्तिधाम्ने अस्त्राय फट्।
ओं नं ओं अलुप्तशक्तिधाम्ने हृदयाय नमः।
ओं मं ओं स्वतन्त्रशक्तिधाम्ने शिरसे स्वाहा।
ओं ओं ओं अनन्तशक्तिधाम्ने शिखायै वषट्।
भूर्भुवस्स्वरोमिति दिग्बन्धः।

संहारन्यासक्रमः

करन्यासः

ओं नं ओं अलुप्तशक्तिधाम्ने कनिष्ठिकाभ्यां नमः।
ओं मं ओं स्वतन्त्रशक्तिधाम्ने अनामिकाभ्यां नमः।
ओं शिं ओं अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः।
ओं वां ओं नित्यतृप्तिशक्तिधाम्ने तर्जनीभ्यां नमः।
ओं यं ओं सर्वज्ञशक्तिधाम्ने अङ्गुष्ठाभ्यां नमः।
ओं ओं ओं अनन्तशक्तिधाम्ने करतलकरपृष्ठाभ्यां नमः।

देहन्यासः

ओं नं ओं सद्योजाताय नमः पादद्वये।
ओं मं ओं वामदेवाय नमो गुह्ये।
ओं शिं ओं अघोराय नमो हृदये।
ओं वां ओं तत्पुरुषाय नमो मुखे।
ओं यं ओं ईशानाय नमः शिरसि।
ओं ओं ओं प्रणवाय नमः सर्वाङ्गे।

अङ्गन्यासः

ओं नं ओं अलुप्तशक्तिधाम्ने अस्त्राय फट्।
ओं मं ओं स्वतन्त्रशक्तिधाम्ने नेत्रत्रयाय वौषट्।
ओं शिं ओं अनादिबोधशक्तिधाम्ने कवचाय हुँ।
ओं वां ओं नित्यतृप्तिशक्तिधाम्ने शिखायै वषट्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ओं यं ओं सर्वज्ञशक्तिधाम्ने शिरसे स्वाहा।
ओं ओं ओं अनन्तशक्तिधाम्ने हृदयाय नमः।
भूर्भुवस्स्वरोमिति दिग्बन्धः।

जपे अक्षमालिकाप्रयोगः

अङ्गुलीभिरङ्गुलिरेखाभिरक्षमालया वा जपः कर्तव्यः। तत्राऽक्षमालिकाविषये अक्षमालिकोपनिषदि प्रवाल-मौक्तिक-स्फटिक-शङ्खरजताष्टापद-चन्दन-पुत्रजीविकाब्जरुद्राक्षै-रक्षमालिका रचनीयाः। तेषां योजने सौवर्णं राजतं ताम्रं वा सूत्रं प्रयुज्यते[१]। तत्राऽक्षमालिकायां शिरोमणिना सह चतुरधिकपञ्चाशदक्षा भूयासुः, द्विरावर्तनेनाऽष्टोत्तरशतवारं जपस्य कर्तव्यतयोक्तत्वात्[२]। तामक्षमालिकां पञ्चगव्यैः पञ्चामृतैश्च शोधयित्वा पञ्चगव्यैर्गन्धोदकेन च संस्नाप्याऽष्टभिर्गन्धैरालिप्य सुमनःस्थले निवेश्याऽक्षतपुष्पैः सम्पूज्य प्रत्यक्षं मन्त्रपूर्वकमादिक्षान्तैर्वर्णैर्भावयेत्[३]।

सूक्ष्मागमे तावद् अभङ्गुरा दृढाः स्निग्धा नवा दृष्टिप्रियाः शुभाः श्रेष्ठा रुद्राक्षा जपमालायां योजनीया इत्युक्तम्। रुद्राक्षस्योन्नतभागो वक्त्रं निम्नभागश्च पृष्ठमित्युच्येते। त्रिवृता पट्टसूत्रेण कार्पाससूत्रेण वा वक्त्रं वक्त्रेण पृष्ठं पृष्ठेन इत्येवं क्रमेण रुद्राक्षा योजनीयाः। मालिकाया मूलभागे स्थूलमणयोऽग्रे सूक्ष्ममणयश्च भवेयुः। मणीनां परस्पर-घर्षणं मा भूदिति मणीनामन्तरे वर्तनद्वय्यो ग्रन्थयो बध्नीयात्। मालाग्रद्वयं परिवृत्य मेर्वाख्यं शिरोमणिं योजयेत्। जपसमये मेरोरुल्लङ्घनं यथा न भवति तथा सावधानैर्भवितव्यम्[४]।

तत्रैवाऽक्षमालिकायाः संस्कार उक्तः। तदनुसारेणाक्षमालिकां पञ्चामृतैः पञ्चगव्यैश्चाभिषिच्य गुरुः संस्कुर्यात्। गुरुर्मन्त्रमष्टोत्तरशतवारं जप्त्वा तां जपमालिकां वर्णात्मकत्वेन ध्यात्वा शिष्याय दद्यात्। तया शिष्यो नित्यं जपेत्[५]। तामक्षमालिकामशुचिस्थले न क्षिपेत्, वामपाणिना न स्पृशेत्, दीक्षाहीनस्य न दर्शयेत्। जपकाले जप्त्वा तां कुत्रापि गोपयेत्। प्रमादात् नियमभङ्गे जाते पुनर्गुरुणाऽक्षमालिकासंस्कारं कारयेत्[६]।

चन्द्रज्ञानागमेऽङ्गुल्यादिभिर्जपसंख्यानमनुलक्ष्य फलभेदो निरूपितः। तदनुसारेण अङ्गुल्या जपसंख्याने कृते एकजपेनैकं फलम्, अङ्गुलिरेखाभिः कृतेऽष्टगुणम्, पुत्रजीवमालया

---

१. अक्षमालिकोपनिषत्, २।
२. तत्रैव, १४।
३. तत्रैव, ४।
४. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.६२-६८।
५. तत्रैव, ३.६९-७०।
६. तत्रैव, ३.७२-७३।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कृते दशगुणम्, शङ्खमणिमालया कृते शतगुणम्, प्रवालमालया कृते सहस्रगुणम्, स्फटिकमणिमालया कृते लक्षगुणम्, पद्माक्षमालया रुद्राक्षमालया वा कृतेऽनन्तं च फलम्[१]। अक्षसंख्यावशादक्षमालया कृतस्य जपस्य फलभेदोऽप्युक्तः। तथा हि– जपकर्मणि त्रिंशदक्षैः कृता माला धनदा, सप्तविंशत्यक्षैः कृता पुष्टिप्रदा, पञ्चविंशत्यक्षैः कृता मुक्तिप्रदा, पञ्चदशाक्षैः कृताऽभिचारफलप्रदा चेत्यक्षसंख्यानुगुणेन जपस्य फलम्[२]। एवमेवाङ्गुलिजपविषयेऽङ्गुलिभेदेन फलभेदो विद्यते। तथा हि– अङ्गुष्ठेन जपे कृते मोक्षप्राप्तिः, तर्जन्या कृते शत्रुनाशनम्, मध्यमया कृते धनप्राप्तिः, अनामिकया कृते शान्तिलाभः, कनिष्ठिकया कृते आकर्षणं चेति। तर्जन्यादिभिश्चतसृभिरङ्गुलीभिः क्रियमाणे जपे तु अङ्गुष्ठस्य सहयोग आवश्यकः। अङ्गुष्ठेन विना कृतो जपः फलहीनो भवति[३]। गृहादिस्थानभेदेनापि, जपस्य फलभेदो निरूपितः। तथा हि– गृहे एकजपेनैकं फलम्, गोष्ठे शतगुणम्, पुण्यारण्ये आरामे वा सहस्रगुणम्, पर्वते दशसहस्रगुणम्, नद्यां लक्षगुणम्, देवालये कोटिगुणम्, शिवसन्निधौ चानन्तगुणं फलमुक्तम्[४]। इदमप्यत्र ज्ञेयम्–

सूर्यस्याग्नेर्गुरोरिन्दोर्दीपस्य च जलस्य च।
विप्राणां च गवां चैव सन्निधौ शस्यते जपः[५]॥ इति।

कस्मै मन्त्रो दातव्यः कस्मै च न

कस्मै पञ्चाक्षरः षडक्षरो वा मन्त्रो दातव्यः ? अर्थात् कोऽस्य मन्त्रस्याऽधिकारी ? इति पृष्टे उच्यते। सूक्ष्मागमोक्तदिशा मुक्त्यभिलाषी दृढव्रतः शिष्टो लिङ्गनिष्ठारतो विद्याहङ्कारनिर्मुक्तः सदाचाररत आस्तिको विशेषभक्तियुक्तः शान्तो गुरुवचनरतः शिवभक्तः सुशीलो धर्मिष्ठः सत्यव्रतपरायणो वेदमार्गनिरतः शिवैकशरणः शिवाराधनतत्परोऽस्य मन्त्रस्याऽधिकारी[६]। इयमत्रोक्तिः सारवती–

येषु येषु महादेवि भक्तिरव्यभिचारिणी।
योग्यास्त एव मन्त्रस्य भक्तिरेवात्र कारणम्[७]॥

---

१. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.६५-६७।
२. तत्रैव, ८.६८-६९।
३. तत्रैव, ८.७०-७२।
४. तत्रैव, ८.७२-७.३।
५. तत्रैव, ८.७५।
६. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.९०;४.६६-६७।
७. तत्रैव, ३.२९।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

येषु येष्वव्यभिचारिणी भक्तिर्विद्यते, तेऽस्य मन्त्रस्याधिकारिणः । एवं भक्तिरेवात्र कारणम् ।

कस्मै मन्त्रो न दातव्य इत्यस्मिन् विषये– नास्तिकाय कृतघ्नाय भक्तिहीनाय शिवाचारविरोधिने दम्भिकाय विषयग्रस्तचेतसे चञ्चलाय व्रतभ्रष्टाय देवान्तरपराय पञ्चाक्षरः षडक्षरो वा मन्त्रो न दातव्य इति सूक्ष्मागमशासनम्[१] ।

मन्त्रोपदेशे नियमः

शैवागमेषु द्विजेभ्यः षडक्षरमन्त्रः स्त्रीशूद्रेभ्यश्च प्रणवं विना पञ्चाक्षरमन्त्र उपदेष्टव्य इति नियम उक्तः । तथा हि सूक्ष्मागमे— "प्रणवेन विना दद्यात् स्त्रीशूद्राणामिमं मनुम्"[२] इत्युक्तम् । द्विजैरेव प्रणवयुक्तः षडक्षरमन्त्रो जप्तव्यः, स्त्रीभिः शूद्रैश्च प्रणवं विना पञ्चाक्षर एव । तत्र पञ्चाक्षरो नमोऽन्त एव स्यादिति नियमः । तथा चोक्तम्–

द्विजैरियं तु जप्तव्या नित्यं प्रणवपूर्विका ।
स्त्रीभिः शूद्रैश्च जप्तव्या नमोऽन्ता प्रणवं विना[३] ।। इति ।

द्विज एव तारेऽधिकारयुक्तः । अतः स सतारं षडक्षरमन्त्रं जपेत् । योऽस्याऽनधिकारी स तं न जपेत् । जपेत् चेत् स अधोगतिं गच्छति । तदुक्तम्–

तारेऽधिकारयुक्तस्तु तारयुक्तं मनुं जपेत् ।
जपन्नधिकारी तु तारं गच्छत्यधोगतिम्[४] ।। इति ।

तारयुक्तः षडक्षरमन्त्रो लिङ्गस्वरूपः । पञ्चाक्षरमन्त्रः परमं ज्ञानम् । स चाऽधिकारयुक्तानां सतारो मन्त्रो भवति । अधिकारयुक्तैरेव स जप्यो भवति । तथा चोक्तम्–

पञ्चाक्षरी महाविद्या सतारा लिङ्गरूपिणी ।
अधिकारयुजां तारे ध्येया सा मन्त्ररूपिणी[५] ।। इति ।

अधिकारयुक्तानां षडक्षरमन्त्र ओङ्कारवदनं वा-य-कारभुजद्वयवत् शिकारमध्यदेहं नमःकारपदद्वयवच्च लिङ्गस्वरूपं धत्ते[६] । तदेव चित्ररूपेण दत्तमधस्तात्–

---

१. सूक्ष्मागमः, उत्तरभागः, क्रियापादः, ३.८९; ४.६३-६४ ।
२. तत्रैव, ३.२१ ।
३. चन्द्रज्ञानागमः, उत्तरभागः, क्रियापादः, ८.१० ।
४. तत्रैव, ११.४५ ।
५. तत्रैव, ११.४० ।
६. तत्रैव, ११.४२ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अनधिकारवतां तारे पञ्चाक्षरमन्त्रः शिकारवदनं वायकारभुजद्वयवत् विसर्गदेहमध्यं नमकारपादद्वयवच्च लिङ्गस्वरूपं धत्ते।[१] तदेव चित्ररूपेण पुनर्दत्तमधस्तात्–



उपसंहारः

एवं शैवागमोत्तरभागोक्तप्रकारेण पञ्चाक्षर-षडक्षरोभयात्मकस्य शिवमन्त्रस्य स्वरूपं महत्त्वं तत्सम्बद्धांश्चान्यविषयान् अधिकृत्य विस्तृतमीमांसा कृता। सर्वस्यास्य विषयस्य प्रभावो वीरशैवसिद्धान्तग्रन्थेषु दरीदृश्यते। तत्र शैवागमोत्तरभागानां सारसङ्ग्रहभूते श्रीसिद्धान्तशिखामणौ तत्प्रभावोऽधिकतया दृश्यते। अतः पूर्वोक्तविषयांशान् सङ्ग्रहेणोक्त्वा श्रीसिद्धान्तशिखामणौ मन्त्रविषये यो विचारो निरूपितः, स एवात्र तुलनात्मकतया प्रस्तूयते। तथा हि–

१. पञ्चाक्षरः षडक्षर इत्युभयात्मकमन्त्रः कृष्णयजुर्वेदीयरुद्राध्यायस्याऽष्टमानुवाकादुद्धृतः। तत्र 'नमः शिवाय' इति नमःशब्दस्य पूर्वत्वं शिवायेति चतुर्थ्यन्तशब्दस्योत्तरत्वं चेति मन्त्रस्य क्रमो दृश्यते। स एव क्रमः शैवागमेषु विहितः। स एव क्रमः श्रीसिद्धान्तशिखामणौ विधीयते। तथा चोक्तम्—

---

१. चन्द्रज्ञानागमः, उत्तरभागः क्रियापादः, ११.४२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नमःशब्दं वदेत् पूर्वं शिवायेति ततः परम्।
मन्त्रः पञ्चाक्षरो ह्येष सर्वश्रुतिशिरोगतः[१] ।। इति।

ओङ्कारपूर्वः पञ्चाक्षरमन्त्र एव षडक्षर इति शैवागमेषु कथ्यते। तथैव श्रीसिद्धान्तशिखामणावप्युक्तम्—

ओङ्कारपूर्वो मन्त्रोऽयं पञ्चाक्षरमयः परः।
शैवागमेषु वेदेषु षडक्षर इति स्मृतः[२] ।। इति।

२. मूलं, विद्या, शिवः, शैवं सूत्रम्, पञ्चाक्षरश्चेति नामान्यस्य मन्त्रस्येति शैवागमेषूक्तम्। तथैव श्रीसिद्धान्तशिखामणावुक्तम्—

मूलं विद्या शिवः शैवं सूत्रं पञ्चाक्षरस्तथा।
एतानि नामधेयानि कीर्तितानि महामनोः[३] ।। इति।

३. शैवागमेषु मन्त्रस्य ऋषिश्छन्दो देवता बीजं शक्तिः कीलकं विनियोगश्चोच्यन्ते। शैवागमेषु पुनर्मन्त्राङ्गानि प्रत्यक्षरं च षोडशरूपाणि षड्रूपाणि त्रिरूपाणि चेति वैविध्येन रूपाणि निरूपितानि। श्रीसिद्धान्तशिखामणौ तु तेषां प्रपञ्चो न दृश्यते।

४. शैवागमेषु पञ्चाक्षरमन्त्रस्य महत्त्वं बहुधा निरूपितम्। पञ्चतन्मात्राणि, पञ्चभूतानि, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चब्रह्माणि, परमात्मनः पञ्चकृत्यानि चेति सर्वाणि पञ्चात्मकानि पञ्चाक्षरमन्त्रस्य पञ्चाक्षरैर्बोध्यानीति निरूपितम्। श्रीसिद्धान्तशिखामणावपि तथैवोक्तम्—

पञ्चभूतानि सर्वाणि पञ्चतन्मात्रकाणि च।
ज्ञानेन्द्रियाणि पञ्चापि पञ्चकर्मेन्द्रियाणि च।।
पञ्चब्रह्माणि पञ्चापि कृत्यानि सह कारणैः।
बोध्यानि पञ्चभिर्वर्णैः पञ्चाक्षरमहामनोः।।
पञ्चधा पञ्चधा यानि प्रसिद्धानि विशेषतः।
तानि सर्वाणि वस्तूनि पञ्चाक्षरमयानि हि[४] ।। इति।

५. शैवागमोक्तदिशा षडक्षरात्मके मन्त्रे ओङ्कारः परशिवस्य शरीरम्, पञ्चाक्षरैस्तस्य

---

१. श्रीसिद्धान्तशिखामणिः, ८.७।
२. तत्रैव, ८.२७।
३. तत्रैव, ८.२३।
४. तत्रैव, ८.२४-२६।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चब्रह्मतनुत्वं च भवति। तत्र शिवस्योङ्कारशरीरत्वं नाम निष्कलस्वरूपत्वम्, पञ्चब्रह्मतनुत्वं नाम तस्य सकलस्वरूपत्वमित्युक्तं स्यात्। श्रीसिद्धान्तशिखामणावयं भावः स्पष्टं निरूपितः। तथा हि—

प्रणवेनैव मन्त्रेण बोध्यते निष्कलः शिवः।
पञ्चाक्षरेण मन्त्रेण पञ्चब्रह्मतनुस्तथा॥
निष्कलः संविदाकारः सकलो विश्वमूर्तितः।
उभयात्मा शिवो मन्त्रे षडक्षरमये स्थितः[1]॥ इति।

६. पञ्चाक्षरषडक्षरोभयात्मकस्यास्य मन्त्रस्य शिवस्य च सम्बन्धो वाच्यवाचकस्वरूप इत्युक्तं शैवागमेषु। सूक्ष्मेऽस्मिन् मन्त्रे पञ्चब्रह्मशरीरः शिवः साक्षाद् वाच्यवाचकभावेन स्थित इत्युक्तम्। अयमेव मन्त्रशिवयोर्वाच्यवाचकसम्बन्धः श्रीसिद्धान्तशिखामणावपि सम्यक् प्रतिपादितः—

अशेषजगतां हेतुः परमात्मा महेश्वरः।
तस्य वाचकमन्त्रोऽयं सर्वमन्त्रैककारणम्॥
तस्याभिधानमन्त्रोऽयमभिधेयश्च स स्मृतः।
अभिधानाभिधेयत्वान्मन्त्रात् सिद्धः परः शिवः[2]॥ इति।

७. शैवागमेषु पुरश्चरणविधिर्मन्त्रजपविधिश्च सम्यगुक्तौ। तत्र प्राङ्मुखो वोदङ्मुखो वा पद्मासनस्थः समकायशिरोग्रीवः सन् शिवध्यानपूर्वकं जपं कुर्यादित्युक्तम्। सगर्भजपे प्राणायामो विहितः। श्रीसिद्धान्तशिखामणौ पुरश्चरणविधिमनुक्त्वैव जपविधिर्निरूपितः। तथा हि—

प्राणायामत्रयं कृत्वा प्राङ्मुखोदङ्मुखोऽपि वा।
चिन्तयन् हृदयाम्भोजे देवदेवं त्रिलोचनम्॥
सर्वालङ्कारसंयुक्तं साम्बं चन्द्रार्धशेखरम्।
जपेदेतां महाविद्यां शिवरूपामनन्यधीः[3]॥ इति।

८. शैवागमेषु वाचिकोपांशुमानसभेदेन जपस्य त्रैविध्यमुक्त्वा, एकैकस्य जपप्रकारस्य लक्षणं सम्यगुक्तम्। तत्र वाचिकापेक्षयोपांशोः शतगुणत्वम्, उपांशुपेक्षया मानसस्य

---

१. श्रीसिद्धान्तशिखामणिः, ८.२१-२२।
२. तत्रैव, ८.५-६।
३. तत्रैव, ८.२५-२६।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सहस्रगुणत्वं चोक्त्वा ततोऽपि सगर्भजपस्य पुनस्ततोऽपि सध्यानजपस्य च श्रेष्ठत्वं प्रतिपादितम्। श्रीसिद्धान्तशिखामणावपि जपत्रैविध्यं सलक्षणमुक्त्वा तारतम्यं च शैवागमोक्तदिशैव प्रदर्शितम्। तत्र सगर्भसध्यानजपयोरुल्लेखो नास्ति[१]।

९. शैवागमोक्तदिशा सर्वास्ववस्थासु पञ्चाक्षरमन्त्रः सिद्ध्यति। अन्ये मन्त्राः सर्वे तत्क्रियाश्चाऽऽयासबहुलाः, पञ्चाक्षरमन्त्रस्तु विनाऽऽयासेन फलप्रदः। एवमेव श्रीसिद्धान्तशिखामणावुक्तम्—

अशुद्धो वा विशुद्धो वा सकृत्पञ्चाक्षरेण यः।
पूजयेत्पतितो वापि मुच्यते नाऽत्र संशयः॥
अन्येऽपि बहवो मन्त्रा विद्यन्ते सकलागमे।
भूयो भूयः समभ्यासात् पुरुषार्थप्रदायकाः॥
एष मन्त्रो महाशक्तिरीश्वरप्रतिपादकः।
सकृदुच्चरणादेव सर्वसिद्धिप्रदायकः[२]॥ इति।

१०. शैवागमोक्तदिशा द्विजेभ्य एव षडक्षरमन्त्र उपदेष्टव्यः, स्त्रीशूद्रेभ्यश्च प्रणवं विना पञ्चाक्षरमन्त्र उपदेष्टव्य इति नियमोऽस्ति। परन्तु श्रीसिद्धान्तशिखामणौ तादृशनियमो नास्ति। चन्द्रज्ञानागमे स्त्रीशूद्रेभ्यो नमोऽन्तः पञ्चाक्षरमन्त्र उपदेष्टव्य इत्युक्तम्। तत्र क्रमभङ्गेन तस्य मन्त्रत्वमेव कथमिति सन्देहः। केवलं पञ्चाक्षरमन्त्र एव उपदेष्टव्य इत्येव साधीयान् पन्थाः। इति शम्।

•

१. श्रीसिद्धान्तशिखामणिः, ८.२७-३२
२. तत्रैव, ८.३८, ४०-४२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वीरशैवानां कर्मज्ञानसमुच्चयः

को. रं. बसवराजुः

नमस्ते सच्चिदानन्दविज्ञानघनमूर्तये ।
अनावृताय भो शम्भो गुरवे बुद्धिरूपिणे ।।

उपनिषन्मन्त्राणां भेदे तात्पर्यमिति द्वैतवादिनः, अभेदे इत्यद्वैतवादिनः, भेदाभेद इति विशिष्टाद्वैतवादिनश्च वदन्ति। एवं केचित् ज्ञानप्रधानमिति, अन्ये कर्मप्रधानमिति, अपरे तु उभयप्रधानमिति प्रतिपादयन्ति।

"ज्ञानादेव तु कैवल्यम्" इत्यद्वैतसिद्धान्तिनः। इदमत्राकूतम्—यथा रज्ज्वज्ञानकल्पिता सर्पभ्रान्ती रज्जोर्यथार्थज्ञानान्निवर्तते, तथा ब्रह्मणो यथार्थज्ञानाद् ब्रह्माज्ञानकल्पितः सर्वोऽपि प्रपञ्चो निवर्तते। इदमेव कैवल्यम्। यथा चोक्तम्–अविद्यास्तमयो मोक्षः, सा संसार उदाहृतः' इति।

द्वैतसिद्धान्तेऽपि ज्ञानादेव मोक्ष इति। ज्ञानं चात्राऽपरोक्षज्ञानं विवक्षितम्। अपरोक्षज्ञानानन्तरमपि ज्ञानी स्वविहितकर्म कुर्यादेव। अन्यथा मोक्षे. आनन्दह्रासो भवति। एतन्मते स्वस्वसाधनानुसारेण आनन्दे तरतमभावो विद्यत एव।

विशिष्टाद्वैतवेदान्तेऽपि ज्ञानमेव मोक्षकारणम्, परन्तु ज्ञानकर्मणोरङ्गाङ्गिभावो वर्तते। अर्थात् कर्मसमुच्चितमेव ज्ञानं मोक्षसाधनमिति।

वीरशैवसिद्धान्ते तु रज्जोः तन्तुत्रयमिव ज्ञानं कर्म भक्तिश्चापि प्राधान्येन मुक्तिकारणम्। अर्थादिते ज्ञानकर्मसमुच्चयवादिनः। अत्र तु वीरशैवानां कर्मज्ञानसमुच्चयवादे आगमा ईशावास्यादिमन्त्राः, श्रीकरभाष्य-सिद्धान्तशिखामणिरित्यादयो ग्रन्थाश्च प्रमाणपदवीमारुहन्ति। तथा च सहस्रप्रमाणप्रमितोऽस्मदीयः सिद्धान्तः। तत्रापि पारमेश्वरागमे प्राधान्येन कर्मज्ञानसमुच्चयविषयो बहुषु स्थलेषु प्रतिपादितो वर्तते।

अथ कर्मशब्दार्थनिरूपणम्

वीरशैवसिद्धान्ते कर्मपदस्य न पुण्यपापहेतुत्वं नापि मुक्तिप्रतिबन्धकत्वं न वा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुनर्जन्मकरणत्वमिति वाच्यम्, "बाह्यं यागादिनोच्यते" इत्यनेन निषेधात्। किन्तु तस्य महालिङ्गार्चनार्पणादिक्रियेत्यर्थः, पूजा तस्य क्रियोच्यते, "समर्चाकर्म विज्ञेयम्" इत्युक्तत्वात्।

तच्च कर्म द्विविधम्–पशुकर्म पतिकर्मेति च। येन कर्मणा जन्तुर्बध्यते, यस्मिन् कर्मणि फलसम्बन्धो वर्तते वा तदेव पशुकर्मेति। पशुविशसनरूपयागादयो वा। यच्च कर्म संसारिणं पुरुषं भवबन्धनान्मोचयति, तत्पतिकर्मेति। शिवलिङ्गस्य यजन-भजनार्चनार्पणप्रसादग्रहणादीनि तानि सन्ति। अत्र तु पतिकर्म एव प्रशस्तम्। अन्यस्य बन्धकत्वान्न प्राशस्त्यम्। एवं चेत् सामान्यतः कर्मण आनर्थक्यं स्यादिति चेन्न, शिवज्ञानसिद्ध्यर्थं कर्मणां विहितत्वादिति ब्रूमः। तर्हि पशुकर्म पतिकर्म स्यात् ? इति चेत्, अस्तु नाम, को नेत्याह ? तथा हि आगमवाक्यम्– "तस्माच्छास्त्रं प्रमाणं हि कार्याकार्यव्यवस्थितौ" इति।

ज्ञानशब्दार्थविवरणम्

सामान्यतो ज्ञानमिति कश्चन सविषयकपदार्थः। तच्च ज्ञानं लौकिकमलौकिकमिति द्विविधम्। अत्र लौकिकस्य प्रकृतानुपयोगात् तन्न निरूप्यते। अलौकिकं ज्ञान-मागमजन्यमित्युच्यते। आगमाश्चात्र वीरशैवागमा इति। पारमेश्वरागमे ज्ञानशब्दस्य एते अर्थाः प्रदर्शिताः–

'शिवागमार्थविज्ञानं ज्ञानं नान्यार्थवेदनम्।
पशु-पाश-पतिज्ञानं ज्ञानमित्यभिधीयते'।।
"शिवाद्वैतपरं ज्ञानं ज्ञानमित्युच्यते बुधैः"।। इति।
'आवरणभङ्गानुकूलो व्यापारो ज्ञानम्'।

अत्र व्यापारः कर्मविशेष एव। ज्ञानस्यापि कर्मविशेष एव। ज्ञानस्यापि कर्मविशेषतया व्यापारत्वेन व्यवहारः कृतः। तथापि पशुपाशपतिज्ञानमेव मुख्यतया ज्ञानशब्दार्थत्वेन आगमकारैरभिधीयते।

समुच्चयपदार्थनिरूपणम्

समुच्चयो नाम (सम् + उद् + चिञ्) 'बहूनां युगपद्भावभाजां गुम्फः'। अत्र तु परस्परसापेक्षाविशिष्टयोः कर्मज्ञानयोरेकघटकत्वेन सत्त्वम्। तच्च विरोधानवगाहिज्ञाना-वच्छिन्नत्वं स्यात्। कर्मज्ञानयोः सहयोगः सहभावो वेति वक्तुं शक्यते। समुच्चयवादे मुख्यतया मतद्वयमस्ति विषमसमुच्चयः समसमुच्चयश्चेति। तत्र विषमसमुच्चय-वादिनामयमाशयः– कर्मणो मोक्षसाधनत्वेऽपि न साक्षात्, किन्तु ज्ञानाङ्गतया। ज्ञानस्यैव प्राधान्यम्। तथापि ज्ञानकर्मणोः समुच्चयो नास्तीति न। अत एव विषम इति विशेषणम्। तेऽङ्गाङ्गिभावसमुच्चयवादिनश्चेति कथ्यन्ते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समसमुच्चयवादिनां मते कर्मणो ज्ञानस्यापि समप्राधान्यम्। न कर्म ज्ञानाङ्गं न वा ज्ञानं कर्माङ्गम्। पूर्वस्मिन् मते तु कर्मणो ज्ञानाङ्गत्वम्। अत्र तु नोभयोरपि परस्परमङ्गाङ्गिभावः। अत एव– "अपां सोमम् अमृता अभूम" इति श्रुतिरप्युपपद्यते। पारमेश्वरागमेऽप्यस्मिन् विषयेऽनल्पानि प्रमाणान्युदितानि। कानिचिद् उत्तरत्र दर्शयिष्यामः। ज्ञानकर्मणोः समप्राधान्यादेव सम इति पदं नानर्थकम्[1]।

पारमेश्वरागमे शैवानां प्रथममङ्गाङ्गिभावसमुच्चयं निरूप्य तदनन्तरं वीरशैवानां समसमुच्चयः प्रतिपादितः। यथा–

ज्ञानाधिकारसिद्ध्यर्थमाचरेत् कर्म चोदितम्।
ज्ञाननिष्ठाबलेनैव त्यजेत् कर्माणि नान्यथा।।
विना ज्ञानाधिकारेण उक्त्या कर्माणि यस्त्यजेत्।
न याति पारं दुःखस्य विषयेष्ववसीदति[2]।। इति।

आगमशास्त्रविहितकार्यानुष्ठानेन शिवज्ञानस्य अधिकारी भूत्वा तज्जन्यज्ञानबलेनैव कर्माणि त्यजेत्। यो नरो ज्ञानसिद्धिं विना कर्माणि त्यजति, स दुःखस्य पारं न याति।

अत्र कर्मत्याग इति कर्मफलत्याग इत्यर्थः। तत्र तु कर्मणस्त्यागः तथा कर्मणो योगः, उभावपि मोक्षसाधनमेव। शिवलिङ्गार्चनार्पणप्रसादग्रहणादिपतिकर्मानुष्ठानमेव कर्मयोगः, स्वर्गादिफलापेक्षाराहित्यमेव कर्मत्याग इत्युच्यते शिवशासनज्ञैः। अत एवोक्तं गीतायामपि— संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ"[3] इति।

वीरशैवमतस्थस्य ज्ञानयोगो हि साधनम्।
विना ज्ञानं न योगः स्यान्न ज्ञानं योगतो विना।।
न विना ज्ञानयोगाभ्या वीरशैवमताश्रयः।
सन्तारणाय भवति च्यवते नात्र संशयः[4]।।

---

१. अपि च– साध्यद्विकसाधनद्विकसमुच्चयः, पूर्णसमुच्चय इत्यादयः समुच्चयभेदाः सन्ति। तत्रानिष्टपरिहारसाधनं कर्म, इष्टप्राप्तिसाधनं ज्ञानमिति द्विकसमुच्चयवादिनः (भास्करमतम्)। तथा प्रतिबन्धकनिवृत्तिकारणं कर्म, इष्टप्राप्तिसाधनं ज्ञानमिति पूर्णसमुच्चयवादिनः (यादवप्रकाशमतम्)।

२. पारमेश्वरागमः, सप्तमः पटलः, श्लोकः- ३०. ३२।

३. भगवद्गीता, अध्यायः - ५ श्लोकः - २।

४. पा. आं., सप्तमः पटलः, श्लोकः - ३७।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यः पुरुषो वीरशैवमते निष्णातः, तस्य तु साधनं ज्ञानं योगश्च। यतो हि ज्ञानं विना न भवति योगः, तथैव योगं विना न भवति ज्ञानम्।

नन्वत्र ज्ञानं विना न योगः, न योगं विना ज्ञानमित्युक्तम्, कथमिदम्? अन्योन्याश्रयादिति चेत्, मैवम्। यथा शाङ्करसिद्धान्ते जीवब्रह्मभेदस्य आविद्यकत्वेऽप्यविद्यया जीवब्रह्मविभागसिद्धौ जीवस्य सिद्ध्या अविद्यायां आश्रयसिद्धिः अविद्यासिद्धौ च जीवसिद्धिः। एवमेव अविद्याया जीवब्रह्मविभागस्यानादित्वेऽप्यविद्याधीनत्वं जीवब्रह्मविभागस्य, तथैवात्रापि मन्तव्यम्। न प्रतिबन्धकग्रहणमात्रेण दोषपरिहार इति चेत्, सत्यम्, वृक्षबीजन्यायेन ज्ञानकर्मणोरुभयोरप्यनादित्वेन यथा नान्योन्याश्रयः, तद्वदत्रापि।

अत्र योगोऽपि शिवसुस्थितचेतसो वृत्त्यन्तरनिरोधरूपः कर्मविशेष एव। ज्ञानं तु पशुपाशपतिज्ञानम्। ज्ञानयोगयोः परस्परापेक्षा वर्तते, "न ह्येकपक्षो विहगः प्रयाति", "अपश्यन् अन्धको दग्धोऽगच्छन् पङ्गुश्च दह्यते" इति दृष्टान्तवत्। अत्र साधकः सत्य-अहिंसा-अस्तेय-आस्तिक्यबुद्धि-श्रद्धा-यमनियम-अध्ययन-अध्यापन-यजन-याजन-वैराग्यादिसदाचारेण ज्ञानं सङ्गृह्य ज्ञानयोगी भवति। एवं ज्ञानयोगी भूत्वा कर्मयोगमभ्यस्यति। "पुण्यापुण्यात्मकं कर्म मुक्तेस्तत्प्रतिबन्धकम्", "फलकामनया कर्म करणं प्रतिपद्यते" इत्यादिशिवागमार्थजन्यं विज्ञानं लब्ध्वा कर्मबन्धं प्रहास्यति। पुण्यापुण्ये च योगं विवर्जयति च। एवं च कर्मफलं त्यक्त्वा कर्ममात्रेण शङ्करं सम्पूज्य शिवसायुज्यं प्राप्नोति अन्यथा दुःखस्य पारं न याति। अत एवोक्तम्– 'कर्मज्ञानोभयभ्रष्टो निमग्नो दुःखसागरे'[१] इति। अतो वीरशैवाः कर्मज्ञानरता भवेयुरिति शिवशासनमस्ति। तत्र च–

"विदिते शिवसात्मैककर्मणि ज्ञानयोगिनः।
न यजन्ति शिवं युक्ताः समलोष्टाश्मकाञ्चनाः"[२]॥

इति ज्ञानयोगिनां न किञ्चिदप्यस्त्यनुष्ठेयं कर्म, नित्यमुक्तत्वात्। अतस्ते न यजन्ति शिवमिति। एतच्चिन्त्यम्, "न यजन्ति शिवम्" इत्यनेन ते कर्मत्यक्ता इति न, किन्तु तेषां कर्मणां नास्ति विधिनिषेध इति तात्पर्यम्। उक्तं च आगमे–

'न किञ्चिज्ज्ञानिनः कर्मनिषेधो विधिरेव वा'[३] इति। अपि च, न केवलं कर्मज्ञाने मोक्षस्य साधनं भवतः, किन्तु भक्तिसंलग्ने कर्मज्ञाने एव मोक्षसाधनमिति

---

१. पा. आ., अष्टमः पटलः, श्लोकः - ६७।
२. पा. आ., द्वादशः पटलः, श्लोकः - ९।
३. पा. आ., द्वाविंशः पटलः, श्लोकः - ६७।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विशेषविचारोऽप्यत्र पगारमेश्वरे विविच्यते— "न कर्म साधनं मुक्तेर्नभक्तिर्ज्ञानमप्युत"[1] इत्यादिना[1] उड्डयने पक्षिणः पक्षद्वयमपि नियतमेव, तथापि दिक्सूचकं पुच्छं विना गन्तव्यं स्थानं न प्राप्नोति हि। अत्र भक्तिः पुच्छवत्। अतोऽभक्तिः कर्म मुक्तेर्न साधनम्, तथा अभक्तिर्ज्ञानमपि। अपि च भक्त्यभ्यासवशात् कर्मज्ञाने दृढतरे भवतः। एवं च भक्तिसमाश्रितः कर्मज्ञानसमुच्चय एव मोक्षसाधनम्। अत्रोक्तं च—

विशेषमत्र वक्ष्यामि शृणु देवि समाहिता।
कर्मभक्तिचिदात्मानस्त्वधिकारास्त्रयः स्फुटाः॥
आलम्बः कामिनः कर्म ज्ञानं निष्कामिनः परम्।
विरक्तस्य त्वसक्तस्य भक्तियोगः शिवे मयि[2]॥ इति।

मुक्तेस्त्रयो मार्गाः सन्ति, कर्ममार्गः, ज्ञानमार्गः, भक्तिमार्गश्चेति। सकामिनां कर्ममार्गः, निष्कामिनां ज्ञानमार्गः, विरक्तानां वीरशैवानां तु कर्मज्ञानविशिष्टभक्तिमार्ग एव विहितः।

उपनिषत्सु सामान्यतः सर्वत्रापि ज्ञानकर्मसमुच्चय एव प्रतिपादितः। तथा हि—

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते य उ विद्यामुपासते[3]॥

अत्र विद्याशब्दो ज्ञानार्थकः, अविद्याशब्दोऽपि न विद्या अविद्या इति व्युत्पत्त्या विद्याभिन्नमोक्षसाधनीभूतकर्मार्थे वर्तते, नञः स्वभिन्नसदृशपदार्थकत्वस्य 'अब्राह्मणमानय' इत्यादौ दृष्टत्वात्।

ये जना अविद्यामुपासते, केवलं स्वस्वरूपज्ञानभिन्नयजनभजनादिपतिकर्माण्यनुतिष्ठन्ति ते अन्धो यथा गर्तं प्रविशति तथा आणवमायीयकार्मिकमलरूपतमः प्रविशन्ति, संसारचक्रे भ्रमन्ति। ये च विद्यामुपासते कायवाङ्मनसः कर्म हित्वा आत्मस्वरूपज्ञानरताः तेऽपि पङ्कुर्यथाग्निं तथा तस्मादधिकं मलरूपं तमः प्रविशन्ति। एवं च ज्ञानकर्मान्यतरासक्तानां न किञ्चिदपि प्रयोजनम्। अतः—

विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते[4]॥

---

१. पा. आ., द्वाविंशः पटलः, श्लोकः - ७२।
२. तत्रैव, श्लोकः - ६४।
३. ईशावास्योपनिषत्।
४. तत्रैव।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अस्मिन् मन्त्रेऽविद्याया अनिष्टनिवर्तकत्वमुक्त्वा विद्याया अमृतसाधकत्वमुक्तम्। ये विद्यामात्मस्वरूपं ज्ञानं तथा अविद्यां विद्याभिन्नां शिवलिङ्गयजनभजनादिक्रियां चोभयं साक्षाद् मोक्षसाधनत्वेन जानन्ति, तेऽविद्यया पतिकर्मणा मृत्युं मलत्रयं तीर्त्वा विद्यया स्वस्वरूपज्ञानेनामृतत्वं प्राप्नुवन्तीति मन्त्रार्थः।

तत्र विचार्यते– मोक्षप्रतिबन्धकं कर्म, तथा मोक्षसाधनं ज्ञानम्, इत्येतयोः परस्परविरोधो वर्तते, "कर्मणा बध्यते जन्तुः" "तमेव विदित्वाऽतिमृत्युमेति" इत्यादिस्मृतिश्रुतिषु दृष्टत्वात्। अतः कथं समसमुच्चयत्वम् ? अत्र समाधीयते– अत्र च कर्म न मीमांसोक्तदिशा यज्ञयागादिकम्, तस्य सकामकर्मत्वेन मोक्षप्रतिबन्धकत्वात्, तस्य निष्कामत्वेऽपि न साक्षान्मोक्षसाधनत्वम्। अत एव ईदृशस्य कर्मणो ज्ञानकर्मसमुच्चयशरीरे न प्रवेशः। एवं चात्र कर्मशब्देन शिवपूजासाधनभूतानि विभूतिरुद्राक्षधारणादीनि पतिकर्माणि विवक्षितानि। तानि ज्ञानानुविद्धानि च। तेषां च मोक्षं प्रति ज्ञानवत् साक्षात्कारणत्वान्न विरोधः।

अपि च, ज्ञानाग्निना दग्धकर्मणो न ज्ञानसामानाधिकरण्यम्, "ज्ञानाग्निदग्धं कर्म न प्ररोहेत् कथञ्चन", "क्षीयन्ते चास्य कर्माणि" इत्याद्यागमवाक्यश्रवणात्। अत्र दग्धं कर्म कर्मक्षयो वा इत्यस्य स्वकार्यानुत्पादकत्वेन दग्धत्वं चित्रपटवद् भोगासमर्पितत्वमेवेति। अत एवोक्तमनुभवसूत्रे–

अद्वैतभक्तियुक्तस्य योगिनः सकलक्रिया ।
अस्ति दग्धपटन्यायात् क्रियामात्रा तु न क्रिया[1] ।।

अतो ज्ञानसामानाधिकरण्ये न च बाधः। एवं च– "नह्युत्पन्नस्य कर्मारम्भो युक्तः" इत्युक्तत्वात्। ज्ञानिनः करणीयं कर्म अस्ति न वेति प्रश्नः। अत्रोच्यते– ज्ञानिना वा अज्ञानिना वापि कर्म करणीयमेव। अन्यथा तस्यानिष्टनिवृत्तिः कथम् ? न च वाच्यं ज्ञानिनो नास्त्यनिष्टमिति चेत्, तेनापि विभूतिरुद्राक्षधारणशिवप्रसादादिकं कर्म कर्तव्यमेव। अन्यथा लोकसङ्ग्रहो न भवति। लोकसङ्ग्रहो न भवति चेत्, तदा लौकिकानां विरुद्धाचारेण तज्जन्यपापलेपः स्यादेव ज्ञानिनः। अत एव भगवता कृष्णेनाप्युक्तम्–

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि।।

---

१. शिवानुभवसूत्रम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः[1] ।। इति ।

श्रीरेणुकभगवत्पादैरप्युक्तम्—

ज्ञानामृतेन तृप्तोऽपि योगी धर्मं (कर्म) न सन्त्यजेत् ।
आचारं महतां दृष्ट्वा प्रवर्तन्ते हि लौकिकाः ।। इति ।

अतो ज्ञानिनापि कर्म करणीयमेव[2] ।

श्रीकरभाष्यकृद्भिः श्रीपतिपण्डितैर्भाष्ये तृतीयाध्याये चतुर्थपादे विहिताधिकरणे कर्मज्ञानसमुच्चयविचार एवं प्रस्तूयते । तत्र सूत्रम्– "सहकारित्वेन च"[3] इति । "विद्यां चाविद्यां च यस्तद्वेदोभयं सह", "ब्रह्मवित् पुण्यकृच्च", "सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्" इत्यादिषु धर्मब्रह्मोभयसहकारित्वेन मोक्षावगमाद् ज्ञानकर्मसमुच्चयानुष्ठानं सर्वेषामाश्रमिणां विधेयमिति ।

सकलशिवागमसारे श्रीसिद्धान्तशिखमणावपि ज्ञानकर्मसमसमुच्चयवाद एव अग्रेसरीकृतः । यथा हि—

प्रकाशते यथा नाग्निररण्यां मथनं विना ।
क्रियां विना तथान्तःस्थो न प्रकाशो भवेच्छिवः[4] ।।

अत्र क्रियायाः कारणेनैवान्तःस्थः शिवः प्रकाशत इत्युक्तम् । उदाहरणं तु 'नाग्निररण्यां मंथनं विना' इति । एवं च मथनात्मकक्रियायाः शिवप्रकाशनकारणत्वमुक्तम् । अतोऽत्र कर्मणः प्राधान्यम् । एवमेव—

अन्धो यथा पुरःस्थानि वस्तूनि च न पश्यति ।
ज्ञानहीनस्तथा देही नात्मस्थं वीक्षते शिवम् ।।

अपि च—

दीपं विना यथा गेहे नान्धकारो निवर्तते ।
ज्ञानं विना तथा चित्ते मोहोऽपि न निवर्तते[5] ।।

---

१. भगवद्गीता, ३.२२, २३ ।
२. सिद्धान्तशिखामणिः O. R. I. मैसूर. परिच्छेदः २६ श्लोकः १०९२ ।
३. श्रीकरभाष्यम्- अ. ३ पा. ४. सू. ३३. अधि-विहिताधिकरणम् ।
४. सि. शि., परि. २६. श्लोकः २०२७ ।
५. तत्रैव, परि. २६. श्लोकः २०६७ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अत्र श्लोकद्वये ज्ञानस्यैव प्राधान्यमुक्तम्। अतः कर्मज्ञानौ परस्परसापेक्षे—

अन्धपङ्गुवदन्योन्यं सापेक्षे ज्ञानकर्मणी।
फलोत्पत्तौ विरक्तस्तु तस्मात्तद्द्वयमाचरेत्।।
न क्रियारहितं ज्ञानं न ज्ञानरहिता क्रिया।
अपश्यन् अन्धको दग्धोऽगच्छन् पङ्गुश्च दह्यते[1]।।

अत्र तु क्रियारहितं ज्ञानं वा ज्ञानरहिता क्रिया वा न मुक्तिरूपफलोत्पत्तौ कारणम्। अतो ज्ञानकर्मणो अन्धपङ्गुवत् परस्परापेक्षे। अन्धस्य साहाय्यं विना पङ्गुः अग्निना दग्धो भवति तथा पङ्गुं विनान्धो गर्ते निपतति। अतोऽन्धस्य स्कन्धमारुह्य पङ्गुर्मार्गं निर्दिशति। अन्धः पङ्गुं वहन् गच्छति। तेन उभावपि सुरक्षितं स्थानं यातः। अत्र कर्मरहितं ज्ञानं पङ्गुवत्, तथा ज्ञानरहितं कर्म अन्ध इव। अपि च—

ज्ञानप्रधानं न तु कर्महीनं कर्मप्रधानं न तु चिद्विहीनम्।
तस्माद्द्वयोरेव भवेत् प्रसिद्धिर्न ह्येकपक्षो विहगः प्रयाति[2]।।

कर्मज्ञाने पक्षिणः पक्षद्वयमिव। यथा पक्षी एकेन पक्षेणैव न प्रयाति, तथा समुच्चयव्यतिरेकेण ज्ञानराहित्यविशिष्टकर्मणा वा कर्माभावविशिष्टज्ञानेन वा न हि मुक्तिः। शिवयोगिशिवाचार्याः कर्मज्ञानोभयं "भावे" समरसं प्राप्नुयादिति निर्दिशन्ति। पारमेश्वरागमेऽपि कर्मज्ञानोभयं भक्त्या संयुज्येदिति पूर्वमेवात्रोक्तम्। सिद्धान्ते— भावो मानसचेष्टात्मा परिपूर्णः शिवाश्रयः[3] इत्युक्तम्। कैश्चिदयमेव भक्तिरिति चाभिधीयते। भावोऽयं कर्मज्ञानयोर्मध्ये मणिरिवास्ति। यथा कर्म भावो ज्ञानम्। अत एव स्थलविवेचनसन्दर्भे आचार्यैरित्थमियं व्यवस्था कृता—

क्रियालिङ्गस्थलम् → भावलिङ्गस्थलम् ← ज्ञानलिङ्गस्थलम्।

क्रियागमस्थलम् → भावागमस्थलम् ← ज्ञानागमस्थलम्।

क्रियाचारस्थलम् → भावाचारस्थलम् ← ज्ञानाचारस्थलम्।

क्रियानिष्पत्तिस्थलम् → भावनिष्पत्तिस्थलम् ← ज्ञाननिष्पत्तिस्थलम्।

क्रियाप्रकाशस्थलम् → भावप्रकाशस्थलम् ← ज्ञानप्रकाशस्थलम्।

क्रियाशून्यस्थलम् → भावशून्यस्थलम् ← ज्ञानशून्यस्थलम्।

---

१. सि. शि., परि. २६. श्लोकः २०३२।
२. शिवागमः।
३. सि. शि., परि. २६. श्लोकः १०९४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं कर्मभावज्ञानानि आगम-आचार-निष्पत्ति-प्रकाश-शून्यत्वेन क्रमविकासं प्राप्य लिङ्गसिद्धौ परिणमन्ते। भावहीनकर्मणा ज्ञानेन वा न फलोत्पत्तिः। यथा—

अर्थहीना यथा वाणी पतिहीना यथा सती।
श्रुतिहीना यथा बुद्धिः भावहीना तथा क्रिया।।
चक्षुर्हीनो यथा रूपं न किञ्चिदीक्षितुं क्षमः।
भावहीनस्तथा योगी शिवं द्रष्टुं न ईश्वरः[1]।।

अस्यार्थस्तु स्फुट एव। तेन—

भावकर्मसमायुक्तं ज्ञानमेव विमुक्तिदम्।
शिवोऽहमिति भावोऽपि शिवतापत्तिकारणम्।।
न ज्ञानमात्रं नाचारो भावयुक्तः शिवो भवेत्[2]।।

एतैः सहयोगं विना एकेन कर्मणा ज्ञानेन भावेन वा न सुखप्राप्तिः। यथोदाहरणम्— अत्र पक्वफलमेकमस्ति। तस्य रसास्वादस्तु फलमिदमिति ज्ञानेन वा, भुक्तं फलमिति कर्मणा वा केवलं भावेन वापि न लभ्यते। फलस्य रसानन्दप्राप्तिस्तु तस्य ज्ञानास्वादनक्रियाभावा मेलनेनैव भवति, तथैव शिवाद्वैतानन्दोऽपि शिवोऽहमिति ज्ञानेन, अर्चना-अर्पणध्यानजपादिभिः क्रियाभिः, शिवाश्रितशुद्धमानसचेष्टया च (भावेन) लभ्यते। अतः कर्मभावज्ञानसंयोगादेव मोक्षप्राप्तिरिति सिद्धान्तोऽत्र स्वीक्रियते।

इदमत्र सिद्धान्तरहस्यम्– वीरशैवसिद्धान्तः सकलोऽपि ज्ञानकर्मणोः समसमुच्चयात्मक एव। इदं च धर्मस्य त्रिष्वङ्गेषु स्फुटं दृश्यते। तथा हि वीरशैवधर्मस्याष्टावरणं पञ्चाचारः षट्स्थलं चेति त्रीण्यङ्गानि वचनागमेषु वर्णितानि।

अष्टावरणमपि बहिरष्टावरणमन्तरष्टावरणमिति द्विविधम्। बहिरष्टावरणं कर्मप्रधानात्मकम्, अन्तरष्टावरणं ज्ञानस्वरूपभूतम्। तत्रापि गुरुलिङ्गजङ्गमाचरणे निजाचरणं तथा सम्बन्धाचरणमिति द्वयमस्ति। तत्र निजाचरणं नाम साक्षाद् यद्गुरोर्जङ्गमस्य वा पादोदकादिस्वीकरणम्। यदि गुरुजङ्गमौ न लभ्येते चेत्, स्वेष्टलिङ्गे गुरुजङ्गमभावनां कल्पयित्वा पादोदकादिस्वीकरणं सम्बन्धाचरणमिति कथ्यते। वीरशैवसिद्धान्तेऽर्पणतत्त्वमतीव प्रमुखं स्थानं भजते। अर्पणं द्विविधम्—क्रियार्पणं ज्ञानार्पणं चेति। तत्रापि क्रियार्पणस्य ज्ञानार्पणस्य च समप्राधान्यमिति। क्रियार्पणं नाम स्वयं प्राप्तस्य पदार्थस्य

---

१. सि. शि., परि. २६. श्लो. १०४२-४३।
२. सि. शि., परि. २६ श्लो. २०३९।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रूपरुचितृप्तीनामिष्टप्राणभावलिङ्गेषु समर्पणम्। ज्ञानार्पणं च स्वयं प्राप्तस्य रूपरसगन्धाद्यात्मकस्य विषयस्य तत्तदिन्द्रियाधिष्ठितलिङ्गेषु समर्पणम्। अतोऽष्टावरणानि ज्ञानकर्मसमुच्चयात्मकानि। एवमेव पञ्चाचारा अपि ज्ञानक्रियात्मका एव। आचारशब्दः आङ्पूर्वकगतिभक्षणार्थकचर्धातोर्व्युत्पन्नः। ये गत्यर्थकास्ते ज्ञानार्थका इति वैयाकरणाः। ततश्चर्धातोर्ज्ञानं गमनमप्यर्थः। गमनं चात्र क्रियाविशेषः। अतः 'आचार'शब्द एव ज्ञानकर्मसमुच्चयात्मकः। अत एव—

भ्रमणं रेचनं स्यन्द ऊर्ध्वज्वलनमेव च।
तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते[1]॥

इत्यादिना कर्माणि पञ्चधा निरूपितानि। एतेऽर्था गमनादेव लभ्यन्ते। अतो गतिः कर्म। एवं च आचारशब्दो ज्ञानकर्मसमुच्चयात्मक इति न्यायवैशेषिकानामपि सम्मतम्। एवं च आचाराः पञ्च ज्ञानक्रियासमुच्चयात्मका इति सर्वतीर्थङ्कराणां सम्मतम्।

षट्स्थलाचारेषु भक्तो महेशः, प्रसादी प्राणलिङ्गी, शरणः, ऐक्यमिति सोपानरूपेण वर्तन्ते साधकाः। नैतावता साधकः पूर्वक्रमे सोपानीभूतस्थलानि परित्यजेदित्यर्थः। तदपरिहाय स्थलान्तरं गन्तव्यमिति वीरशैवसिद्धान्तरहस्यम्। सिद्धयनन्तरं च सिद्धो यत्र कुत्रापि षट्स्थलेष्वेकस्मिन् सर्वानन्यान् पञ्चान् उपसंहृत्य लिङ्गाङ्गसामरस्यं प्राप्तुं स अधिकारी भवति। तथा हि तोण्टदसिद्धलिङ्गेश्वरस्य वचनम्—

प्रथमदल्लि भक्तनादेनेम्बरु द्वितीयदल्लि महेश।
तृतीयदल्लि प्रसादी चतुर्थदल्लि प्राणलिङ्गी॥
पञ्चमदल्लि शरण षष्ठदल्लि ऐक्यनादेनेम्बरु।
आरूस्थलवमीरि निरवयस्थलवोन्दिनेम्बरु॥
इदु खण्डितषट्स्थलज्ञान निर्णयवल्ल।
आवास्थलवनङ्गं गोण्डरू आ स्थलदल्लि॥
षड्विधलिङ्गदल्लि बेरसि।
बेरिल्लदिरबल्लडे सद्भक्तनेम्बेनय्या॥
महालिङ्गगुरुशिवसिद्धेश्वरप्रभुवे[2] ॥ इति।

इदं पद्यजातं (वचनम्) कर्नाटकभाषायां वर्तते। अस्य चाभिप्राय इत्थमस्ति—

---

१. कारिकावली।
२. तोण्टदसिद्धलिङ्गेश्वरवचनम्, सं. ७।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आदौ भक्तः, द्वितीये महेशः, तृतीये प्रसादी, चतुर्थे प्राणलिङ्गी, पञ्चमे शरणः, अन्तिमे तु ऐक्यवानिति व्यपदिश्यते।

सप्तमं निरवयवस्थलमपि प्राप्ता वयमिति केचिद्वदन्ति, परन्त्विदं स्थलज्ञाननिर्णयत्वेन नाङ्गीकुर्मः। यस्तु सिद्धः पूर्वोक्तदिशा यस्मिन् कस्मिन् च स्थलेऽन्यानि स्थलान्युपसङ्गृह्य आचरन् वर्तते, स एव षट्स्थलज्ञानीति। तत्रापि प्रत्येकं प्रत्येकमपि पुनः षड्धा विभक्तो वर्तते। यथा हि– भक्तस्य भक्तः, भक्तस्य महेशः, भक्तस्य प्रसादी, भक्तस्य प्राणलिङ्गी, भक्तस्य शरणः, भक्तस्य ऐक्यवान् इति। तथैव महेशस्थलेऽपि महेशस्य महेशः, महेशस्य भक्तः, महेशस्य प्रसादी। सर्वेष्वप्येवमेव। एवं रीत्या शैवागमेष्ववान्तरस्थलानां व्यवस्था निरूपिता। षट्स्थलानामप्यादौ स्थलत्रयं कर्मप्रधानम्, अन्ते च स्थलत्रयं ज्ञानप्रधानमिति। सिद्धान्तशिखामणौ तदेवं निरूपितम्—

भक्तो माहेश्वरश्चैव प्रसादीति च कीर्तितः।
कर्मप्राधान्यमेवात्र ज्ञानयोगस्य कथ्यते[1] ।। इति।

एवं च शिवशक्त्योर्ज्ञानक्रियात्मकत्वेन सम्पुटीकरणं शास्त्रेषु बहुषु स्थलेषु दृश्यते। लिङ्गाङ्गसामरस्यमिति पदमप्यमुमेवार्थं वदति। लिङ्गमिति ज्ञानम्, तथा अङ्गमिति कर्मेति। तथा हि समग्रमपि वीरशैवदर्शनं ज्ञानकर्मणोः समसमुच्चयमेव वदतीत्यत्र न संशयलेशः। वीरशैवधर्मे पूर्वोक्तदिशा आचारशब्दो ज्ञानक्रियात्मक एव। अतः साधक आदेहपातमाचारवान् भवेदित्याचार्यस्य आदेशः। उक्तं च—

ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनम् ।। इति।

अत्र शिवशास्त्रमेव परमं प्रमाणम्। तदुक्तं पारमेश्वरागमे—

यः शास्त्रविधिमुत्सृत्य वर्तते कामचारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।।
तस्माच्छास्त्रं प्रमाणं हि कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं तत्त्वं कुर्याद्गुरोर्मुखात्[2] ।। इति।

●

१. सि. शि., परि. २२ श्लोक ७०२ (८०२)।
२. पा. आ. स. प. श्लोक. २०४. २०६।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पारमेश्वरागमे ज्ञानकर्मसमन्वयः

डॉ. परड्डी मल्लिकार्जुनः
निवृत्तसंस्कृतप्राध्यापकः, क. वि. वि.

वन्दे हिमाद्रितनयाकरकण्ठमालं
गङ्गातरङ्गजलधौतजटाकलापम् ।
भोगापवर्गवरदं जगदेकपालं
सद्भक्तमानसमरालमनन्तलीलम् ।।
ज्ञानादेव तु कैवल्यमिदमद्वैतभाषितम् ।
कर्मजालं जगन्मूलमज्ञानाद् भवबन्धनम् ।।

अद्वैतवेदान्तवादिनां मते ज्ञानमेव कैवल्यसाधनम् । यदुक्तम्–ज्ञानादेव तु कैवल्यमिति । अज्ञानेन क्रियमाणं सर्वमपि कर्म भवबन्धकारणमिति तेषामभिप्रायः । अन्ततोगत्वा श्वासक्रियाप्यज्ञानमिति ते मन्यन्ते । ब्रह्मैव सत्यमिति मन्वाना जगन्मिथ्येति ज्ञात्वा जगदस्तित्वस्वीकारेण ज्ञानमेव शरणमिति ब्रुवन्ति । **''ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः''** इति महावाक्यमत्रानुसन्धेयम् ।

किन्त्वल्पज्ञस्य जीवात्मनो ब्रह्मीभवनार्थं सर्वज्ञत्वादिब्रह्मसद्गुणसम्पादनेऽनुष्ठानरूपं कर्मानिवार्यं भवतीति वक्तुं शक्यते ।

सांख्यज्ञानैकनिष्ठत्वाद् योगानुष्ठानवर्जितम् ।
मुक्तिकान्तारतेर्भूयात् कथं परमकारणम् ।।

सच्चिदानन्दस्वरूपोऽयं पुरुषोऽज्ञानवशाद् दुःखानुभूतिं कुरुते । स्वरूपज्ञानेऽपवर्गप्राप्तिरिति सांख्यमतानुयायिनां मतम् । तादृशस्वरूपापादनं योगानुष्ठानेन विना न सुलभमिति सेश्वरसांख्यस्य योगस्याविर्भावोऽभवत् । आसनादियोगाङ्गानुष्ठाने आत्मस्वरूपज्ञानात् कैवल्यप्राप्तिरिति पातञ्जलयोगशास्त्रमतम् । उक्तं च महर्षिणा पतञ्जलिना—

१. 'योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः'' । (योगसूत्रम्, २/२८)

२. आसनसिद्धौ (स्थैर्ये) द्वन्द्वानभिघातः । (तत्रैव, २/४८)

३. प्राणायामप्रतिष्ठायां प्रकाशावरणक्षयः । (तत्रैव, २/५२)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

४. धारणादिषु च योग्यता मनसः। (योगसूत्रम्, २/५३)

५. प्रत्याहारादिन्द्रियाणां वश्यता। (तत्रैव, २/५५)

इत्यादिक्रमेण क्रियाद्वारैव मोक्षप्राप्तिरिति योगविदामभिमतम्।

शिवोऽहमिति यज्ज्ञानं साधनामार्गवर्जितम्।
शिवैकया भावनाशून्यं भवेदेव न संशयः।।

तत्त्वमस्यादिमहावाक्यैर्गुरूपदिष्टैरहं ब्रह्मास्मि, शिवोऽहमिति केवलं ब्रह्मचिन्तनं तारकं न भवतीति सम्यगुपदिष्टम्। दीक्षात्रयसहायेन गुरुणा मलत्रयनाशे कृतेऽपि शुद्धे जीवात्माङ्गनाम्ना प्रसिद्धः सन् पञ्चाचारषट्स्थलमार्गाचरणेन विना लिङ्गाङ्गसामरस्यरूपं मोक्षं प्राप्तुमसमर्थ इति शिवयोगविदामभिप्रायः। शिवगुणप्राप्त्यैव शिवस्वरूपप्राप्तिस्तथा च शिवयोगसम्प्राप्तिरिति क्रमो यदि मन्यते, तत् शिवज्ञानेनैव सह क्रियामार्गस्याप्यावश्यकता वर्तते। अत एवोक्तम्—

फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम्।
न नामग्रहणादेव तस्य वारि प्रसीदति।। (मनुस्मृतिः, ६/६७)

अत एव ज्ञानमनुष्ठानशून्यं निरर्थकमित्याङ्ग्ललेखकेन यदुक्तं तदत्रानुसन्धेयम्–

"One may read all the books in the British museum, yet he may be illiterate".

सुभाषितकारेणाप्युक्तम्—

पुस्तकस्था तु या विद्या परहस्तगतं धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम्।।

अयमेवाशयः स्वात्मारामेण प्रकटितः—

क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथं भवेत्।
न शास्त्रपाठमात्रेण योगसिद्धिः प्रजायते।।

(हठप्रदीपिका, १/६५)

सर्वज्ञतामुख्यगुणोपपन्नं
शिवस्वरूपं शिवयोगलभ्यम्।
सम्प्राप्तुमिच्छन् शरणं प्रपन्नः
लिङ्गोपचारक्रियया समेतः।।

किञ्चिज्ज्ञो जीवात्मा परमात्मनः सर्वज्ञत्वादिसद्गुणगणप्राप्त्यै सदा प्रयत्नशीलो भवतु। अन्यथा शिवसायुज्यलाभः कथं भवति। षट्स्थलात्मैव जीवात्मा क्रमशोऽध्यात्मक्षेत्रे

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रगतिमासाद्य मुक्तिकान्तालिङ्गनसन्तुष्टो भवितुमर्हति। दिनचर्यारूपोऽयं षट्स्थलसिद्धान्तः साधकविकासहेतुर्भवति। उक्तं च सुभाषितकारेण–

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः।
किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति।। इति।

सत्क्रियारहितं ज्ञानं दम्भाचाराभिधानवत् "अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति" इति सुभाषितानुसारेण क्रियाविहीनो विवेकी ज्ञानवान्नरः सिद्धिभाजनं कथं भवेत्? उक्तं च स्वात्मारामेण—

नं वेषधारणं सिद्धेः कारणं न च तत्कथा।
क्रियैव कारणं सिद्धेः सत्यमेतन्न संशयः।।
(हठप्रदीपिका, १/६६)

सदसद्विवेकसम्पन्नः सदाचारप्रभावतः।
लोकबन्धो भवेन्नित्यं जीवन्मुक्तो न संशयः।।

आगमोक्तिरेकात्रानुसन्धेया—

ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः।
तस्मादाचारवान् योगी भवेदादेहपातनम्।।
(चन्द्रज्ञानागमः, क्रियापादः, ९/१२)

शिवयोगिशिवाचार्येणाप्ययमेवाशयो निरूपितः—

ज्ञानामृतेन तृप्तोऽपि योगी धर्मं न सन्त्यजेत्।
आचारं महतां दृष्ट्वा प्रवर्तन्ते हि लौकिकाः।।
(सिद्धान्तशिखामणिः, ४/६५)

करणखण्डनं देहदण्डनं विना स्वर्गप्राप्तिरसम्भवेति कर्नाटकभाषाकविवरेण्येन सर्वज्ञेन यदुक्तं तदप्यत्र स्मरणीयम्। कृतकृत्योऽपि ज्ञानी सामान्यजनोपकारायाचारं न त्यजेदिति गीतायामप्युक्तम्—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।। (गीता, ३/२१)

इष्टलिङ्गादिपूजार्थं यद्धनं भक्तवाञ्छितम्।
धर्ममार्गेण सम्पाद्य सत्क्रिया तत्र कारणम्।।

शिवलिङ्गादिपूजार्थं शिवनामादिकीर्तनार्थं च क्रियापि साधनम्, न केवलं ज्ञानमिति वक्तुं शक्यते। उक्तं चात्र–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्रिकालमर्चयेल्लिङ्गं शिवपञ्चाक्षरं जपन् ।
कीर्तयन् शिवनामानि शिवोऽहमिति भावयन् ।।

(पारमेश्वरागमः, ८/९०)

लिङ्गपूजोपचारार्थं धर्मार्जितवित्तावश्यकता भवतीतिसुव्यक्तम् । सदाचारनिरूपणावसरे एतदेव सूचितम्—

धर्मार्जितेन वित्तेन यत्सन्तर्पणमन्वहम् ।
गुरुजङ्गमलिङ्गानां सदाचारः स उच्यते ।।

(चन्द्रज्ञानागमः, १/६)

पक्षद्वयसहायेन खेचराणां गतिर्यथा ।
ज्ञानक्रियाबलोपेतो मोक्षलाभयुतस्तथा ।।

पक्षैकहीनो खेचरो यथा खेचरतां विहाय भूशायी भवति, तथा ज्ञानक्रिययोरेकतो हीनो नरः सिद्धिं न लभते । उक्तं चात्र—

उभाभ्यामपि पक्षाभ्यां यथा खे पक्षिणां गतिः ।
तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम् ।।

(लघुहारीतः, ७/१०/२)

यद्यपि शिवागमोक्तिर्ज्ञानमाहात्म्यं निरूपयति, तथापि क्रियाविहीनश्चेत्, मुक्तिमार्गबहिष्कृतः—

नास्ति ज्ञानात्परं मित्रं न भक्तेः साधनं परम् ।

(पारमेश्वरागमः, १०/९०)

लिङ्गदीक्षात्रयोपात्तलिङ्गयोगोऽपि साधकः ।
अनुष्ठानविहीनश्चेत् कथं मुक्तिमवाप्नुयात् ।।

अनाथादिभरणमपि क्रियांशमेतमेव–

साक्षान्मद्रूपमीशानि शयनासनभोजनम् ।
अनाथं रोगिणं दीनं मूकं बधिरमेव च ।
पङ्गुं मूढं दुराचारं नावमन्येत लिङ्गिनम् ।।

(पारमेश्वरागमः,५/८८.९०)

भ्रमरकीटन्यायानुसारं भ्रमराक्रमणभीत्या भ्रमरध्यानपरः कीटो यथा भ्रमरतां याति, तथा मानवः शिवयोगेन शिवो भवति, नान्यथा ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कीटो भ्रमरतां याति भ्रमराक्रमणभीतितः ।
तद्ध्यानं तु क्रियैव स्यात् कैवल्यं कथमन्यथा ।।

उक्तं चात्र—

गुरुदीक्षापरिप्राप्तशिवलिङ्गाङ्गयोगतः ।
द्विरेफकीटन्यायेन शिवैक्यं प्राप्तवान् द्विजः ।।

(मुकुटागमः, ७/३)

सत्यशुद्धक्रियाशक्तिर्भक्तानां मुक्तिदायिनीति विषयो नास्ति मतभेदः । इयमेव शक्ति'कायक'नाम्ना शिवशरणैरुदाहृता ।

तदेतत्कायकं नाम्ना शिवशरणविश्रुतम् ।
यत्तु याचकनिर्मुक्तसमाजनिर्मितिक्षमम् ।।
येन कोऽपि न स्याद्दीनो नापि धूर्तो न वञ्चकः ।
सर्वोदयैकनिष्ठेऽस्मिन् समाजे सत्त्वशालिनि ।।
शैवागमादिसद्ग्रन्थनिरूपणविचारणात् ।
ज्ञानकर्मद्वयोपेता हि भक्तिर्मुक्तिसाधनम् ।।

ज्ञानादित्रिवर्गप्राप्तिरेव मुक्तिहेतुरित्यत्र विषये प्रमाणम् ।

कर्मभक्तिचिदात्मानस्त्वधिकारास्त्रयः स्फुटाः ।।

(पारमेश्वरागमः, २२/६४)

ज्ञानक्रियासमन्वयादेव वीरशैवमतं विश्वमान्यं भवितुमर्हति । इदं वीरशैववैशिष्ट्यम्—

वर्णपाशविमोचनं धनिकप्रभावनिवारणं
साक्षराधमराक्षसादिनिवारणं मितभाषणम् ।
धर्मजीविपरोपजीवननाशनं भयनाशनं
विश्वमङ्गलकामनं भुवि वीरशैवरसायनम् ।।

अत एव पारमेश्वरागमोक्तिरियं नातिशयोक्तिः—

न वीरशैवसदृशं मतमस्ति जगत्त्रये ।
सर्वभोगप्रदं पुण्यं शिवसायुज्यदायकम् ।। इति ।

(पारमेश्वरागमः, १२/१२)

●

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पारमेश्वरागम में निरूपित षट्स्थल का स्वरूप

षण्मुखय्य अक्कूरमठ

प्रस्तावना

षट्स्थल सिद्धान्त वीरशैव धर्म का अनुपम योगदान है। भारतीय तत्त्वशास्त्र में यह विशेष एवं उल्लेखनीय बात है। इसमें साधक का आध्यात्मिक साधन का सार है। इसमें तात्त्विक सिद्धान्त एवं आचरण दोनों समाहित हैं। षट्स्थल का उद्गम आगम में पाया जाता है। वीरशैव धर्म में अष्टावरण अङ्ग है, पञ्चाचार प्राण हैं तथा षट्स्थल को आत्मा का स्थान दिया गया है। षट्स्थल एक सिद्धान्त होने के साथ एक दर्शन भी है। यह अध्यात्म-साधक का साधन-पथ है। यह शिवयोग का पथ भी है। लिङ्गाङ्ग-सामरस्य अथवा जीवात्मा-परमात्मा दोनों का सामरस्य साधन है। सरल रूप में कहना हो, तो षट्स्थल में छः सोपान (Six Stages) हैं। ये साधक के सोपान माने जाते हैं। वह कदम-कदम पर आगे बढ़ते मुक्ति पाता है।

स्थल शब्द का विवेचन

स्थल शब्द का शाब्दिक अर्थ होता है 'स्थान'। किन्तु वीरशैव धर्म की पारिभाषिक शब्दावली के अनुसार इसका अर्थ है 'परशिव'। परशिव उस महास्थल का आधार है, जिसमें सृष्टि का विकास होता है। इसके अलावा सृष्टि की स्थिति तथा लय होकर सृष्टि पुनः उसी में समा जाती है। अनुभवसूत्र के अनुसार–

सर्वेषां स्थानभूतत्वाल्लयभूतत्वतस्ततः।
तत्त्वानां महदादीनां स्थलमित्यभिधीयते।।
स्थकारः स्थानवाची स्याल्लकारो लयवाचकः।
तयोः कारणभूतं यत्तदेव स्थलमुच्यते।।

सभी तत्त्वों की स्थिति और लय स्थान होने के कारण परब्रह्म, परशिव, परतत्त्व को 'स्थल' कहते हैं। ऊपर उल्लिखित पंक्तियों में स्थल का अर्थ सुस्पष्ट है। स्थल की विशेषता यह भी है कि सभी आत्माएँ मुक्ति प्राप्त कर, उसी में समाहित हो जाती हैं।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यह चरम आधार (Ultimate Substratum) है। चरम आधार होने के कारण परतत्त्व ही 'स्थल' है।

अङ्ग और लिङ्ग की परिकल्पना

यह कहना कठिन है कि विश्व की रचना कोई किसी हेतु से, कोई किसी लक्ष्य की प्राप्ति के लिए हुई हो। यदि कोई ऐसा सोचता है, तो यह कल्पना मात्र है। परमेश्वर पूर्ण आनन्दमय है। यह सृष्टि उनके लिए एक खेल, कौतुक या लीलामात्र है। ब्रह्मसूत्रों में कहा गया है कि **"लोकवत्तु लीलाकैवल्यम्"**। शक्तिविशिष्टाद्वैत का भी यही मत है। शिव ने अपने विनोद के लिए सृष्टि की रचना की। आत्मा का सुख-दुःख दोनों का अनुभव करना भी स्वयं शिव के विनोद का ही कारण है। परशिव की लीला की इच्छा से तथा उनकी अपनी ताकत के क्षोभमात्र से ये दो भागों में बँट जाते हैं (शिवाद्वैतदर्पणानुसार)।

स्वशक्तिक्षोभमात्रेण स्थलं तद् द्विविधं भवेत्।
एकं लिङ्गस्थलं प्रोक्तमन्यदङ्गस्थलं स्मृतम्।।

अपनी शक्ति के क्षोभमात्र से वह स्थल द्विविध हो जाता है। एक का नाम होता है लिङ्गस्थल तथा दूसरे का नाम अङ्गस्थल। वीरशैव धर्म लिङ्ग से आरम्भ होकर लिङ्गाङ्ग सामरस्य का आदर्श इसकी अन्तिम सीमा होती है। वीरशैव केवल शरीर पर लिङ्गधारण करने मात्र से नहीं, बल्कि प्रमुखतः लिङ्गमय धर्म को धारण करने के कारण होता है। अनुभवसूत्र के अनुसार लिङ्ग का शाब्दिक अर्थ यह है–

लीयते गम्यते यत्र तत् सर्वं चराचरम्।
तदेतत् लिङ्गमित्युक्तं लिङ्गतत्त्वपरायणैः।।

मतलब, जहाँ सम्पूर्ण चराचर जगत् का लय हो जाता है,वही लिङ्ग कहलाता है। सभी प्राणियों के लिए, यानी गति का हेतु होने के कारण साकार-निराकार शिव को लिङ्ग कहा जाता है। इसमें साकार-निराकार शब्द का इसलिए उल्लेख किया गया है कि यद्यपि ईश्वर निराकार तो है, परन्तु इष्टलिङ्ग के रूप में वह साकार है। इष्टलिङ्ग का कोई विशेष आकार नहीं होने के कारण वह निराकार भी है। जीव जगत् में हर एक प्रत्येक जीवी से यही आशा की जाती है कि वह सांसारिक बन्धनों से छूटने की ओर प्रवृत्त होगा। अङ्ग और जीव शब्दों को एक ही अर्थ में प्रवृत्त किया जाता है। लेकिन वास्तव में जीव जब लिङ्ग का उपासक बन जाता है, तब ही वह अङ्ग बन जाता है। शिव असीम व पवित्र शक्ति से युक्त है। जीव शिव स्वयं है, पर उसकी शक्ति सीमित

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

है। इस प्रकार शिव और जीव दोनों एक ही हैं। पर परब्रह्म की लीला एक विशेष समय के लिए एक-दूसरे से पृथक् कर देती है। वीरशैव धर्म अङ्ग (जीव) के लिङ्ग के जरिये शिव के समीप लां देता है। जीव शक्ति से युक्त स्वयं शिव है। उसे सीमाओं से मुक्त होकर पुनः शिव बनना है। ऐसा हो जाने के उपरान्त 'स्थल' अङ्ग एवं लिङ्ग दो भागों में बँट जाने के कारण अनायास ही शक्ति भी दो भागों में बँट जाती है। वे हैं कला और भक्ति। अनुभवसूत्र के अनुसार–

यथा स्थलं द्विधा भूतं तथा शक्तिर्द्विधा भवेत्।
शक्तिरप्रतिमा साक्षाच्छिवेन सहधर्मिणी।।

शक्ति और भक्ति का स्वरूप

जिस तरह एक बड़ी ज्वाला छोटी सी दीपिका की आकृति में विभक्त हो जाती है, उसी तरह माहेश्वरी शक्ति भक्ति के रूप में विभक्त हो जाती है। शक्ति वासनायुक्त है और भक्ति निर्वासनायुक्त है। पारमार्थ निरूपण में शक्ति और भक्ति में कोई भेद नहीं है। शक्ति प्रवृत्ति है, तो भक्ति निवृत्ति है। सृष्टि की वृद्धि शक्ति का स्वाभाविक गुणविशेष है। आत्मा के प्रपञ्च की वासना मायारहित है। फिर भी तर्क प्रमाण से देखा जाय, तो शक्ति की गुणविशेष भक्ति गुणों से अधिक है। शक्ति उपास्यत्व है, तो भक्ति उपासकत्व है। इसीलिए शक्ति लिङ्गस्थल में और भक्ति अङ्गस्थल में स्थित है। साक्षात् शिव लिङ्गस्थल और जीव अङ्गस्थल बनता है। लिङ्गाङ्ग का ऐक्य शिवजीवैक्य ही है।

लिङ्गाङ्गस्वरूप और सामरस्य

लिङ्गस्थल में तीन भेद माने गये हैं– इष्टलिङ्ग, प्राणलिङ्ग और भावलिङ्ग। स्थूल, सूक्ष्म तथा कारण तीनों को शरीरों में धारण करना पड़ता है। अङ्गस्थल में तीन प्रकार हैं– योगाङ्ग, भोगाङ्ग तथा त्यागाङ्ग। वैसे भक्ति में भी छः भेद हैं– समरस, आनन्द, अनुभव, अवधान, निष्ठा और सद्भक्ति, ये षट्स्थल उपासना के छः सोपान हैं। अङ्ग इनमें से एक के बाद दूसरे को प्राप्त करता हुआ अपना अन्तिम लक्ष्य लिङ्गाङ्ग-सामरस्य को प्राप्त करता है। अङ्ग क्रमशः स्थूल से सूक्ष्म और सूक्ष्म से कारण की ओर अग्रसर हो जाता है। प्राणलिङ्ग और भावलिङ्ग की उपासना मानसिक और आत्मिक उपासना है। अङ्ग शिवकृपा से उन क्रमिक सोपानों पर चढ़ता हुआ अन्त में शिवसामरस्य को प्राप्त करता है। जैसे मुण्डकोपनिषत् में कहा गया है–

यथा नद्यः स्यन्दमानाः समुद्रे अस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जिस प्रकार समुद्र में जाकर नदियाँ अपने नाम-रूप को छोड़ उसके साथ एक हो जाती हैं, उसी प्रकार मुक्त आत्माएँ अपने नाम-रूप को छोडकर परशिव के साथ समरस हो जाती हैं।

जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितम्।
परे ब्रह्मणि लीनात्मा विभागेन न दृश्यते।।

पानी में पानी के साथ मिल जुल जाने की तरह या आग के साथ आग के मिल जाने की भाँति आत्मा परमात्मा में विलीन हो जाता है। छः सोपानों द्वारा आत्मा अपने अन्तिम लक्ष्य को प्राप्त कर परमात्म-स्वरूप बन जाता है। अङ्ग यद्यपि शिव का एक अङ्ग और उसी का स्वरूप है, पर अज्ञान के कारण पृथक् हो जाता है। अन्त में लिङ्गैक्य में अपने वास्तविक स्वरूप को पहचान कर पूर्ण सामरस्य में मग्न हो जाता है। इसी अवस्था को शिवसामरस्य, शिवजीवैक्य, लिङ्गाङ्गसामरस्य, लिङ्गैक्य आदि शब्दों से व्यक्त किया जाता है। इस सम्पूर्ण विषय को इस तालिका की सहायता से समझा जा सकता है–



CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पारमेश्वरागम में निरूपित षट्स्थल का स्वरूप

शिवागमों में पारमेश्वरागम का विशिष्ट स्थान है। इसमें वीरशैव सिद्धान्त और तत्त्वों का विस्तारपूर्वक विवरण मिलता है। इस आगम के छठें पटल में षट्स्थलों का स्वरूप प्रदर्शित है। स्वयं परमात्मा षट्स्थलों का स्वरूप धारण कर लेता है। इसको देखा जाय, तो यहाँ क्रमशः भक्त, माहेश्वर, प्रसादी, प्राणलिङ्गी, शरण तथा ऐक्य नामक छः स्थलों के स्वरूप को विस्तार से बताकर इनके ज्ञान की महिमा निरूपित की गई है। आगे चलकर महेश्वर के सर्वज्ञता आदि छः अङ्गों की षड्विध स्थलों में योजना के प्रकार को भी सूचित कर भक्ति, कर्मक्षय, बुद्धि, विचार, दर्पक्षय और सम्यक् ज्ञान नामक षड्विध उपाङ्गों के लक्षण बताये गये हैं। इतना ही नहीं, समस्त अङ्गों और उपाङ्गों के परस्पर सम्बन्धों को प्रसङ्गवश षड्विध ऊर्मियों और अरिषड्वर्ग का भी विस्तृत विवरण दिया गया है। इन सभी विषयों का जिस किसी को सम्यक् ज्ञान है, उसको मुक्ति हाथ में ही आ जाती है। अङ्गों और उपाङ्गों को इस आगम में शिवस्वरूप माना गया है। अब हम इन सभी का विवरण देखेंगे–

भक्तो माहेश्वरश्चैव प्रसादी प्राणलिङ्गकः।
शरणः शिवलिङ्गैक्यः स्थलषट्कं मम प्रियम्।।

(पा. आ. ६.८)

इस आगम में चेतावनी के रूप में स्पष्ट रूप से कहा गया है कि जो व्यक्ति शिवभक्ति से रहित, दुराचार में निरत और नास्तिक हैं, ऐसे व्यक्ति को षट्स्थल का उपदेश कदापि नहीं देना चाहिये। वीरशैव दीक्षा एक कल्पवृक्ष है। षट्स्थल तत्फल माना जाता है। इतना ही नहीं भक्त, महेश, प्रसादी, प्राणलिङ्गी, शरण और शिवैक्य जैसे छः स्थल प्रमुख रूप से मुक्ति के साधन माने जाते हैं। अब हम देखेंगे कि प्रत्येक स्थल की विशेषता क्या है ?

१. भक्तस्थल

गुरौ च जङ्गमे लिङ्गे तारतम्यविशेषतः।
पूज्येत् त्रिविधं रूपं तद्भक्तस्थलमुच्यते।।

(पा. आ. ६.९)

उपर्युक्त उक्ति में कहा गया है कि गुरु, जङ्गम तथा इष्टलिङ्ग तीनों में परशिव का रूप तरतमभाव से विद्यमान है। इस त्रिविध रूपं की जो भी पूजा करता है, वही भक्तस्थल नाम से प्रसिद्ध होता है। भक्तस्थल पृथ्वीतत्त्व का प्रतिनिधि भी है। इसका

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मतलब है कि गुरु-लिङ्ग-जङ्गम की समान भाव से श्रद्धा-भक्ति के साथ आराधना, पूजा करता है, वही भक्तस्थल का स्वरूप है। यही वीरशैव धर्म में आराध्य माना गया है। इनमें श्रद्धा रखना ही भक्तस्थल का प्रमुख लक्षण है।

२. माहेश्वरस्थल

यो गुरूक्तेन मार्गेण लिङ्गपूजारतः सदा।
जङ्गमानर्चयेच्छक्त्या स हि माहेश्वरः स्मृतः।।

(पा. आ. ६.१३)

जो साधक गुरु द्वारा उपदिष्ट मार्ग से सदा इष्टलिङ्ग की पूजा में लीन रहता है तथा अपनी शक्ति के अनुसार जङ्गमों की पूजा करता है, तीनों कालों में इष्टलिङ्ग की पूजा में निरत है, भक्तों के प्रति भक्तिभाव से आदर करता है, वीरशैव मत में उल्लिखित आदर्शों का पूरी तरह से पालन करता है, वही माहेश्वर कहलाता है। आचारों के पालन तथा जङ्गमों के पूजन में जो साधक निष्ठापूर्वक लगा हुआ है, उसे ही निस्सन्देह माहेश्वरस्थल कहते हैं। माहेश्वरस्थल जलतत्त्व का प्रतिनिधित्व करता है (पा.आ. १३.१६)।

३. प्रसादिस्थल

योऽनर्पितं महेशानि नार्चयित्वापि जङ्गमान्।
नाश्नाति न त्यजेन्मह्यमर्पितं कृच्छ्रगोऽपि वा।।

(पा. आ. ६.१७)

जो साधक भगवान् को समर्पित किये बिना, जङ्गमों की पूजा किये बिना, भारी सङ्कट आने पर भी भोजन नहीं करता तथा भोजन को भगवान् को समर्पित किये बिना भोजन नहीं करता, उसे प्रसादी कहते हैं। यह स्थल अग्नितत्त्व स्वरूप है।

४. प्राणलिङ्गस्थल

यथा प्राणे तथा लिङ्गे यथा लिङ्गे तथा शिवे।
प्राणलिङ्गशिवेष्वेकबुद्धिमान् प्राणलिङ्गकः।।

(पा. आ. ६.२०)

इस स्थल में साधक इष्टलिङ्ग, प्राणलिङ्ग तथा शिव में समान बुद्धि रखकर साधना करता है। उसी को प्राणलिङ्ग कहा जाता है। प्राणलिङ्गी वायुतत्त्व का स्वरूप है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

५. शरणस्थल

एषणात्रयनिर्मुक्तो नित्यमेकान्तसेवनः ।
मम ध्यानरतो नित्यं शरणः परिकीर्तितः ।।

(पा. आ. ६.२३)

शरणस्थल में पुत्रकामना, धनकामना तथा प्रतिष्ठा कामनाओं में जो साधक मुक्त है, हमेशा एकान्त में रहते हुये भगवान् में मन लगाकर ध्यानासक्त रहता है, वह शरण कहलाता है। यह शरण आकाशतत्त्व का स्वरूप है।

६. शिवलिङ्गैक्यस्थल

न पूजा नैव च ध्यानं न योगकरणादिकम् ।
अहन्ताभावनाधीरः शिवलिङ्गैक्यसंज्ञकः ।।

(पा. आ. ६.२६)

भगवान् के सिवाय और कुछ भी नहीं है, इस दुनिया में इस दृढ भावना, सङ्कल्प से जो इनसान लीन होता है, वह शिवैक्य कहलाता है। परशिव या शिवलिङ्ग के साथ समस्त स्थिति को प्राप्त साधक ही ऐक्यस्थल कहलाता है। शिवैक्य साक्षी तत्त्व का स्वरूप है। मतलब स्पष्ट है कि शिवैक्य प्राप्त शिवयोगी साक्षात् शिवस्वरूप है। इस प्रकार जो साधक षट्स्थल को मानकर साधना करता है, वह व्यक्ति जन्म तथा संसार के सभी बन्धनों से मुक्त हो जाता है।

षट्स्थल के अतिरिक्त पारमेश्वरागम में माहेश्वर के छः अङ्ग बतलाये गये हैं। जैसे– सर्वज्ञता, तृप्ति, अनादिबोध, स्वतन्त्रता, सदा अलुप्त शक्ति तथा अनन्त शक्ति। एक पल के लिए इन सभी अङ्गों की विशेषता को यहाँ पर देखेंगे—

१. भक्तिस्थल का साधक शिव का सर्वज्ञता नामक अङ्ग है।
२. माहेश्वर का साधक शिव का तृप्ति नामक अङ्ग कहलाता है।
३. प्रसादी नाम का साधक शिव का अनादि या निरङ्कुश नामक बोध है।
४. प्राणलिङ्गी स्थल के साधक को स्वतन्त्र नामक अङ्ग कहते हैं।
५. शरणस्थल साधक को अलुप्त शक्ति नामक अङ्ग कहते हैं।
६. ऐक्य के साधक को अनन्त नामक शक्ति कहते हैं।

उपर्युक्त छः स्थलों को अङ्गस्थल कहते हैं। ये सब पाँच ज्ञानेन्द्रिय और मन के प्रतिनिधि कहलाते हैं। जो साधक इन सभी छः अङ्गस्थलों का ज्ञान सद्गुरु के उपदेश द्वारा प्राप्त करता है, वह साक्षात् परशिवस्वरूप हो जाता है। जिस किसी को इस

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अङ्गाङ्गी भाव का बोध नहीं है, उस व्यक्ति को मुक्ति कदापि नहीं मिलेगी। (पा.आ. ६.३१-३९)

पारमेश्वरागम में छः अङ्गों के अतिरिक्त भक्ति आदि के रूप में परमपद (मोक्ष या मुक्ति) देने वाले छः उपाङ्ग (Sub-Division) भी वर्णित हैं। जैसे– भक्ति, कर्मक्षय, बुद्धि, विचार, दर्पनाश एवं सम्यग् ज्ञान। अब हम एक पल के लिए इनके बारे में देखेंगे (पा.आ. ६.४२)।

१. भक्ति

जब ईश्वर के प्रति परिशुद्ध भावना प्रकट हो जाती है, वही सद्भक्ति है। शिवभक्त के लिए भक्ति ही माता तथा पिता हैं। उसके लिए भक्ति कामधेनु और कल्पवृक्ष है। भक्ति भावना से रहित व्यक्ति के सारे प्रयत्न इसी तरह निष्फल हो जाते हैं, जिस तरह मङ्गलसूत्र मात्र नहीं धारण करने से विधवा। ऐसे व्यक्ति की भक्ति भी फलवती नहीं हो सकती। (पा.आ. ६.४६-४७)

२. कर्मक्षय

पूर्व जन्मों के कर्मों को तथा वर्तमान जन्म में किये जानेवाले कर्मों को भी भक्ति की शक्ति नष्ट कर देती है। (६.४८)

३. बुद्धि

कर्मक्षय हो जाने पर मनुष्य की बुद्धि निर्मल हो जाती है, विषयों की ओर उन्मुख न होते हुये परमात्मा में स्थिर हो जाती है। जिस तरह भ्रमर का गुञ्जन सुनकर साधारण कीट स्वयं भ्रमर बन जाता है, उसी तरह शिव का ध्यान करने वाले जीव स्वयं शिव बन जाते हैं। इसको भ्रमर-कीट न्याय भी कहते हैं। साधक की जब निर्मल बुद्धि नहीं रहती, विषय सुख में मग्न होकर क्रोध एवं मोह के कारण उसकी स्मृति भ्रष्ट हो जाती है। स्मृति नष्ट होने की स्थिति में उसकी मति मारी जाती है। इतना ही नहीं वह स्वयं भी नष्ट हो जाता है। (६.४९-५३)

४. विचार

जो साधक शुद्ध बुद्धि से गुरु के उपदेशानुसार चलते हुये अहितों का निश्चित ज्ञान प्राप्त करता है, उसी को विचार कहा जाता है। उसके अन्य विषयों पर विचार करने से कोई भी प्रयोजन नहीं रहता। (६.५४-५५)

५. दर्पनाश

जब साधक गुरु के उपदेश द्वारा शास्त्रों का मनन कर, समस्त भूतों का हित कर

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अपने स्वरूप को जान लेता है, तो अनायास ही उसके दर्प का नाश हो जाता है। (६.५६)

६. सम्यग् ज्ञान

जब साधक का अहङ्कार नष्ट हो जाता है, वह शिवज्ञान में लीन हो जाता है, समस्त प्राणियों को शिव के रूप में देखता है। अपने आप में प्राणियों में एकता का दर्शन करने वाला ही सम्यग् ज्ञानी कहलाता है। (६.५७-५८)

पारमेश्वरागम में छः स्थलों के अलावा छः प्रकार के अङ्ग तथा छः प्रकार के उपाङ्ग भी हैं। ये परस्पर जुड़े हुये हैं और इनमें आपस में सम्बन्ध भी है। जैसे सर्वज्ञता ही भक्ति है। तृप्ति ही कर्मक्षय है। अनादि बोध ही बुद्धि है। स्वतन्त्रता ही विचार है। अलुप्त शक्ति ही गर्वक्षय है तथा अनन्त शक्ति ही सम्यग् ज्ञान है। अङ्ग और उपाङ्ग के रूप में साधक (शिवयोगी) षट्स्थल सिद्धान्त को जानता है। वह स्वयं शिवस्वरूप है। भक्ति आदि छः, सर्वज्ञता आदि छः, भक्ति आदि छः ये सभी दो हाथ, दो पैर, शिर और शरीर हैं। इस तरह से भगवान् शिव के अथवा भक्त के अङ्गों के रूप में जाने जाते हैं। ये षट्स्थल के विराट् स्वरूप माने जाते हैं। सद्गुरु के द्वारा इस ज्ञान को प्राप्त करना आवश्यक है। तब साधक छः प्रकार की ऊर्मियों से तथा अरि षड्वर्गों से मुक्त हो जाता है। इतना ही नहीं, अपनी सद्बुद्धि से अहङ्कार को त्याग कर साक्षात् शिव बनने के साथ ही साथ वह मुक्त भी हो जाता है।

षडूर्मियाँ

भूख, प्यास, शोक, मोह, जन्म तथा मरण– ये छः संसाररूपी समुद्र की ऊर्मियाँ हैं। जिस तरह से समुद्र में लहरें निरन्तर उठती ही रहती हैं, उसी तरह संसारी जीवी को ये छः ऊर्मियाँ सदा ही सताती रहती हैं। क्षुधा तथा पिपासा के प्राण तथा शोक, मोह तथा मत्सर मन के तथा जन्म और मरण देह के धर्म हैं। (पा.आ. ६.६७)

इनके स्वभाव बिलकुल समुद्र की लहरों के जैसा है। यही कारण है कि इनको भी ऊर्मि नाम दिया गया है। ये मनुष्य को सदा दुःख देती रहती हैं। इस कार्य में अरिषड्वर्ग इनको परोक्ष रूप से सहायता करता रहता है। (पा.आ. ६.६८-७०)

काम, क्रोध, लोभ, मोह, मद तथा मात्सर्य ये सभी अरिषड्वर्ग कहलाते हैं। ये मनुष्य के शत्रु हैं। सहज ही मनुष्य को हानि पहुँचाते हैं। इंसीलिए इनको अरि (वैरी) षड्वर्ग कहा गया है। जो साधक छः ऊर्मियों के साथ अरिषड्वर्गों पर विजय प्राप्त कर लेता है, तो मुक्त हो जाता है। भक्त आदि छः अङ्गों से लेकर (षट्स्थल) सम्यग्, ज्ञान

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पर्यन्त उपाङ्गों में उत्तरोत्तर श्रेष्ठता मानी जाती है। पूर्व का स्थल साधन और उत्तरोत्तर स्थल साध्य माना गया है।

षड्ऊर्मियों एवं अरिषड्वर्ग से विहीन सम्यग् ज्ञान के अधिकारी और छः स्थलों को भली-भाँति जानने वाले मनुष्य के हाथों में मुक्ति स्वयं आ जाती है। (६.७१-७४)

उपसंहार के रूप में कहा जाता है कि जैसे उपसंहार यहाँ पूर्व में ही उल्लिखित किया गया है कि 'षट्स्थल' वीरशैव धर्म का प्राणस्वरूप है। विभिन्न आगमों में इनके अनेक प्रकार के विवरण पाये जाते हैं। फिर भी इसकी विशेषता अनुपम है और अनमोल है। जैसे सूक्ष्मागम में षट्स्थल का विवरण इस प्रकार दिया गया है–

१. जो साधक देह, इन्द्रिय और आत्मा का अभिमान छोड़ देता है, वह निस्सन्देह 'भक्त' कहलाता है।

२. जो साधक अपने चित्त को मन्त्र, जप, तप द्वारा राग, द्वेष आदि दुर्गुणों से मुक्त कर लेता है, उसे माहेश्वर कहते हैं।

३. जिस साधक का 'चित्त' निर्मल है, वह प्रसादी कहलाता है।

४. जो साधक जीव-भाव का भ्रम छोड़कर लिङ्गस्वरूप हो जाता है, वह प्राणलिङ्गी कहलाता है।

५. जो इनसान शिवभाव में विश्वास कर निश्चिन्त होकर आनन्द में लीन रहता है, वह 'शरण' कहलाता है।

६. शिव और जीव विषयक सभी भ्रान्तियों से निर्मुक्त व्यक्ति 'ऐक्य' कहलाता है। (८: ३१-३५)

षट्स्थल लिङ्गाङ्ग सामरस्य का साधना पथ है। साधक यानी 'अङ्ग' जब लिङ्गदेव की ओर जाता है, तो यात्रिक कहलाता है। षड्ऊर्मियों और अरिषड्वर्गों के दुरित गुणों को दूर कर क्रमशः एक-एक साधन को प्राप्त करते हुये, साधना पथ पर चलते हुये, अन्त में भगवान् में लीन हो जाता है। यह मनशास्त्र और मनोविज्ञान भी है तथा व्यक्ति के विकास की सम्पूर्णता भी है। यह 'योगविज्ञान' भी कहलाता है।

इस षट्स्थल का दूसरा अर्थ शिवयोग की परिपूर्ण साधना कहा जाय, तो अत्युक्ति नहीं होगी। इस सम्पूर्ण प्रक्रिया को तालिका के माध्यम से सरलता से समझा जा सकता है–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

षट्स्थल के अङ्गों और उपाङ्गों का वर्गीकरण

१. स्थल	भक्त-	– महेश	– प्रसादी	– प्राणलिङ्गी	– शरण	– ऐक्य
	↓	↓	↓	↓	↓	↓
२. अङ्ग	सर्वज्ञता	– तृप्ति	– अनादिबोध	– स्वतन्त्रता	– अलुप्तशक्ति	– अनन्तशक्ति
	↓	↓	↓	↓	↓	↓
३. उपाङ्ग	भक्ति	– कर्मक्षय	– बुद्धि	– विचार	– दर्पनाश	– सम्यग् ज्ञान
	↓	↓	↓	↓	↓	↓
४. षडूर्मियाँ	भूख	– प्यास	– शोक	– मोह	– जन्म	– मरण
	↓	↓	↓	↓	↓	↓
५. अरिषड्वर्ग	काम	– क्रोध	– लोभ	– मोह	– मद	– मत्सर

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पारमेश्वरागम में निरूपित षट्स्थल का स्वरूप

सिद्धराम देव हिरेमठ (हिप्परगि)

इस प्रपञ्च में जीवित रहकर अपना व्यवहार करने के लिए प्रत्येक व्यक्ति को पाँच भूतों से निर्मित स्थूल शरीर, पाँच प्राण तथा इन सबके प्रेरक आत्मा का होना नितान्त आवश्यक है। इनके रहने पर ही प्रत्येक व्यक्ति लौकिक जीवन व्यतीत कर सकता है और लेन-देन, गमनागमन, खान-पान आदि लौकिक व्यवहार कर सकता है। जैसे लौकिक जीवन के लिए शरीर, प्राण तथा आत्मा की आवश्यकता है, वैसे ही वीरशैव सिद्धान्त के अनुसार आध्यात्मिक प्रगति के लिए अष्टावरण, पञ्चाचार तथा षट्स्थल के अनुष्ठान की आवश्यकता है। इसीलिए वीरशैव दर्शन के आचार्यों ने अष्टावरण को अङ्ग, पञ्चाचार को प्राण एवं षट्स्थल को आत्मा कहा है। वीरशैव धर्म में ये तीनों अत्यन्त प्रमुख तत्त्व हैं। वीरशैव धर्म के साहित्य में सर्वत्र इनकी चर्चा उपलब्ध है।

इसमें कोई सन्देह नहीं है कि वीरशैव धर्म का मूल साहित्य शिवागम हैं। ये कामिक से वातुल पर्यन्त अट्ठाईस माने गये हैं। इन शिवागमों के उत्तरभागों में वीरशैव धर्म के विचारों एवं तत्त्वों का उपदेश मिलता है। अत एव सिद्धान्तशिखामणि में कहा गया है–

सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम्॥

(सि. शि. ५.१४)

भगवान् शिव की वैखरी वाणी से उत्पन्न इन आगमों में पारमेश्वरागम भी एक है। परमेश्वर-प्राप्ति के विभिन्न उपायों का उपदेश इस ग्रन्थ में प्रतिपादित होने के कारण एवं परमेश्वर शिव के द्वारा उपदिष्ट होने के कारण इस आगम को पारमेश्वरागम कहा गया है। इस आगम के छठें पटल में षट्स्थल के स्वरूपों का विवेचन मिलता है।

वीरशैव धर्म में षट्स्थल का विशेष स्थान है। इसीलिए इसको आत्मा का दर्जा दिया गया है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

षट्स्थल ज्ञान की गोपनीयता

पारमेश्वरागम में षट्स्थल के स्वरूप का प्रतिपादन करने के पूर्व इसकी गोपनीयता पर एवं अनधिकारी को उसका उपदेश न देने पर जोर देते हुए कहा गया है—

गोपनीयं प्रयत्नेन दरिद्राणां यथा निधिः।
यथा स्त्रियां तथा गोप्या स्वयोनिरिव सुव्रते।।
शिवभक्तिविहीनाय दुराचाररताय च।
नास्तिकाय न दुष्टाय वक्तव्यः षट्स्थलक्रमः।। (६.३-४)

समाधानम्..., कर्म अग्निहोत्रादि।'' इसका 'वाक्यभाष्य' इस प्रकार है–''तपो ब्रह्मचर्यादि, ...कर्म अग्निहोत्रादि''।

''केनोपनिषद् में जिस ब्रह्मविद्या का प्रतिपादन किया गया है, उसके लिए वीर माहेश्वरों तप, कर्म, जप (रुद्रादि का अभ्यास) और शिवध्यान ये पाँच यज्ञ प्रतिपादित हैं, जिनमें 'तप' प्रधान है। यहाँ 'तप' का अर्थ है परब्रह्मस्वरूप शिव को प्राप्त करने के लिए अपने शरीर को दुर्बल करना। कृच्छ्र, चान्द्रायण आदि व्रतानुष्ठान द्वारा शरीर शोषण 'तप' नहीं है। शिवपूजन ही 'कर्म' नाम से पाँच यज्ञों में द्वितीय परिभाषित और परिगणित है, क्योंकि उसी का फल शाश्वत है। उससे भिन्न अत्यन्त खर्चीला और परिश्रमसाध्य ज्योतिष्टोम याग अथवा शाङ्करसम्मत अग्निहोत्र आदि 'कर्म' में परिगणित नहीं है, क्योंकि उनका फल नश्वर है''। ब्रह्मश्री शङ्करशास्त्री जी का आशय यही है और इस सन्दर्भ में वे 'पारमेश्वरागम' का उक्त वचन उद्धृत करते हैं। मुण्डकोपनिषद् के प्रारम्भ में—

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाऽक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः।।

यह शान्ति मन्त्र जिसका सामान्य अर्थ इस प्रकार है–''देवताओं! हम कानों से मङ्गल सुनें, आँखों से मङ्गल देखें, क्योंकि हमलोग यज्ञ-यागादि अनुष्ठान करते हैं। दृढ हस्तपाद आदि अवयवों द्वारा और मनुष्य योनि में प्राप्त शरीर द्वारा देवताओं द्वारा उनके हित में निर्धारित आयुर्मर्यादा का उपभोग करें''। किन्तु इस अर्थ से ब्रह्मश्री शङ्कर शास्त्री सहमत नहीं हैं। ''वे उसका अर्थ इस प्रकार करते हैं–'हे इन्द्रियाभिमानी देवों! हम अपने कानों से 'सर्वमङ्गलास्पद शिव, अर्थात् उससे अभिन्न 'नमः शिवाय' यह पञ्चाक्षर मन्त्र सुनें। शिव के इष्टलिङ्ग का दर्शन करें''। आगे वे व्याख्या करते हैं– ''स्थिरैः नित्यैः, अङ्गैः सर्वज्ञत्वादिषडङ्गैः सह वर्तमानम्; 'सर्वज्ञता तृप्तिरनादिबोधः' (पारमे. ६.३३) इत्याद्यागमोक्तैः। उक्तञ्च तेषां नित्यत्वम् ऋग्वेदे–''स्थिरेभिरङ्गैः पुरुरूप उग्रः'' (ऋ. २.२.१७) इति। तस्मान्नात्र स्थिरत्वविशिष्टाङ्गशब्दस्योपासककरचरणाद्यवयवपरत्वं पराभिमतं वक्तव्यम्। भद्रम् इष्टलिङ्गरूपं शिवम्, यजत्राः धारयकाः, 'यज् देवपूजासङ्गतिकरणदानेषु' इति यज् धातोः सङ्गतिकरणरूपधारणार्थकत्वात्।'' इति।

इसका तात्पर्य यह है कि इष्टलिङ्ग के रूप में अवस्थित परमशिव को अपने वक्षःस्थल पर धारण करते हुए, जो (इष्टलिङ्ग) नित्य सर्वज्ञत्व आदि महेश्वर के छः अङ्गस्थलों से अभिन्न हैं, अपना निर्धारित जीवन-यापन करें। इसमें वे 'सर्वज्ञता तृप्तिरनादिबोधः' इत्यादि पारमेश्वरागम के वचन को उद्धृत करते हैं।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इस वचन का शास्त्री जी को पुनः स्मरण, 'यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः' (१.१.९) इस मन्त्र की व्याख्या के अवसर पर होता है। 'यः सर्वज्ञः सर्ववित्' इसका शाङ्करभाष्य इस प्रकार है–"य उक्तलक्षणोऽक्षराख्यः सर्वज्ञः सामान्येन सर्वं जानातीति सर्वज्ञः, विशेषेण सर्वं वेत्तीति सर्ववित्" इति।

इसका आशय यह है कि "जो अक्षर ब्रह्म सामान्य रूप से सब जानता है, वह 'सर्वज्ञ' है। जो विशेष रूप से सब जानता है, वह 'सर्ववित्' है"। आनन्दगिरि इसकी व्याख्या इस प्रकार करते हैं–"समष्टिरूपेण मायारूपेणोपाधिना सर्वज्ञः, व्यष्टिरूपेण अविद्याख्येनोपाधिना अनन्तजीवभावमापन्नः सर्ववित्"। अक्षरब्रह्म सृष्टि के पूर्व निरुपाधिक (उपाधियुक्त) हो जाता है। सृष्टि के प्रथम क्षण में वह समष्टि रूप से माया नामक उपाधि से युक्त होता है, उस समय उसे 'सर्वज्ञ' कहते हैं। उसके अनन्तरवर्ती क्षणों में माया का व्यष्टिरूप प्रकट होता है, जिसे 'अविद्या' कहते हैं। 'अविद्या' के कारण अक्षर ब्रह्म अनन्त जीवों के रूप में व्यक्त होता है, जिसे 'सर्ववित्' कहते हैं।

'यस्य ज्ञानमयं तपः'–इसका शाङ्करभाष्य इस प्रकार है–"यस्य ज्ञानमयं ज्ञानविदारमेव सार्वज्ञलक्षणं तपो नाऽऽयासलक्षणम्"। जिस अक्षरब्रह्म की सर्वज्ञता ही उसका 'तप' ही, कठिन श्रमजन्य 'तप' तप की कोटि में नहीं है, यही इसका आशय है।

ब्रह्मश्री शङ्करशास्त्री जी की व्याख्या इससे भिन्न है, जो इस प्रकार है–"यः सर्वज्ञः परशिवः, 'कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहित इति कोशावगतरूढ्या सर्वज्ञशब्दस्य शिव एव प्रसिद्धत्वात्। सर्ववित् सर्वं विश्वं वेत्तीति सर्ववित्। सर्वस्व-सामानाधिकरण्येन सर्वस्वावच्छेदेन सर्वज्ञानाद्यङ्गः। न हि निरतिशयसर्वज्ञत्वं शिवातिरिक्त-विष्णवादिदेवेषु सम्भवति। ...सर्वविद् इत्येतद्विशेषणम्, सर्वज्ञपदस्य विशेष्यमन्त्रपरत्वात्, विशिष्टबाधकसर्वज्ञपदस्य पृथग् विशेषणसमवधानात्। ...सर्ववित्पदं च तृप्त्याद्यङ्गपञ्चको-पलक्षणम्। उक्तं च पारमेश्वरागमे–"सर्वज्ञता तृप्तिरनादिबोधः' (६.३३) इत्यादि। ...यस्य सर्वज्ञत्वाद्यङ्गस्य ज्ञानमयं सृज्यमानसर्वज्ञानरूपप्रथमाङ्गमेव तपः"।

ब्रह्मश्री शङ्करशास्त्री 'यः सर्वज्ञः सर्ववित्' इसमें सर्वज्ञ पद को विशेष्य और 'सर्ववित्' पद को विशेषण मानते हैं। वे कहते हैं कि 'सर्वज्ञ' पद का परमशिव अर्थ रूढ, कोशप्रसिद्ध है। 'सर्ववित्' उसका विशेषण है, जिसका अर्थ है 'तृप्ति, अनादिबोध, स्वतन्त्रता, नित्य अलुप्तशक्ति और नित्य अनन्तशक्ति इन पाँच अङ्गों से सम्पन्न समस्त विश्व का ज्ञाता।' जो सर्वज्ञता आदि षड्विध माहेश्वर धर्मसम्पन्न है, उसका सर्वज्ञतारूप प्रथम अङ्ग ही उसका तप है। ये षड्विध धर्म परमशिव के ही हो सकते हैं, विष्णु आदि अन्य देवताओं के नहीं।"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महर्षि शौनक द्वारा ब्रह्मजिज्ञासा करने पर महर्षि अङ्गिरा ने ब्रह्मविद्या का द्विविध निरूपण किया–परा और अपरा। इनमें अपरा विद्या वेद-वेदाङ्ग-विद्या है। परा का निरूपण इस प्रकार है–'अथ परा यया तदक्षरमधिगम्यते'' (मुण्डक. १.१.५)

इसकी व्याख्या शास्त्री जी इस प्रकार करते हैं–''अथ अनन्तरं यया विद्यया महामनुरूपया, तद् अक्षरम्, अत्र तच्छब्दः 'यद्ब्रह्मविदः' (१.१.४) इत्यत्र पूर्वोक्त-यच्छाब्दार्थबोधकः। अक्षरं परशिवलिङ्गम्...अधिगम्यते प्राप्यते मा परा विद्येत्यर्थः''।

इसका तात्पर्य यह है कि ''जिस अक्षर ब्रह्म का निरूपण ब्रह्मवेत्ता करते हैं, वह अक्षर ब्रह्म जिस विद्या से जाना जाता है, वह प्रणवसहित पञ्चाक्षरी मन्त्रमहाविद्या परा विद्या है। वह पराविद्या कारणस्वरूपा है और अपरा वेदविद्या कार्यस्वरूपा है''। ब्रह्मश्री शङ्कर शास्त्री स्पष्ट घोषणा करते हैं–''प्रणवसाहित्यपञ्चाक्षरविद्यैव कारणरूपा परा विद्येति निश्चीयेत'' इसमें वे अनेक श्रुति-स्मृति-आगमों के प्रमाण वचन उद्धृत करते हैं—

तद् बीजं सर्वविद्यानां मन्त्रमाद्यं षडक्षरम्।
अतिसूक्ष्मं महार्थं च ज्ञेयं तद् वटबीजवत्।। (पारमे. ११.१०)

अर्थात् 'ॐ नमः शिवाय' यह छः अक्षरों का महामन्त्र सभी विद्याओं का बीजस्वरूप है। अर्थात् सभी विद्याएँ इस षडक्षरी मन्त्र से ही जन्म लेती हैं। इस मन्त्र को उस वट-बीज के समान समझना चाहिये, जो अतिसूक्ष्म होते हुए भी महाफल देनेवाला होता है।

नायमात्मा बलहीनेन लभ्यो न च प्रमादात् तपसो वाऽप्यलिङ्गात्।
(मु. उ. ३.२.४)

इस मन्त्रभाग में 'नायमात्मा अलिङ्गाद् वा लभ्यः' इस अंश की व्याख्या शास्त्री जी इस प्रकार करते हैं–''अयमात्मा प्रकृतः परमात्मा शिवः....अलिङ्गाद् वा–अविद्यमानं लिङ्गं यस्य सोऽलिङ्गस्तस्मादलिङ्गिनोऽवीरशैवात् न लभ्यः, किन्तु लिङ्गिनो वीरशैवाल्लभ्य इत्यर्थः, धृतेष्टलिङ्गस्य वीरशैवासाधारणलक्षणत्वात्। 'अन्यत्र नास्ति मल्लिङ्गधारणं मतवर्तिषु' इत्याद्यागमोक्तेः।''

यहाँ आगम का तात्पर्य 'पारमेश्वरागम' से है। वे सम्पूर्ण प्रमाणवचन वहाँ इस प्रकार हैं—

अन्यत्र नास्ति मल्लिङ्गधारणं मतवर्त्तिषु।
शैवस्थ एव कुर्वीत लिङ्गधारणमीश्वरि!।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मतान्तरस्थो यो मूढः कुर्यान्मल्लिङ्गधारणम् ।
स जीवन्नेव चाण्डालो मृतो नरकमश्नुते ।।
यो विना गुरुकारुण्यमिच्छया लिङ्गधारणम् ।
स जीवन्नेव चाण्डालो मृतो नरकमश्नुते ।।

(पारमे. १.७१-७३)

सम्पूर्ण सन्दर्भ का वीरशैवदर्शनसम्मत आशय यह है –"परमेश्वर शिव की प्राप्ति वीरशैव से भिन्न व्यक्ति नहीं कर सकता, क्योंकि वह लिङ्गधारण नहीं करता। जो लिङ्गधारण करता है, वह वीरशैव ही लिङ्गाङ्गसामरस्यप्रक्रिया से परमशिव का साक्षात्कार कर शिवस्वरूप हो जाता है। अन्य मतावलम्बियों के लिए लिङ्गधारण का विधान नहीं है। जो अन्य मतानुयायी बिना गुरुकृपा के स्वेच्छा से लिङ्गधारण करता है, वह जीवितावस्था में चाण्डालतुल्य होता है और देहान्त के बाद नरक में जाता है। 'अन्यत्र नास्ति' से लेकर 'मृतो नरकमश्नुते' तक 'पारमेश्वरागम' के प्रमाण वचन इसका समर्थन करते हैं।

लिङ्गधारण करना वीरशैवी का महाव्रत है और उसका अङ्ग है भस्मधारण, जैसा कि 'सिद्धान्तशिखोपनिषद्' का प्रमाणवचन है—

स्नानं कृत्वा शिवतीर्थेऽथ देहं
सर्वं भस्मोद्धूलनात् पावयित्वा । त्रिपुण्ड्रं धार्यम्।।१६।।

अर्थात् गङ्गा आदि शिवतीर्थ में प्रथम स्नान करना चाहिए, फिर समस्त शरीर को भस्मोद्धूलन से पवित्र करना चाहिए और भस्म का त्रिपुण्ड्रधारण करना चाहिए। 'पारमेश्वरागम' में भस्मधारणविधि इस प्रकार वर्णित है—

सकलीकृत्य तद् भस्म शिवपञ्चाक्षरं जपेत् ।
अग्निरित्यादिकैर्मन्त्रैः षड्भिराथर्वणोदितैः ।।
क्रमात् प्रमृज्य चाङ्गानि मूर्धादिचरणावधि ।
ततः पूर्वक्रमेणैव समुद्धृत्य च भस्मना ।।
सर्वाङ्गोद्धूलनं कुर्यात् प्रणवेन शिवेन वा ।
ततस्त्रिपुण्ड्रं देवेशि रचयेन्मूलमन्त्रतः ।।

(पारमे. १७.५२-५४)

इस वचन का अर्थ इस प्रकार है–सर्वप्रथम हाथ में भस्म लेकर शिवपञ्चाक्षर मन्त्र का जप करना चाहिए। (अर्थात् उससे उसे अभिमन्त्रित करना चाहिये) अनन्तर

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भस्मधारण करना चाहिए। उसकी तीन विधियाँ हैं–भस्मस्नान या भस्मलेपन, भस्मोद्धूलन और त्रिपुण्ड्रधारण। प्रथम–"अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योम इति भस्म, सर्वं वा इदं भस्म" आथर्वणशाखीय 'भस्मजाबालोपनिषद्' के इन छः मन्त्रों से मस्तक से चरण तक भस्मस्नान अथवा भस्मलेपन करना चाहिए। इसी क्रम से चुटकी के सहारे मस्तक से चरण तक सर्वाङ्ग में प्रणवोच्चारणपूर्वक अथवा शिवमन्त्र से भस्मोद्धूलन करना चाहिए। अनन्तर मूल मन्त्र से त्रिपुण्ड्रधारण करना चाहिए। 'त्रिपुण्ड्र' का अर्थ है तीन पुण्ड्र–तीन रेखाएँ, जिन्हें यथाक्रम ऊर्ध्वपुण्ड्र, मध्यपुण्ड्र और अधःपुण्ड्र कहते हैं। 'भस्म त्रिपुण्ड्र' को 'त्रियायुष' भी कहते हैं। इनमें ऊर्ध्वपुण्ड्र सामवेद का, मध्यपुण्ड्र यजुर्वेद का, और अधःपुण्ड्र ऋग्वेद का प्रतीक है। इसका प्रमाण वचन इस प्रकार है—

ऊर्ध्वपुण्ड्रं भवेत् साम मध्यपुण्ड्रं यजूंषि च।
अधःपुण्ड्रं ऋचः साक्षात् तस्मात् पुण्ड्रं त्रियायुषम्।।

(चन्द्रज्ञाना. ६.५८)

भस्मधारण के स्थान 'सिद्धान्तशिखोपनिषद्' में इस प्रकार वर्णित हैं—

स्थानं त्रिपुण्ड्रस्य शिरोललाट-
वक्षःस्थल-मणिबन्धेषु कूर्परे।
नाभिप्रदेशे पार्श्वयोर्गण्डप्रदेशो-
रुप्रदेशे गुल्फयोश्च क्रमात् स्यात्।।१८।।

त्रिपुण्ड्रधारण के स्थान हैं–मस्तक, ललाट, वक्षस्थल, स्कन्धयुगल, दोनों कलाइयाँ, कूर्पर, नाभि, दोनों बगल, दोनों कपोल, दोनों जङ्घायें और दोनों गुल्फ।

'भस्म' शब्द का निर्वचन 'सिद्धान्तशिखोपनिषद्' इस प्रकार करती है—

भर्त्सनात् पातकौघगिरेर्भस्मेत्याहुः। सत्यमेतत्।।१७।।

समस्त पातकसमूहस्वरूप पर्वत की भर्त्सना करने के कारण पञ्चविध भस्म को 'भस्म' कहा जाता है। इस सम्बन्ध में 'पारमेश्वरागम' कहता है—

भसनाद् भसितं प्रोक्तं भस्म कल्मषभक्षणात्।
भूतिर्भूतिकरी यस्माद् रक्षा रक्षाकरी यतः।। (१७.६०-६१)

अतः यह भक्त व्यक्ति को तेजस्वी बनाती है, पापभक्षण करती है, ऐश्वर्य प्रदान करती है और रक्षा करती है, अतः इसके यथाक्रम भसित, भस्म, भूति और रक्षा नाम

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सार्थक हैं। इसको 'क्षार' भी कहते हैं, जिसकी व्युत्पत्ति इस प्रकार है–"क्षारणात् क्षारमापदाम्' (पि. शि. ७.४-६)। आपत्तियों की क्षारण (नाश) क्षमता होने के कारण इसे 'क्षार' भी कहते हैं।

सटरायपतन हालु स्वामिमणध्यक्ष श्रीसदाशिव शिवाचार्य द्वारा विरचित 'कैवल्योपनिषद्' भाष्य में 'अणोरणीयानहमेव तद्वत् महान्' (१.२.२०) इस मन्त्रभाग का वीरशैवदर्शनसम्मत व्याख्यान इस प्रकार किया गया है–'अहमेव शिवयोगात्परः शिवोपासकोऽहमेव किञ्चिज्ज्ञत्वादिधर्मत्वाद् जीवसाक्षितया भासमानसर्वज्ञत्वाद्यसाधारणः शिव एव गुरूपदिष्टलिङ्गरूपपरमात्मेत्यर्थः। 'सर्वज्ञता तृप्तिरनादिबोधः' (पारमे. ५.३३) इत्यादिशिवागमोक्तेः अणोः सूक्ष्मात्, अणीयान् सूक्ष्मतरः, तद्वत्, तथैव, महान् महतो महीयानित्यर्थः। महद्वस्तुनोऽप्यतिमहानिति यावत्"।

इस वेदमन्त्र में उपास्य शिव और उपासक वीरशैव दोनों की एकता का प्रदर्शन है। सर्वज्ञता, तृप्ति, अनादिबोध, स्वतन्त्रता, नित्य अलुप्तशक्ति और अनन्त शक्ति ये षड्विध परमेश्वर शिव के धर्म हैं। जबकि किञ्चित्कर्तृत्व (कला), किञ्चिज्ज्ञत्व (अविद्या), अपूर्णत्व (राग), अनित्यत्व (काल) और अव्यापकत्व (नियति)–संसारी जीव के ये पाँच 'पाश' या पाँच 'कञ्चुक' हैं। परशिव की इच्छाशक्ति के संकोच से जीव विभुत्व का विस्मरण कर अपूर्णता का अनुभव करता है। स्वयं को 'अणु' समझता है, यही जीव का **'आणव मल'** है।

परशिव की ज्ञानशक्ति के संकोच से जीव अपनी सर्वज्ञता का विस्मरण करता है और किञ्चिज्ज्ञता का अनुभव करता है। इस आवरण से वह स्वयं को परशिव से भिन्न समझकर शरीर-इन्द्रिय-बुद्धि आदि में 'अहं' की भावना करता है और घर, पत्नी, पति, पुत्र आदि में उसकी 'ममता' जगती है। यह उसका **'मायीय मल'** है। परशिव की क्रियाशक्ति संकोच से जीव सर्वकार्यकर्ता को भूल जाता है और किञ्चित्कार्यता का अनुभव करता है। यह उसका **'कार्म मल'** है, जो जीव में शुभ-अशुभ वासनाओं के रूप में रहता है। ये अज्ञानस्वरूप त्रिविध मल जीव के तीन 'पाश' हैं, जिसके बन्धन में पड़कर वह 'पशु' कहलाता है, जिसका एकमात्र पति 'पशुपति' परमशिव होता है।

जब वेधा-दीक्षा, क्रिया-दीक्षा एवं मन्त्र-दीक्षा द्वारा अधिकारी गुरु वीरशैव शिष्य को दीक्षित करता है, तब वह लिङ्गधारणपूर्वक शिवोपासना में तत्पर होता है। शिवार्चन में तत्पर वह जीव शिव से इस प्रकार तादात्म्य स्थापित करता है, जिससे वह किञ्चिज्ज्ञत्व आदि जीव के सामान्य धर्मों को भूल जाता है और परमशिव में विद्यमान सर्वज्ञता आदि षड्विध धर्मों का स्वयं में साक्षात्कार करता है। उसकी चिन्त्यशक्ति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विस्तार पाती है और वह फिर परमशिवस्वरूप हो जाता है। तब वह यह अनुभव करता है—

अणोरणीयानहमेव तद्वद् महानहं विश्वमहं विचित्रम्।
पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि।।

(१.२.२०)

बादरायण के ब्रह्मसूत्र में भी इस विषय की पुष्टि होती है। ब्रह्मश्री शङ्कर शास्त्री जी 'संस्कारपरामर्श' इत्यादि सूत्र की व्याख्या के सन्दर्भ में 'पारमेश्वरागम' के वचन प्रमाणस्वरूप उद्धृत कर इस विषय को उठाते हैं। उनकी व्याख्या का आवश्यक अंश इस प्रकार है—

"ननु शूद्रस्य 'तत्त्वमस्या'दिमहावाक्यजन्यब्रह्मविद्यावामनाधिकारे तस्य मोक्षः कथं स्यादित्यत्राह—

संस्कारपरामर्शात् तदभिलापाच्च। (ब्र. सू. १.३. ३५)

(संस्कारस्य)–'पवित्रं ते विततं ब्रह्मणस्पते' इत्यादिषु शिवदीक्षासंस्कारस्य परामर्शात्। परामर्शो नाम शिवदीक्षेति वायवीये कृष्णोपमन्युसंवादपरिशीलनेन ज्ञायते।.....मोक्षमार्गभूतब्रह्मविद्यायां मनुष्यमात्राधिकारित्वज्ञापने। ....शिवसंस्कारस्य भक्तमात्राधिकारित्वमुक्तम्।...

"भक्तिमात्रपवित्रा हि सर्व एवाऽधिकारिणः" इत्यन्यत्रोक्तत्वाच्च। (पारमे. १.६२)

न च स्त्रीशूद्रादीनां शिवसंस्कारानर्हत्वेऽपि 'स्त्रीशूद्रौ नाधीयाताम्' इत्यादिना वेदाध्ययनस्यैव निषिद्धत्वे वेदार्थविचारानर्हत्वात् कथं ब्रह्मविद्यायामधिकार इति वाच्यम्, **'तदभिलापाच्च'**–तेषां शूद्रादीनां धर्माणामभावस्याभिलापात् कथनाद् इत्यर्थः। अभिलप्यते च लिङ्गोपनिषदि शिवसंस्कारसंस्कृतानां शूद्रत्वाद्यभावः। तथा–

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये चान्त्यजातयः।
लिङ्गधारणमात्रेण शिवा एव न संशयः।। (पारमे. १.५८)

"न तत्र जातिभेदोऽस्ति" (१९.४३) इति पारमेश्वरागमप्रामाण्यात्।

इसका आशय इस प्रकार है–अब यह प्रश्न उपस्थित होता है कि 'तत्त्वमसि' आदि महावाक्यों के अधिकारी शूद्र नहीं हैं, अतः उन्हें मोक्ष-प्राप्ति कैसे होगी ? इस प्रश्न का समाधान महर्षि बादरायण ने इस ब्रह्मसूत्र में किया है–'संस्कारस्य परामर्शात्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तदभावाभिलापाच्च' (ब्र. सू. १.३.३५)। इस सूत्र में 'संस्कार' शब्द का अर्थ है शिवदीक्षा-संस्कार। 'पवित्रं' ते वितत 'ब्रह्मणस्पते' इत्यादि वैदिक मन्त्रों में उसका विचार किया गया है। वायवीयसंहिता के श्रीकृष्ण-उपमन्यु-संवाद का परिशीलन करने पर यह ज्ञात होता है कि 'संस्कार' शब्द का अर्थ शिवदीक्षा-संस्कार है। जो ब्रह्मविद्या मोक्षमार्ग की ओर ले जाती हैं, उसमें मनुष्यमात्र का अधिकार होता है, शिवदीक्षा-संस्कार के अधिकारी मानवमात्र हैं, जैसा कि 'पारमेश्वरागम' का वचन है– **''भक्तिमात्रपवित्रा हि सर्व एवाधिकारिणः''** (पारमे. १.६२) सभी अधिकारी भक्तिमात्र से पवित्र होते हैं। वेदाध्ययन का अधिकार न होने पर भी, स्त्री-शूद्र भी उसके अधिकारी होते हैं, इसको 'तदभिलषणाच्च' यह सूत्रांश स्पष्ट करता है। इसका अर्थ है–उपनिषदों में यह प्रतिपादन किया गया है कि जो शिवदीक्षासंस्कार से संस्कृत होते हैं, वे शिवस्वरूप होते हैं, उनमें शूद्रत्व आदि जातिधर्म नहीं रहते। लिङ्गोपनिषद्, बृहज्जाबालोपनिषद् इत्यादि के वचन इसमें प्रमाण हैं। 'पारमेश्वरागम' की घोषणा है–

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये चान्त्यजातयः।
लिङ्गधारणमात्रेण शिवा एव न संशयः।।

(पारमे. १.५८)

अर्थात् वीरशैवधर्म के जो ब्राह्मण, क्षत्रिय, वैश्य, शूद्र और अन्त्यज लिङ्गधारण करते हैं, वे शिवदीक्षासंस्कारदीक्षित होने के कारण शिवस्वरूप हो जाते हैं, इसमें कोई संशय नहीं। **''न तत्र जातिभेदोऽस्ति''** (१९.४३) उनमें किसी प्रकार का जातिभेद नहीं रहता।

उपसंहार

इस प्रकार ब्रह्मश्री शङ्कर शास्त्री जी ने उपनिषदों एवं ब्रह्मसूत्र का वीरशैव-भाष्य इसलिए किया है, जिससे यह सिद्ध हो कि वीरशैवधर्म निगम (वेद) सम्मत भी हैं और तन्त्रागम-सम्मत भी। वे वेदबाह्य कदापि नही हैं। इस दृष्टि से श्वेताश्वरतर उपनिषद्, महानारायण उपनिषद् आदि के वीरशैवभाष्य भी मननीय है।

●

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिवतत्त्वविमर्शः

प्रो. रामकिशोरत्रिपाठी

यमाश्रिता शक्तिरमुं प्रपञ्चं
तनोति सर्गस्थितिनाशहेतुः ।
ध्यायन्ति यं योगरता मुनीन्द्रा-
स्तं नौमि तत्त्वं शिवमप्रमेयम् ।।

गच्छतीति जगत् । सततं गतिमापन्ने प्रवाहनित्यतया ध्रुवे सत्यानन्तमिथुनीकृतलोक-व्यवहारे दर्शनानि हि कर्तव्याकर्तव्यविवेकज्ञानेन तत्त्वनिश्चयेन चोपकुर्वन्ति मानवान् । तदर्थमेव तेषामुद्भवः । दर्शनानि खलु तथ्यातथ्यविवेचनपुरःसरं तत्त्वबोधं प्रति नयन्ति पुरुषान् । तेषु कानिचिद् वेदप्रमाणभूतानि परलोकसत्ताप्रतिपादकत्वाच्च 'आस्तिकानि' इत्युच्यन्ते । परलोकोऽस्तीति मतिर्यस्येति विग्रहे अस्ति इत्यव्ययात् "अस्ति नास्ति दिष्टं मतिः"[१] इति सूत्रेण ठक्प्रत्यये सति आस्तिकशब्दनिष्पत्तेः । एवमेव परलोको नास्तीति मतिरिति विग्रहे 'नास्तिक'शब्दो निष्पद्यते, आस्तिकानि तावत् न्यायः वैशेषिक-पूर्वमीमांसोत्तरमीमांसा-सांख्य-योगादीनि । नास्तिकानि च चार्वाक-जैन-बौद्धप्रभृतीनि । एतानि सर्वाण्यपि स्वस्वसिद्धान्तदिशा जगदुद्भवव्ययादिविकारं प्रतिपादयन्ति मूलतत्त्वं प्रतिबोधयन्ति ।

एतेभ्यः पृथक् प्रवृत्तानि शम्भुगिरिजासंवादभूतानि शैवदर्शनानि । शिवशक्त्योरनादितया तयोः संवादस्यानादित्वम्, संवादस्यानादित्वे तन्मूलकदर्शनशास्त्राणामनादित्वं स्वतःसिद्धम् । श्रुतिपरम्परातो लब्धानि स्वसजातीयोच्चारणसापेक्षोच्चारणविषयत्वेना पौरुषेयवाक्यानि पार्थक्येन वेदरूपाणि, अतश्चागमपदवाच्यानि । शिवस्य पञ्चमुखेभ्यो निर्गतानि पाशः पशुः पतिरित्यादिपदार्थत्रयप्रतिपादकान्यष्टाविंशत्यागमशास्त्राणि संस्कृत-वाङ्मये प्रसिद्धानि । जीवानां जन्ममृत्युरूपबन्धप्रवर्तकत्वादज्ञानमेव पाशः । तेन बद्धा आब्रह्मस्थावरान्ताः समेऽपि प्राणिनः । विहिताविहितकर्मफलमेव बन्धभूतत्वात् पाशः, तेनानुबद्धा जीवा महादेवस्य पशवः । तथा चोक्तम्—

---

१. पा. सू. ४.४.६ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः ।
पशवः परिकीर्त्यन्ते संसारपरिवर्तिनः[१] ।। इति ।

अज्ञानजन्यपाशरूपसंसारबन्धच्छेदकोऽपि शिव एव ।

तस्मात् पशुपतिं मां तु ज्ञात्वा लिङ्गार्चकः शिवे ।
छित्वा पाशानविद्योत्थान् परं निर्वाणमृच्छति[२] ।।

पतिस्तु सर्वतन्त्रस्वतन्त्रः सर्वनियन्ता शिवः । तदधीनैव शक्तिः सूयते सचराचरम् ।

सच्चिदानन्दरूपोऽसौ सर्वशक्तिसमन्वितः ।
शिवः पतिस्त्रिलोकस्य जीवः कर्मवशः सदा ।।
कर्मफलान्वितः पाशो जन्तूनां बन्धकारणम् ।
मुच्यन्ते शिवसङ्कल्पात्तस्मात्पतीति कथ्यते ।।

शिवांशभूतत्वाज्जीवः सर्वतन्त्रस्वतन्त्रोऽपि कर्मफलवशीभूतो जनिजरामृत्यवादिकं भजते । स च पाशरूपः संसारबन्धः शिवकृपया नाशमुपगच्छति । तथा चोक्तम्—

न दृश्यमातिष्ठति रूपमस्य
न चक्षुषा पश्यति कश्चनैनम् ।
मनीषिणो ये मनसाभिक्लृप्त-
मेनं विदुस्ते ह्यमृता भवन्ति[३] ।।

स च शिवेऽवेद्यत्वे सत्यपरोक्षविषयत्वात् स्वतः स्वप्रकाशोऽपि । न क्षीयते क्षरति, वाऽक्षरमक्षराणामकारोऽस्मीति गीताप्रतिपाद्याऽकारपदवाच्यः शिव एव । तदुक्तम्—

"अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः"[४] । इति ।

विश्वस्य भरणाद् वमनात् सृष्टिस्थितिसंहारकारी भैरवः परमः शिवः । भैरवो भयङ्करः सर्वनियन्तोच्यते ।

विश्वतो भरितत्वेन विकल्पानां विभेदिनाम् ।
अलं कवलनेनापीत्यन्वर्थादेव भैरवः[५] ।।

---

१. पारमेश्वरागमे, १२.६० ।
२. तत्रैव, १२. ६१ ।
३. तत्रैव, २१.२८ ।
४. सङ्केतपद्धतौ ।
५. योगिनीहृदयस्य दीपिकायाम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्रयस्त्रिंशत्कोटिदेवेषु परमश्रेष्ठभूतत्वाद् देवाधिदेवमहादेवपदवाच्यः शिव एव। तत्र देवानां क्रमशः श्रेष्ठत्वमुक्तम्, तत्र प्रथमश्रेष्ठोऽग्निदेवः, तस्माच्च ब्रह्मा, ततः श्रेष्ठो विष्णुः, तस्यापि कारणभूतत्वादनादित्वाच्च सर्वश्रेष्ठतमः शिवः। तदुक्तम्—

यथा सर्वेषु देवेषु ह्यधिको मेघवाहनः।
तस्यासीदधिको ब्रह्मा स तस्मादधिको हरिः॥
विष्ण्वादीनां च सर्वेषामधिकोऽहं परः शिवे।
मत्तः परतरो नास्ति मन्मतं तु तथैव हि[1]॥

एवं जगदुद्भवेऽपि निमित्तं शिव एवास्ति। शिवमाश्रिता हि शक्तिश्चराचरात्मकं जगत् सृजति। स एव जगदुत्पत्तिनिमित्तम्–यथा सर्वेषु देवेषु ह्यधिको मेघवाहनः।

यस्माज्जातानि भूतानि खं वाय्वग्निभूमयः।
यस्मिंश्च लयतां यान्ति सततं जयताच्छिवः॥
विकारहीनोऽपि सिसृक्षयाऽसौ
रजोमयीं शक्तिमुपाश्रितश्च।
शिवासमाराधितचित्तवृत्ति-
स्तनोति विश्वं स्वविलासहेतोः॥

अग्नेः स्फुलिङ्गा इवानादिनिधनस्वरूपाच्छिवतत्त्वादेवापृथग्रूपेणाविर्भवति जगत्। शिवतत्त्वस्य व्यापकत्वात्तस्यैव शरीरभूतमेतत् प्रपञ्चजातम्। "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः"[2] इति श्रुतिस्थतत्पदवाच्यः सर्वत्र व्यापकत्वाच्चात्मपदवाच्यः शिव एवास्ति। शिवतत्त्वादेवाकाशादिमहाभूतानि जायन्ते, तत्रैवान्ते लीयन्ते। तथा च श्रुतिः— "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति"[3] इति शिवाश्रिता तदभिन्ना च शिवशक्तिः शिवतत्त्वाभिन्नतयैवैतज्जगद् रचयति। अतः शिवशरीरमेवोच्यते जगत्।

तिष्ठन्ती या मम तनौ मच्छरीरमिदं जगत्।
जगदित्यहमित्यन्य इति भेदो न कश्चन॥
उत्पत्त्यादिस्वरूपेण मदन्यस्यावलोकनम्।
तिष्ठति स्थितये ज्ञत्वं व्यवहारः स देहिनः[4]॥

---

१. पारमेश्वरागमे, १२.७५-७६।
२. तै. उप. २.१।
३. तै. उप. ३.१।
४. पारमेश्वरागमे, २१.९०-९१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सृष्टिकालेऽपि शिव उदासीनः साक्षिभूत एवास्ते। न किञ्चिदपि विचेष्टते। तस्य शक्तिरेव सर्वं साधयति—

न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते।
पराऽस्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च[1]।।

शिवस्य प्राधान्येन शक्तीनां समवायिनीरूपेण परिग्रहरूपेण च भेदद्वयं प्रसिद्धम्। निर्विकारा चिद्रूपा समवायिनी शक्तिर्नित्यं परमशिवे समवेता। परिग्रहशक्तिस्त्वचिद्रूपाऽपि परिणामशालिनी। सैव बिन्दुरित्युच्यते। शिवसामर्थ्यमेव शक्तिः। तच्च शिवस्वरूपम्। यथा वस्तुस्वरूपं वस्तुनोऽभिन्नम्, तथैव शिवस्वरूपं शिवाभिन्नमेव। कथञ्चिदपि वस्तुतत्स्वरूपयोर्भेदमाकलयितुं न शक्यते। शुद्धाशुद्धात्मना बिन्दुरूपायाः परिग्रहशक्ते रूपद्वयं प्रसिद्धम्। तत्र शुद्धबिन्दुरूपिणी महामाया, अशुद्धबिन्दुरूपिणी माया, अनयोश्चेयान् भेदः—सात्त्विकजगदुपादानं महामाया, प्राकृतजगदुपादानं मायेति व्यवहारः।

अचिदात्मकपरिणामशालिबिन्दोश्चिदात्मके शिवे समवायसम्बन्धो नैवाभिमतः, अन्यथा शिवस्याप्यचिदात्मकतापत्तिः स्यात्।

जायतेऽध्वा यतः शुद्धो वर्तते यत्र लीयते।
स बिन्दुः परनादाख्यो नादबिन्द्वर्णकारणम्[2]।।

तत्र बिन्दोः शिवेन सह तादात्म्यसम्बन्धे सत्यपि न शिवे बिन्दुगतजडत्वमारोप्यते, न च तस्य चैतन्यं व्याहन्यते, शिवस्याविकारित्वात्।

स हि तादात्म्यसम्बन्धी जडेन जडिमावहः।
शिवस्यानुपमाखण्डचिद्घनैकस्वरूपिणः[3]।।

परमशिवस्य बिन्दुस्वरूपनिरूपणम्

सर्वविकारशून्यत्वादव्ययो बिन्दुरुच्यते।
मात्रा ततो भवेच्छक्तेः क्रियावृत्त्यवधारणात्।।
सोपाधिकः शिवो बिन्दुः शुद्धश्च परमः शिवः।
बिन्दुस्वरूपमासाद्य जगदेतत् प्रवर्तते।।

---

१. श्वेता. उप. ६.८। २. रत्नत्रये, २२।
३. तत्रैव, २३।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सृष्टिप्रक्रियाप्रतिपादने पूर्वप्रवर्तनारूपत्वात्प्रलयोऽप्यनुसन्धेयः। तत्र प्रलयो नामानन्तशक्तिकस्य ब्रह्मणः स्वरूपमात्रे किञ्चित्कालमवस्थानम्। तद्यथा–सुषुप्तिकाले जीवा अज्ञानान्धकारे निमग्ना न किञ्चिदपि विदुः, पुनश्चोत्थिता यथापूर्वं संसारमनुभवन्ति, तद्विषये च प्रवर्तन्ते। सुषुप्तिश्चाल्पो लय इत्युच्यते, तत्र जाग्रत्स्वप्नोभयविधप्रपञ्चस्य सुषुप्तिकाले लयात्। ब्रह्मणः सुषुप्तिकाले हि समेषां जीवानां प्रपञ्चोपशमनाद् महालय उच्यते। तत्रेयान् भेदः—तत्तज्जीवानां सुषुप्तिकाले तत्तत्प्रपञ्चोपशमः। ब्रह्मणः सुषुप्तिकाले तु सर्वप्राणिनां प्रपञ्चो लीयते, पूर्वसृष्टिदशायां ज्ञानविरहादमुक्ता जीवास्तददृष्टानि पञ्चमहाभूतानां सूक्ष्मरूपाणि च कार्पासबीजे पटा इव सूक्ष्मरूपेण सुषुप्तिमापन्ने प्रलयकालीनब्रह्मणि तिष्ठन्ति। जाग्रिते च ब्रह्मणि यथापूर्वं भूतानि प्रपद्यन्ते मानवाश्च स्वे स्वे कर्मणि प्रवर्तन्ते। स च लयः परमशिवस्वरूपं शेते विश्वं यस्मिन्निति व्युत्पत्तेः। लयस्थानी शिवो बिन्दुस्वरूपमेवास्ति। बिन्दुस्वरूपे शिव एव सर्वं विश्वं लीयते।

संस्थिते मय्यधिष्ठाने निस्तरङ्गसुखाम्बुधौ।
सञ्जायन्ते विलीयन्ते नामरूपात्मबुद्बुदाः[१]॥

स च बिन्दुः सर्वविकारशून्योऽपि वासनावशीभूतः प्रपञ्चाकारेण भासते। तत्र वासनाया जनिका, इच्छाज्ञानक्रियारूपा परा शक्तिः, यया चोदितः शिवः कर्मत्रयं भजते। "सदेव सोम्येदमग्र आसीदेकमद्वितीयम्"[२] इति श्रुतिविषयो नित्योऽद्वितीयः सद्रूपश्च बिन्दुरिच्छाशक्तिवशात् "तदैक्षत बहु स्यां प्रजायेय"[३] इति श्रुतिप्रतिपाद्यो भवति। ततश्च क्रियाशक्तिवशात् "तत्तेजोऽसृजत"[४], "स तपोऽतप्यत"[५] इति श्रुतिबोधितः कर्मणि प्रवर्तते।

निरवच्छिन्नः शुद्धो बिन्दुः परमशिवरूपः, शक्त्युपहितश्च जगदुत्पत्तौ निमित्तम्। तस्मिन्नेव सोपाधिके बिन्दुरूपे शिवे घटपटादिबाह्यविषया भासन्ते। तत्रापि शिवाभिन्ना शक्तिरेवोपादानम्। शक्तिरेव बिन्दौ वासनावशात् क्षोभमुत्पादयति। ततश्च बिन्दोस्त्रिकोणचक्रं जायते, तच्च चक्रं त्रिधा विभज्यते। त्रिधा विभक्तस्य पुनरेकैकरूपस्य त्रिरूपत्वं प्रतिपद्यते। एकमेव त्रिकोणं सृष्टिलयभेदेन शक्तिवह्नित्रिकोणतामुपगतं धर्माधर्मभेदेन, आत्मभेदेन, मातृमेयभेदेन, प्रमाभेदेन च नवधा भवति। तत्र पुण्यपापे, आत्मनश्चत्वारो भेदाः आत्मा, अन्तरात्मा, परमात्मा, ज्ञानात्मा, माता जीवः, मेयो ग्राह्यविषयः, प्रमा ज्ञप्तिरिति नवरूपाणि चक्रस्य। तदुक्तम्–

---

१. पारमेश्वरागमे, १३.२।
२. छान्दोग्यो, ६.२.१।
३. तै. उ. २.६।
४. छान्दोग्यो, ६.२.३।
५. तै. उ. २.६।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बैन्दवं चक्रमेतस्य त्रिरूपत्वं पुनर्भवेत्।
धर्माधर्मौ तथात्मानो मातृमेयौ तथा प्रमा।।
नवयोन्यात्मकं चक्रं चिदानन्दघनं महत्।
चक्रं नवात्मकमिदं नवधा भिन्नमन्त्रकम्[१]।। इति।

त्रिगुणात्मिकया शक्त्या बिन्दुः पूर्वं त्रिधा विभज्यते। त्रयो हि सत्त्वतमोरजोरूपाः। तत्र रजः क्रियात्मको गुणस्तत्सम्बलिता क्रियात्मिका शक्तिर्महाकालीत्युच्यते। तया सम्मोहिता आब्रह्मदेवा असुरा मानवाश्च। सम्मोहात् क्षोभ उत्पद्यते, क्षोभः सृष्टेः कारणम्। तथा हि तया शक्त्या बिन्द्वात्मके शिवे क्षोभ उत्पाद्यते। स च क्षुब्धः क्रियात्मको रजोगुणप्रधानो बिन्दुर्हिरण्यगर्भ इत्युच्यते। तस्यैव प्रथमोऽभिभवः। ततश्चाकाशादिमहाभूतानामुत्पत्तिः। तथा चोक्तमृग्वेदे—

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम[२]।।

हिरण्यगर्भ एव प्रथमः शरीरी। स वै पुरुष इत्युच्यते। स हि आदिकर्ता भूतानां प्रथमं समजायत। तस्य विराट्पुरुषस्य सर्वभूतान्तरात्मत्वं संसिद्धम्। प्राणात्मना सर्वभूतानामहमात्ममवस्थानात्। प्राणो बिन्दुर्हि भूतानां तदन्तर्भूताश्चाकाशादयो महाभूताः। बिन्दुतत्त्वात् प्रथमं ज्योतिःपुञ्जभूतमग्नितत्त्वं जायते। स च परमप्रकाशभूतत्वाद् विराडित्युच्यते, विशेषेण राजत इति व्युत्पत्तेः। बिन्दुतत्त्वं सर्वत्र व्यापकत्वादधिपुरुष उच्यते। पुर आसीदिति व्युत्पत्त्या पुरुषः परमशिवः। पुरि देहे शेत इति व्युत्पत्त्या शिवांशभूतो जीवः पुरुषः। 'पुरुषेषु' इति विग्रहे विभक्त्यर्थेऽव्ययीभावे समासे सति 'अधिपुरुष'शब्दो निष्पद्यते। एतेन सर्वभूताभिव्यापकत्वं बिन्दोः संसिध्यति। तस्माद् विराट्पुरुषादेव महाभूतानां जडजङ्गमजीवानामुत्पत्तिः। स चानादित्वात् सर्वविकारशून्यत्वाच्च परमशिवपदवाच्यः। शक्त्युपहितश्च विराडित्युच्यते। तथा चोक्तं पुरुषसूक्ते—

ततो विराडजायत विराजोऽधिपूरुषः।
स जातोऽत्यरिच्यत पश्चाद्भूमिमथो पुरः।।
नाभ्याऽऽसीदन्तरिक्षं शीर्ष्णोः द्यौः समवर्त्तत।
पद्भ्यां भूमिर्दिशः श्रोतात्तथा लोकानकल्पयन्।।

---

१. योगिनीहृदये १.१२-१३। २. ऋ. सं. १०.१२१.१।
३. पुरुषसूक्तम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रोऽजायत ।।[3] इति।
विराडन्तर्भूतमेवैतज्जगत् तस्माज्जातं तस्मिन्नेवास्ते।
एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी[1]।।

तस्य कोशभूतमन्तरिक्षं तेनावृतं सर्वं विभाति। तस्य कोशस्याविनाशिपृथिवीतत्त्वं दिशाश्च कोशभूता, द्यौरस्योर्ध्वबिलम्, अन्तरिक्षोदरः कोशो भूमिबुध्नो न जीर्यति। दिशो ह्यस्य शक्तयो द्यौरस्योत्तरं बिलम्,[2] तस्मादेव पुरुषात् सर्वे गिरयः सर्वाश्च नद्यः समुद्रादयो जायन्ते। सर्वा ओषधयो रसाश्च तत एवाविर्भवन्ति—

अतः समुद्रा गिरयश्च सर्वेऽ-
स्मात् स्पन्दन्ते सिन्धवः सर्वभूताः।
अतश्च सर्वा ओषधयो रसाश्च
येनैव भूतैस्तिष्ठते ह्यन्तरात्मा[3]।।

पुरुष एवेदं विश्वं सर्वम्। न विश्वं नाम पुरुषादन्यत्किञ्चिदस्ति। "पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्"[4]। पुरुष एवेदं विश्वमिति मतान्तरे न सम्भवति, जीवानामनादित्वेन पुरुषोपादानकत्वासम्भवाद् अभेदानङ्गीकाराच्च। शैवदर्शने हि जीवानां शिवांशभूतत्वाज्जगतश्च शिवशरीरत्वस्वीकारान्न दोषः। अतः पुरुषः शिवः।

बिन्दुतत्त्वादेव शब्दार्थात्मकव्यवहारः

बिन्दुतत्त्वात् समुद्भूतं शब्दतत्त्वं शिवात्मकम्।
अर्थो व्यवहृतिर्लोके तयोरभेद उच्यते।।
शक्तिः शब्दः शिवो वाच्यो व्यवहारो जगत् कथ्यते।
ज्ञानेनापहृते लोके शिव एकोऽवशिष्यते।।

शिवात्मके बिन्दुतत्त्वे माया क्षोभमुत्पादयति, क्षुब्धो बिन्दुः शब्दत्वमापद्यते। सा च शक्तिर्वासनामयत्वादर्थतामाभजते। व्यक्ताव्यक्तभेदेन बिन्दो रूपद्वयम्। तत्राव्यक्त-बिन्दुर्निरुपाधिकः परमशिवः, मायोपहितश्च शब्दार्थात्मकव्यवहारे कारणम्। तत्राव्यक्तो बिन्दुर्वैयाकरणनये स्पन्दशून्या सर्वविकल्पातीता शब्दार्थोपसंहृतरूपा परावागित्युच्यते।

---

१. मुण्ड. २.१.३।
२. छान्दो. ३.१५.१।
३. मुण्ड. २.१.९।
४. तत्रैव, २.१.१०।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स च परमब्रह्मस्वरूपा। ततश्च बिन्दोर्मायोपहिततया स्थूलपश्यन्त्यां कश्चिदस्पष्टरूपोऽभिव्यज्यते स च समाधौ योगिभिर्वेद्यो भवति। ततश्च "तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत"[१] इतीक्षणशक्त्यात्मकोऽर्थप्रकाशकः स्फोटपदवाच्यो मध्यमानादोऽभिव्यज्यते। स च नादो जपादौ कर्णपिधाने च स्पष्टतया प्रतीयते। उक्तं च—

शब्दरूपपदार्थस्य शब्दः स परमः स्मृतः।
सङ्कल्पपदवीरूढः स्फुरत्यन्तःस्थितः स्फुटम्[२]।। इति।

सोऽपि प्राकृतवैकृतभेदेन द्विधा विभज्यते। अयमेवार्थवाचकः शब्दः, तत्रापि बौद्धार्थेन सह तादात्म्यं स्फोटाख्यशब्दस्य। शब्दार्थोभयोरपि स्फोटपदवाच्यत्वं संसिद्धम्। तत्र स्फुटत्यर्थो यस्मादिति व्युत्पत्त्या स्फोटः शब्दः। स्फुटत्यसौ स्फोट इति व्युत्पत्त्या अर्थः स्फोटः। नादादेव व्यक्तबिन्दुरुत्पद्यते स च कारणं वर्णात्मकसृष्टेः। प्रथमं शिवेच्छया महामायायां क्षोभो भवति, ततो नादोत्पत्तिः, नादाद् बिन्दुः, बिन्दोरक्षरम्, अक्षरान्मातृका चेति। तथा हि—

नादो सूक्ष्मो भवेद् बिन्दुः पश्यन्ती मध्यमाक्षरम्।
मातृका वैखरी ज्ञेया नादाद्यास्तु शिवादयः[३]।। इति।

आसां वृत्तीनामाश्रयभूता निवृत्त्यादयः पञ्च कला बिन्दुभूतशिवस्य कार्याणि। एषा च महामाया शब्दवस्तूभयात्मिका भवति, शब्दात्मकानां वर्णपदमन्त्राणां कलातत्त्वभुवनानां वस्तुरूपाणां चोत्पत्तिकारणात्। अव्यक्तबिन्दुः परमात्मा च निरपेक्षव्यापको निर्गुणश्च, तत्र वाक्प्रवृत्तिर्न भवति 'यतो वाचो निवर्तन्ते'[४] इति सिद्धान्तात्। व्यक्तबिन्दुविषयिकैव वाक्प्रवृत्तिः। वर्तुलरेखाकृतोपाधिना परमशिवस्य सगुणत्वमायाति। बिन्दुशब्दोच्चारणेनैव मनस्येका वर्तुलाऽऽकृतिः प्रादुर्भवति। तथैव हस्तेन पत्रपटादिष्वाकारो निष्पाद्यते। लेखन्या यदेकं महच्छून्यं विलिख्यते, तद् बिन्दोः स्थूलाऽऽकारोऽस्ति। स चाकार एषः अस्ति। तस्मिन्नाकारे या कृष्णरेखा दृश्यते न सा बिन्दुः, किन्तु तदन्तर्गतः श्वेतभागो बिन्दुः। बाह्यया वर्तुलरेखया तस्य बिन्दुत्वं सम्पादितम्। बाह्यसीमा वृत्तरेखा तदन्तःपाती भागो बिन्दुः। इदमेव बिन्दोर्व्यक्तं स्वरूपं मन्तव्यम्। रेखायां तिरोहितायां तु बिन्दोरव्यक्तं स्वरूपमायाति। तथा चोक्तम्—

व्यापिका बिन्दुविलसत्त्रिकोणाकारतां गता।
बिन्दुद्वयान्तरालस्था ऋजुरेखामयी पुनः।।

---

१. छन्दो. ६.२.३।
२. उ. स्पन्दप्रदीपिकायाम्, पृ. २९।
३. सिद्धान्तरत्नसारे, पृ. ५३।
४. तै. उ. २.५.१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समना बिन्दुविलसदृजुरेखा तथोन्मना ।
शक्त्यादीनां वपुः स्फूर्जद्द्वादशादित्यसन्निभम्[1] ।। इति ।

व्यक्तबिन्दुश्च स्वस्थानमपरित्यजन् गतिरूपोपाधिनाऽव्यक्तरेखात्रयात्मको व्यक्तरेखारूपो भवति । यथा नदी स्वयं प्रवाहरूपेण मध्यरेखा भूत्वा द्वाभ्यां पक्षाभ्यां द्वे तटे रेखारूपे कृत्वा रेखात्रयवती सती प्रवहति, तथैव या एका रेखा दृष्टिपथमायाति, तिसृणामव्यक्तरेखाणां जननी, उभयोः पार्श्वयोर्द्वे रेखे मध्ये चैकेति सिद्धान्तात् । एवमेव सगुणपरमात्मा– "सोऽकामयत बहु स्याम्" इत्युत्थानरूपेणोपाधिनाऽव्यक्तगुणत्रयात्मकमायारूपेणाविर्भवति ।

व्यक्तबिन्दुश्च प्रकृतिपुरुषोभयात्मकः । स्वस्थाने निश्चलोऽयं बिन्दुः, तस्मिन् मायास्थिततमोगुणरूपजडोपाधेः सत्त्वात्, तत्रोपाधौ परमात्मनः स्वदेशोऽभिव्यक्तः । यदा स एव बिन्दुर्गतिं प्राप्य रेखारूपोऽभवत्, तदा मायास्थचलनवलनात्मकरजोगुणवशात् परमात्मनः सदंशेन सह चेतनांशोऽप्यभिव्यक्तः । तत्तु रेखाया विकृतिरूपोपाधिना बिन्दुरक्षररूपोऽभवत् । तत्र तत्र मायास्थसत्त्वगुणोपाधिना परमात्मन आनन्दांशोऽप्यभिव्यज्यते । यथा शक्तिविशिष्टः स्फोटात्मकशब्दस्तथा बौद्धार्थोऽपि शक्तिविशिष्टस्तयोरभेद इति शक्तिविशिष्टाद्वैत इत्युच्यते । शक्तिशक्तिमतोरभेदः शिवशक्त्योरप्यभेदः ।

प्राणिनां मैथुनिकसृष्टिरपि बिन्दुतत्त्वादेव

स्त्रीपुरुषसंयोगाच्छुक्रशोणितमिश्रणम् ।
बिन्दुद्वयोद्भवो गर्भः स शिवांश इति स्मृतः ।।
शिवरूपः सदा बिन्दुः शोणितः शक्तिरूपभृत् ।
शक्तेश्च शिवरूपत्वादुभयत्र शिवांशता ।।

स्त्रीपुरुषयोः सामरस्यदशायां यदा ब्रह्मरन्ध्रस्थितः शुक्रबिन्दुः काममन्दिरं प्रविष्टः शोणबिन्दुनैकीभवति, तदैव बाह्याभ्यन्तरभानहीनमानन्दमात्रावशेषं ब्रह्मैव भासत इत्यनुभवसिद्धम् । सुषुप्तिदशायां या आनन्दात्मिकाऽज्ञाननिवृत्तिर्न सा सामरस्यानन्देन समा । तथा च श्रुतिः "यथा प्रियया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्"[2] इति । तादृशसामरस्यनिष्ठस्यानन्दात्मकत्वे सति गर्भोत्पादकत्वरूपसाधारणधर्मस्य सृष्टिप्राक्कालिक-शिवशक्तिसामरस्येऽपि दर्शनाल्लौकिकप्रक्रियैवाप्यूह्या ।

तत्र यो ब्रह्मरन्ध्रस्थितो बिन्दुः स निःशेषेण न कामालयं प्रविशति, किन्त्वंशरूपेण, अन्यथा पुनः सामरस्यानापत्तेः, ततश्च विधिबिलस्थितो बिन्दुस्तुरीयबिन्दुरभिधीयते ।

---

१. योगिनीहृदये १.३२-३३ ।
२. बृ. उ. ४.६.५ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तदंशो मन्दिरस्थितस्तु कामाख्यो बिन्दुर्यः कामेश्वर इत्युपासकैश्चिन्त्यते। अत एव काममन्दिरनामधेयादीनि सम्भवन्ति। कामबिन्दोः शोणबिन्दुना सह परस्परानुप्रविष्टत्वे सति विस्पष्टत्वे बिन्दुद्वयात्मकः सर्गः सम्पद्यते, शिवमात्रस्य शक्तिमात्रस्य सृष्ट्यादिजनकत्वायोगात्। स च सर्गः शिवांशात्मकः, यथा परशिवाङ्गीकारस्यैव वैयर्थ्यापत्तेः। उक्तं च कामकलाविलासे—

शिवशक्तिमिथुनपिण्डः कवलीकृतभुवनमण्डलो जयति।
सितशोणबिन्दुयुगलं विविक्तशिवशक्तिसङ्कुचत्प्रसरम्[1]॥

स च बिन्दुतत्त्वात्मकः शिवः पारमेश्वरागमेऽव्यक्तरूपोऽपि सन् व्यक्तवियदादिमहाभूतानां बीजरूपत्वेन स्वीकृतः—

अमूलमेकमव्यक्तं व्यक्ताधारं वियत्परम्।
सर्वान्तर्यामिणं देवं सच्चिद्घनमयं विभुम्[2]॥

शिवांशभूतजीवतत्त्वविमर्शः

यथा स्फुलिङ्गा ज्वलनप्रवाहा-
दभिन्नरूपाः प्रसरन्ति वह्नेः।
तथा हि जीवाः शिवतत्त्वमूला-
स्तदंशभूताः प्रचरन्ति लोके॥

शैवागमे भगवतः शिवस्य निमित्तकारणत्वमेवाभ्युपेयते। यथा घटादिकार्ये कुलालस्य निमित्तकारणता, दण्डचक्रादीनां सहकारिकारणता, मृदादीनामुपादानत्वम्, तद्वदत्रापि कारणत्रयं प्रसिद्धम्। शिवो निमित्तकारणम्, शक्तिः सहकारिकारणम्, बिन्दुश्चोपादानकारणमिति। बिन्दुरेव जडात्मना जगद्रूपेण चैतन्यात्मना च जीवरूपेण परिणमते। बिन्दुतत्त्वस्य शिवाभिन्नतया जगदेतच्छिवशरीरं जीवश्च शिवांश इत्युच्यते। आब्रह्मकीटपतङ्गपर्यन्तं यावन्तः प्राणिनः सर्वेऽपि शिवांशभूता एव सन्ति। उक्तं च पारमेश्वरागमे—

राक्षसा यक्षरक्षांसि मनुष्याः पशवः खगाः।
क्रिमिकीटपतङ्गाद्या अहमेव वरानने[3]॥

पतिरिव पशुरपि व्यापकोऽनश्वरश्चेतनश्चास्ति, परश्च शिवोऽनीश्वरस्तदतिरिक्त-

---

१. कामकलाविलासे। २. पारमेश्वरागमे, २१.२२।
३. तत्रैव, ३८.२३।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्यैश्वर्याभावात्। जीवश्च शिवाधीनसामर्थ्यतया सेश्वरः। सर्वज्ञः पतिः पशुश्चाल्पज्ञः। अज्ञानेनावृतात्मतया समलोऽपि जीवः। कर्तव्याकर्तव्यकर्मणां फलमपि जीवो भुङ्क्ते, इयानेव भेदः पशुपत्योरिति।

देहान्योऽनश्वरो व्यापी विभिन्नः समलोऽजडः।
स्वकर्मफलभुक् कर्ता किञ्चिज्ज्ञः सेश्वरः पशुः[१]॥

पशोस्त्रैविध्यम्

स च जीवोऽण्डः, दृक्क्रियारूपचैतन्यस्वरूपश्चास्ति। तच्चैतन्यं मलावृतत्वान्न प्रकाशते। विज्ञानाकलप्रलयाकलसकलभेदेन पशुस्त्रिविधः कीर्त्यते। तत्र भोगादिना कर्मक्षये सति कलादिभोगसम्बन्धाभावात् केवलमलमात्रयुक्तो विज्ञानाकल इत्युच्यते, प्रलयेन कलादेरुपसंहाराद् मलकर्मयुक्तः प्रलयाकलो मलमायाकर्मात्मकबन्धत्रययुक्तः सकल इति व्यवह्रियते।

केवलसकलामलादिभेदेन पशोरवस्थात्रयं प्रतिपद्यते। उक्तं च स्वायम्भुवागमे—

अथात्माऽविमलो बद्धः पुनर्मुक्तश्च दीक्षया।
विज्ञेयः स त्रिधावस्थः केवलः सकलोऽमलः[२]॥

अत्रात्मशब्दो जीवपरः, स चात्मा केवलः सकलोऽमल इति चावस्थात्रितयसहितो वर्तते। तत्र प्रथमो विमलो न भवति, इत्यविमलोऽत्यन्तमलिनः केवलावस्थ इत्यर्थः, बद्धः कर्मानुरक्तः कलादिबन्धनेन बद्धः सकलावस्थः, पुनश्च दीक्षया कलादिबन्धान्मुक्तः, अमलावस्थः शुद्ध इत्युच्यते।

अमूर्तः स पशुर्नित्यो निर्गुणो निष्क्रियोऽप्रभुः।
मायोदरगतो व्यापी भोगोपायेष्वशक्तितः॥
स केवलस्त्विति प्रोक्तः स्वापवान् मलबन्धनात्[३]॥

केवलावस्थो जीवो व्यापकः सन्नपि मायोदरे स्थितो भोगोपायेष्वशक्तः प्रोच्यते। स च भोगैकरसिकः कर्मवशतो भुवनजदेहेषु सर्वेषु भ्रमति। केवलावस्थायां जीवस्य कलानां राहित्यं भवति। "कलानां निलयो यस्मात् तेनासौ केवलः स्मृतः" इति सर्वज्ञानोत्तरानुसारेण जीवस्य कलाराहित्याच्चेतनोऽप्यचेतन इव भाति। सकलावस्थायां जीवो बद्धोऽहमिति मत्वा भवबन्धनिवृत्तये परिचिन्तयति। इदमेव वैशिष्ट्यं केवलावस्थातः सकलावस्थायाः।

---

१. पराख्यसंहितायाम्। २. स्वायम्भुवागमे।
३. तत्त्वसङ्ग्रहे।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संसारी विषयी भोक्ता क्षेत्री क्षेत्रज्ञ एव च ।
शरीरी चेति बन्धात्मा सकलः प्रोच्यते बुधैः ।।

बन्धविमुक्तये सततं यतमानं जीवात्मानं यदा परमेशः शिवोऽनुगृह्णाति, तदा जीवो विगतसकलकल्मषतयाऽमलो भवति । सोऽयममलावस्थापन्नो जीवो मुक्त इत्युच्यते ।

अशरीरं यदात्मानं पश्यति ज्ञानचक्षुषा ।
तदा भवति शान्तात्मा सर्वतो विगतस्पृहः[१] ।।

स च जीवः सर्वत्र शक्तिविशिष्ट एवास्ति । शक्तिविशिष्टजीवात्मनः शक्तिविशिष्टशिवेन सहाभेदः ।

पाशस्वरूपविमर्शः

शिवरूपं सदा जीवं पाशो बध्नाति कर्मभिः ।
बद्धो पशुत्वमापन्नो यावत्कर्मक्षयो भवेत् ।।
सृष्टिस्थितिलयानां हि पाशः कारणमुच्यते ।
मलकर्मादिभेदेन तस्य रूपचतुष्टयम् ।।
बीजभूतो मलः प्रोक्तो यतो जगत् प्रवर्तते ।
कर्मणा तस्य रक्षा स्यान्माया जगद्विनाशिनी ।।

शिवस्य शक्तिस्वरूप एव पाशः । तत्र मलाख्यपाशो देहाद्युत्पत्तौ कारणम् । यथा व्रीह्यादीनां तुषमङ्कुरजनने कारणम्, अङ्कुरोत्पत्तौ सत्यं च स्वयमेव निवर्तते । एवं मलाख्यपाशो देहादिसमुत्पत्तौ कारणम् । यथा ताम्रपात्रस्य मलो जम्बीररसेन निवर्तते, तथैव जीवात्मसम्बन्धिमलः शिवसायुज्यरसेन निवर्तते ।

विहिताविहितकर्मफलवशात् प्राणिनां जनिः, अतः कर्माण्यप्यनुबन्धकत्वात् पाशा एव सन्ति । प्रलये सर्वं जगदस्यां मातीति माया, अथवा सर्वं जगद् यतो मयति सा माया इति व्युत्पत्तिद्वयेन द्विविधो मायापदार्थो लक्ष्यते ।

शक्तिरूपेण कार्याणि तल्लीनानि महाक्षये ।
विकृतौ व्यक्तिमायाति सा कार्येण कलादिना[२] ।।

उत्पत्तौ लये च कारणीभूता मायाऽपि बन्ध एव । वस्तुतस्तु पशुपत्यतिरिक्ता यावन्तोऽपि जागतिकाः पदार्थाः, समेऽपि बन्धभूतत्वात्पाशत्वं भजन्ते । रागमोहादयो विवेकावरोधकत्वान्मला उच्यन्ते ।

---

१. मृगेन्द्रागमे । २. सर्वदर्शनसङ्ग्रहे ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मोहो मदश्च रागश्च विषादः शोष एव च ।
वैचित्यं चैव हर्षाख्यः सप्तैते सहजा मलाः[१] ।।

यावन्तोऽपि विषया रागमोहाद्युत्पादकतया पाशा एव सन्ति । उक्तं च पारमेश्वरागमे—

चतुर्विंशतितत्त्वानि माया कर्म गुणा अपि ।
विषया इति कथ्यन्ते पाशा जीवनिबन्धनात्[२] ।।

इमे पाशाः शिवाधीनाः । शिव एव पाशमोचकः । शिवांशभूता जीवाः पाशबद्धत्वात्पशव उच्यन्ते । शिवश्च कर्मप्रेरकः स्वतन्त्रः पतिः—

ब्रह्मादिस्तम्बपर्यन्तान् पशून् बद्ध्वा महेश्वरि ।
पाशैरेतैः पतिश्चाहं कार्यं कारयति स्वकम्[३] ।।

आभासवादः

अचिन्त्यमव्यक्तमनेकरूपं
शिवादभिन्नं जगतः स्वरूपम् ।
बिभर्ति तत्त्वे निहितात्मभेद-
मण्डे मयूरस्य यथा शरीरम् ।।

यथा मयूरस्य चित्रविचित्रं पिच्छकलापं मयूराण्डेऽभिन्नरूपात्मतया निहितं कालशक्त्या परिच्छिन्नं पश्चात्तत आविर्भूतं सत् प्रकाशते, तथैव समस्तं जगद् महेश्वरेऽविभिन्नरूपतया विद्यमानं शिवशक्त्याऽऽविर्भूतं पृथग्भूतमिव भासते । सकलस्यापि जगतोऽधिष्ठानं चितिः संविदेवास्ति । चित्रविचित्रं परिवर्तनशीलमिदं जगदाभासश्चितेराविर्भावमात्रम् । जगतो यानि प्रकटरूपाणि, प्रमेयः, प्रमाता, ज्ञानम्, ज्ञानसाधनम्, इन्द्रियाणि चेति परमचितेराभासमात्रम् । आभासो नाम ईषत् सङ्कुचितं भासनं प्रकाशनं वा सर्वविधाविर्भावः । जगति यत्किमपि विद्यमानं वर्तते, तत्सर्वमाभासस्य विन्यासमात्रमेवास्ति । आभासरूपा एव जडचेतनपदार्थाः ।

यथा स्वच्छे दर्पणे चित्रविचित्रनगराणि ग्रामादीनि च प्रतिबिम्बितानि भवन्ति, तेषां प्रतिबिम्बानि दर्पणादभिन्नान्यपि परस्परं दर्पणाद् भिन्नानि प्रतीयन्ते, तथैवेदं जगत् परमशिवस्य (चितेः) अभिन्नमपि परस्परं ततो भिन्नं प्रतीयते ।

---

१. तत्त्वनिर्णये ।
२. पारमेश्वरागमे, १२.६३ ।
३. तत्रैव, १२.६४ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निर्मले मुकुरे यद्वद् भान्ति भूमिजलादयः ।
अमिश्रास्तद्वदेकस्मिंश्चिन्मात्रे विश्ववृत्तयः[१] ।।

तत्रोभयोरियान् भेदः—दर्पणोऽचेतनः, तस्य च स्वान्तःस्थितस्य प्रतिबिम्बितवस्तुनो बोधो नैव भवति, महेश्वरस्तु चेतनः परमसंविद्विमर्शशक्त्या सर्वं जानाति ।

अन्तर्विभाति सकलं जगदात्मनीह
यद्वद् विचित्ररचना मुकुरान्तराले ।
बोधः पुनर्निजविमर्शनसारयुक्त्या
विश्वं परामृशति नो मुकुरस्तथावत्[२] ।।

तत्र मुकुरायमाना चितिः शिवस्य पराख्या शक्तिरेव, तस्यामेव प्रतिबिम्बते जगत् । बिम्बभूतः शिवः प्रतिबिम्बश्च जीवः । स च शिवाभिन्नोऽपि भिन्न इव प्रतिभाति । सर्वभागेषु परतोऽसङ्गः शिवः कर्तृत्वकरणत्वादिहीनः साक्षिमात्रम् । जीवश्च कर्मफलभोक्ता भोगेष्वासक्तः कर्ता चेत्युच्यते । एवं नैकोपाधिको भेदो प्रतिबिम्बयोः । कर्तृत्वाद्युपाधिना प्रतिबिम्बो जीवः, निरुपाधिको बिम्बः शिवः ।

त्वयि दर्पणभूतायां बुद्धौ जीवोऽहमीश्वरः ।
असङ्गः प्रतिबिम्बोऽस्मि न भोक्ता केवलः शिवः ।।
शोकहर्षभयक्रोधलोभमोहस्पृहादयः ।
अहङ्कारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः[३] ।।

चिदेव भगवती स्वच्छन्दस्वतन्त्ररूपा तत्तदनन्तजगदात्मना स्फुरति । यद्यपि कार्यकारणयोर्भेदः सर्वसिद्धान्तेष्वभिमतः, कार्यं हि कारणाद् भिन्नं भवति, तयोरेकत्वे कार्यकारणभावासम्भवः । कार्यात् पूर्वनियतवृत्तिः कारणमिति नियमोऽत्र नाभिमतः । चितेः स्फुरणं जगदुन्मेषः । उभयं यौगपद्येन सम्पाद्यते, नास्ति कश्चित् क्रमः ।

चितेः प्रकाशः सर्वत्र

सर्वमपि प्रपञ्चजातं चिदात्मकमेव तन्त्रागमेषु प्रसिद्धम् । तथा च चिदात्मैव हि शिवोऽन्तःस्थितं प्रपञ्चजातं स्वेच्छया स्वभित्तौ स्वाधारे स्वस्मिन् स्वप्रकाशे च बहिः प्रकाशयति । बहिःप्रकाशनमत्रान्तरवस्थितस्य प्रकटीकरणम् । तत्र यथा योगी सङ्कल्पमात्रेणैव यत्किमपि वस्तु बहिराभासयति, स किमप्युपादानं नापेक्षते, तथैव चितिरपि विनोपादानेनैव अन्तःस्थितमर्थजातं बहिराभासयति–

---

१. तन्त्रालोके, ३.४ । २. ई. प्र. वि. वि., पृ. १६८ ।
३. पारमेश्वरागमे, २१.५१-५२ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद् बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ।।
स्वामिनश्चात्मसंस्थस्य भावजातस्य भासनम् ।
अस्त्येव न विना तस्मादिच्छामर्शः प्रवर्तते[१] ।।

यथा कुम्भकारो मृत्तिकामादायैव घटनिर्माणे समर्थो भवति तथा नात्र व्यवस्था। बाह्याभासो महेश्वरकल्पनानां बहिः प्रक्षेपमात्रमेवास्ति। ये पदार्था महेश्वरस्य ज्ञानस्वरूपाः सन्ति, ते तस्येच्छया ज्ञेयरूपात्मनि बहिः प्रकटतां यान्ति। ते चाहंस्वरूपाः सन्ति। ते चेदमात्मनि विश्वस्वरूपे वा आविर्भवन्ति। जीवेभ्यश्च बाह्यरूपमाभासयन्ति। उक्तंश्च पदार्थस्योदयक्रमः—

यत्र यत्र भवेदिच्छा ज्ञानं तत्र प्रवर्तते।
क्रियाकरणसंयोगात् पदार्थस्योदयो भवेत्[२] ।।

शिवस्वरूपा शक्तिरेव चितिः, तस्यां प्रतिबिम्बते सर्वम्। सा च न शिवाद् भिन्ना, शिवस्वरूपभूतत्वात्तद्रूपैव। न च बिम्बभूतशिवाद् भिन्नः प्रतिबिम्बभूतो जीवः, प्रतिबिम्बस्य बिम्बातिरिक्तसत्ताशून्यत्वात्। बिम्बभूतः शिव एव कर्तृत्वभोक्तृत्वाद्युपाधिना प्रतिबिम्बितचैतन्यो जीवः। अविद्याकल्पितो हि जीवेशयोर्भेदः, न तु वास्तविकः।

पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि।
तदन्यकल्पना ज्ञानमज्ञानं प्रकृतेर्गुणः[३] ।।

अन्तर्निहितपदार्थजातं बिन्द्वात्मना बिम्बीभूतं चिदात्मके शिवस्वरूपे भासते। तत्र शिवस्य हि चित्स्वरूपम्, तस्मिंश्चान्तर्भूता जडपदार्था बाह्यरूपेण प्रकाशन्ते, अतस्ते शिवस्य शरीरत्वमादधते। यश्च चैतन्यसहितः प्रतिभासः, स जीवः। तत्र चितिरेव शिवस्योभयरूपतां प्रकुर्वते। सैव सृष्टेः सहकारिकारणम्, तदात्मकमेव जगत् सर्वम्।

शिवोऽहं त्वमुमे शक्तिस्त्वमेवाहमहं त्वमु।
स्त्र्यात्मा त्वं वै पुमात्माहं शिवशक्त्यात्मकं जगत्[४] ।।

शिवोऽद्वितीयः सर्वव्यापकः सर्वनियन्तेत्युच्यते। तस्यैव स्वरूपवैभवमविद्या, माया, शक्तिरित्यभिधीयते। स्वकीययैवेच्छाशक्त्या एकः सन्नप्यनेकरूपतामापद्यते। सर्वव्यापकत्वादेतद्विश्वं तस्य वपुः, तदन्तर्भूताश्चेतनांशविशिष्टत्वाज्जीवास्तदंशाः। अतो जडचेतनोभयात्मकं जगत् शिवतत्त्वरूपमेव, न तद्भिन्नं किञ्चित्।

---

१. स्पन्दप्रदीपिकायाम्, पृ. ११३।
२. स्पन्दप्रदीपिकायाम्, पृ. ९०।
३. पारमेश्वरागमे, २१.६६।
४. पारमेश्वरागमे, २१.५०।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सृष्ट्वा तमेकमात्मानमनेकं कुरुते पुनः ।
एकीकृत्य ग्रसति यस्तस्मै रुद्र नमोऽस्तु ते[१] ।।

शिवाद्वैतविमर्शः

शक्तिः शिवस्वरूपैव तन्निर्मितजगत्तनुः ।
कर्तृत्वादिविशिष्टोऽसौ तदंशो जीव उच्यते ।।
अविद्यावशगो जीवस्तन्निवृत्तौ स्वयं शिवः ।
अतस्तयोर्न भेदोऽस्ति नांशिनोंऽशः पृथक् क्वचित् ।।

सर्वं हि शिवमयं न तद्भिन्नं क्वचित्। माया, अविद्या, शक्तिरिति नामभिर्लोके ख्याता जगत्सृष्टिस्थितिसंहारनिमित्तं मूलप्रकृतिः शिवस्वरूपैवास्ति । वस्तुतत्स्वरूपयोरभेदात् शिवाभिन्ना शक्तिः । प्रपञ्चस्तु शिवशरीरत्वेनोच्यते । शरीरशरीरिणोरभेदात्तदपि शिवाभिन्नमेव । औपाधिकभेदेन शिवतत्त्वस्यैव जीवपदेन व्यपदेशः । स च जीवस्तदंश एव अंशांशिनोरभेदात्तयोरभेद इत्युच्यते । यत् किमपि जगति प्रतीयते, तत्सर्वं शिवतत्त्वमेवास्ति । उक्तं च—

अहमेकः परानन्दः परमात्मा सदाशिवः ।
सृष्ट्वा मायामयीं शक्तिं तथाऽहं षड्विधोऽभवम् ।।

शिव एव सर्वत्रानेकशो भासते प्रतीयमानं सर्वं पदार्थजातं शिवाभिन्नमिति पक्षे शिवाद्वैतसिद्धान्तः । यन्मते शिवोऽपि शक्तिविशिष्टः, जीवश्च शक्तिविशिष्टः, तयोरद्वैतं यत्र स शक्तिविशिष्टाद्वैतसिद्धान्तः । सा शक्तिः शिवस्वरूपैवेति कृत्वा शिवाद्वैतमेव तत् ।

।। इति शिवम् ।।

●

१. पारमेश्वरागमे, १५.१ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सद्गुरु के लक्षण और उसकी महिमा

प्रो. गङ्गाधर पण्डा

व्युत्पत्ति एवं निर्वचन

व्याकरण के नियम के अनुसार 'गृ' धातु से गृणाति 'गृ निगरणे' इस धातु से (गिरति/गिलति) 'उ' प्रत्यय करने पर गुरु शब्द की निष्पत्ति होती है। ज्ञान देना या उपदेश करने का अर्थ इससे द्योतित होता है, अतः गुरुशब्द का सामान्य अर्थ शिक्षक होता है। विभिन्न ग्रन्थों में गुरु शब्द का निर्वचन इस प्रकार है—

गुणातीतं गुकारं च रूपातीतं रुकारकम्।
गुणातीतमरूपं च यो दद्यात् स गुरुः स्मृतः[1] ।।

यहाँ गुरु शब्द मे स्थित 'गु' का अर्थ है प्राकृत सत्त्वादि गुणातीत एवं 'रु' का अर्थ है माया रूपरहित। इस प्रकार निर्गुण एवं निराकार परशिव चैतन्य का जो उपदेश दे सकता है, वह गुरु कहलाता है।

गुशब्दस्त्वन्धकारः स्याद् रुशब्दस्तन्निरोधकः।
अन्धकारनिरोधित्वाद् गुरुरित्यभिधीयते[2] ।।

इस पद्य के अनुसार 'गु' का अर्थ है अन्धकार एवं 'रु' का अर्थ है रोकने वाला। अतः गुरु का अर्थ है– वह शक्ति, जो अन्धकार को दूर कर सकती है।

गुकारः प्रथमो वर्णो मायादिगुणभासकः।
रुकारो द्वितीयो ब्रह्म मायाभ्रान्तिविनाशकम्[3] ।।

यहाँ गुरु शब्द का प्रथम तत्त्व 'गु' माया का उद्बोधक है और द्वितीय तत्त्व माया का विनाशक है।

इसी प्रकार आगमसार में एक महत्त्वपूर्ण निर्वचन उपलब्ध है—

---

१. सिद्धान्तशिखामणि, १५.४; २. अद्वयतारकोपनिषद्।
३. गुरुगीता।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गकारः सिद्धिदः प्रोक्तो रेफः पापस्य दाहकः ।
उकारः शम्भुरित्युक्तस्त्रितयात्मा गुरुः स्मृतः ।।
गकारो ज्ञानसम्पत्त्यै रेफस्तत्त्वप्रकाशकः ।
उकाराच्छिवतादात्म्यं दद्यादिति गुरुः स्मृतः[१] ।।

इस निरुक्ति के अनुसार गुरु शब्द में स्थित 'ग्' आध्यात्मिक सिद्धि का 'र्' पापों का दहन का एवं 'उ' शिव का प्रतिनिधित्व करता है।

पारमेश्वरागम के अनुसार गुरु का लक्षण इस प्रकार है—

सदाचाररतं शुद्धं शिवभक्तमलोलुपम् ।
यथार्थवादिनं शान्तं द्वेषासूयादिवर्जितम् ।।
विदिताखिलशास्त्रार्थमिङ्गितज्ञमनाकुलम् ।
अनर्थातुरमात्मज्ञमकामुकमवञ्चकम् ।।
वाग्मिनं शिवतत्त्वार्थबोधकं हृष्टमानसम् ।
एतादृशगुणोपेतमुपेयाद् गुरुमीश्वरम्[२] ।।

अर्थात् गुरु सभी शुभ लक्षणों से सम्पन्न, सब कुछ जानने वाला और सभी का आदरपात्र होना चाहिए। सदाचार का पालन करने वाला, शुद्ध चित्तवृत्तिवाला, शिव का भक्त, अचपल, यथार्थ वक्ता, शान्त, द्वेष एवं मात्सर्यादि दोषों से रहित, समस्त अर्थों को जानने वाला, इशारे से सब कुछ समझने वाला, अव्याकुल, द्रव्यलोभ से मुक्त, आत्मज्ञान से सम्पन्न, शिवतत्त्व के ज्ञान से सम्पन्न और सदा प्रसन्नचित्त रहने वाला है। इन सब गुणों से सम्पन्न ईश्वरस्वरूप गुरु की शरण में जाना चाहिए।

इस प्रकार की ये सब उपर्युक्त निरुक्तियाँ गुरुतत्त्व के चमत्कारपूर्ण अर्थ को प्रकाशित करती हैं। वीरशैव सम्प्रदाय के श्री जगद्गुरु रेणुकाचार्य जी गुरु का लक्षण इस प्रकार बताते हैं—

उपैति लोकविख्यातं लोभमोहविवर्जितम् ।
आत्मतत्त्वविचारज्ञं विमुक्तविषयभ्रमम् ।।
शिवसिद्धान्ततत्त्वज्ञं छिन्नसन्देहविभ्रमम् ।
सर्वतन्त्रप्रयोगज्ञं धार्मिकं सत्यवादिनम् ।।
कुलक्रमागताचारं कुमार्गाचारवर्जितम् ।
शिवध्यानपरं शान्तं शिवतत्त्वविवेकिनम् ।।

---

१. आगमसार।

२. पारमेश्वरागम, २.६४-६६।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लिङ्गधारणसंयुक्तं लिङ्गपूजापरायणम् ।
लिङ्गाङ्गयोगतत्त्वज्ञं निरूढाद्वैतवासनम् ।।
लिङ्गाङ्गस्थलभेदज्ञं श्रीगुरुं शिववादिनम्[१] ।।

यहाँ कुलक्रमागताचार शब्द के महत्त्व पर बल दिया गया है। इसके साथ साथ अन्य योग्यताओं का रखना गुरु के लिए आवश्यक धर्म है। इसीलिए सूक्ष्मागम में कहा गया है—

पितृभ्रातृकलत्राणां पुत्रादीनां तथैव च ।
दीक्षाशिक्षाविधानार्थमेक एव गुरुर्भवेत् ।।
गुरवो यत्र बहवो भवन्त्यन्योन्यभेदतः ।
वीरशैवसदाचारस्तत्र नास्तीति निश्चयः[२] ।। इति ।

गुरु के प्रकार

गुरु के विभिन्न धर्म एवं कार्य को लेकर आचार्यों ने इसके तीन भेद बताये हैं– दीक्षागुरु, शिक्षागुरु एवं ज्ञानगुरु।

१. दीक्षागुरु

दीयते परमं ज्ञानं क्षीयते पाशबन्धनम् ।
यया दीक्षेति सा तस्यां गुरुर्दीक्षागुरुः स्मृतः[३] ।।

अर्थात् परम्परागत गुरु ऐसी दीक्षा प्रदान करता है, जिससे शिष्य को शिवज्ञान की प्राप्ति होती है एवं उसका समस्त मल व्यपगत हो जाता है। वीरशैव धर्म के अनुसार दीक्षा लेना अनिवार्य है। गुरु शिष्य में शक्तिपात करके इष्टलिङ्ग प्रदानपूर्वक पञ्चाक्षरी मन्त्र देता है। इसमें स्त्री एवं पुरुषों का समान अधिकार है। जन्म से अष्टम वर्ष में दीक्षा लेने को उत्तम, षोडश वर्ष में मध्यम एवं तदुर्ध्व को अधम दीक्षा मानी जाती है।

दीक्षा

दीक्षा के बिना सभी धार्मिक क्रिया निष्फल है। जिस प्रकार हाथी सिंह को देखकर भाग जाता है, ठीक उसी तरह दीक्षाहीन व्यक्ति से शिव भाग जाते हैं।

---

१. सिद्धान्तशिखामणि, ६.२-७; २. सूक्ष्मागम।
३. सि. शि. १५.।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यथा मृगपतिं दृष्ट्वा भीतो याति वने गजः ।
अदीक्षितोऽर्चयेल्लिङ्गं तथैवाहं महेश्वरि[१] ।।

यह दीक्षा तीन प्रकार की है–वेधादीक्षा, क्रियादीक्षा एवं मन्त्रदीक्षा ।

१. वेधादीक्षा

गुरोरालोकमात्रेण हस्तमस्तकयोगतः ।
यः शिवत्वसमावेशो वेधादीक्षेति सा मता[२] ।।

गुरु शिष्य के प्रति कृपापूर्ण दृष्टि रखकर हस्त से मस्तक का स्पर्श करते हैं। इससे शिष्य में शिवत्व का समावेश हो जाता है ।

२. मन्त्रदीक्षा

मान्त्री दीक्षेति सा प्रोक्ता मन्त्रमात्रोपदेशिनी ।

गुरु शिष्य के कर्ण में 'शिव पञ्चाक्षर मन्त्र' को देता है। इससे शिव के मन्त्रमयस्वरूप का ज्ञान होता है। गुरु शिष्य के हृदय में प्रकाश रूप प्राण लिङ्ग का बोध कराते हैं ।

३. क्रियादीक्षा

कुण्डमण्डलिकोपेता क्रियादीक्षा क्रियोत्तरा[३] ।

इस वचन के अनुसार मठ या मन्दिर में वीरशैव धर्म के अनुसार कलश की स्थापना करके पाँच आचार्यों का आवाहन किया जाता है एवं अभिषेक करके शरीर को शुद्ध किया जाता है। शरीर शुद्धि के बाद शिवलिङ्ग में शिवकलानियोजन द्वारा प्राणप्रतिष्ठा की जाती है। इसीलिए कहा गया है–

प्राणवद् धारणीयं तत् प्राणलिङ्गमिदं तव ।
कदाचित् कुत्रचिद् वापि मा वियोजय देहतः[४] ।।

२. शिक्षागुरु

दीक्षागुरुरसौ शिक्षाहेतुः शिष्यस्य बोधकः ।
प्रश्नोत्तरप्रवक्ता च शिक्षागुरुरितीर्यते[५] ।।

---

१. दीक्षा बोध । ३. सि. शि. ६.१५ । ५. सि. शि. १५.१ ।
२. सि. शि. ६.१३ । ४. सि. शि. ६.५. ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अत्यन्त सावधानीपूर्वक जो मन्त्रसाधना एवं प्राणलिङ्गानुसन्धान पद्धति को सिखाता है, उसे शिक्षागुरु कहते हैं।

३. ज्ञानगुरु

उपदेष्टोपदेशानां संशयच्छेदकारकः।
सम्यग्ज्ञानप्रदः साक्षादेष ज्ञानगुरुः स्मृतः[१]।।

जो गुरु अनेक युक्तियों के द्वारा शिष्य का संशय दूर कर जीवमुक्ति हेतु शिवाद्वैत ज्ञान प्रदान करता है, उसे ज्ञानगुरु कहते हैं।

उपसंहार

सभी पराम्पराओं का अध्ययन करने पर यह ज्ञात है कि गुरु शब्द की अवधारणा अपने अपने सम्प्रदाय में एक रहस्यात्मक अर्थ को व्यक्त करती है। योग दर्शन के अनुसार गुरु साक्षात् ईश्वर है, तो अद्वैत परम्परा में गुरु परब्रह्म है। समस्त मतों के महत्त्व को प्रतिपादित करके गुरुगीता में गुरु को मोक्ष का मूल बताया गया है–

ध्यानमूलं गुरोर्मूर्त्तिः पूजामूलं गुरोः पदम्।
मन्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा।।

●

---

१. सि. शि. १५.१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीगुरुभ्यो नमः

पारमेश्वरागमे वर्णितं वीरशैवमतमाहात्म्यम्

श्री जगद्गुरु अन्नदानीश्वरमहास्वामिनः

चराचरजगतः सर्जनपालनसंहारसमर्थकात् परमेश्वराद् विनिर्गताऽष्टाविंशत्यागमाः। तेषु शिवागमा दशः रुद्रागमा अष्टादश। यथा हि कामज-योगज-चिन्त्य-मौकुट-अंशुमत्-दीप्त-कारण-अजित-सूक्ष्म-सहस्रा इत्येते पाशुपतमतसम्मता दश शैवागमाः[१]। 'कामज'स्थाने 'कामिक' इत्युपलभ्यते। 'मौकुट'स्थाने सुप्रभेदाख्यस्य नाम लभ्यते। अष्टादशागमा यथा–विजय-पारमेश्वर-निश्वास-प्रोद्गीत-मुखबिम्ब-बिन्दुसिद्धि-सन्तान-नारसिंह-चन्द्रकाश-भद्रसर्वात्मन्-स्वायम्भुव-विवास (विरस) रौरव-मुकुट-किरण-ललित-आग्नेय-सौरभेद-पराभयमित्येते।[२] इत्येषामागमानामुल्लेखः क्रियासारे कृतोऽस्ति। प्रथमतः कामिकागमस्य गणनां कृत्वा वातुलागमस्यान्तिमगणना क्रियते। 'चन्द्रकाश' इत्यागमश्चन्द्रज्ञानागम इति ज्ञायते। एतेष्वष्टाविंशत्यागमेषु पारमेश्वरागमो वीरशैवमतमाहात्म्यकथने प्रसिद्धो वर्तते। एष पुरातनश्च प्रतिभाति।

यथाऽऽगमेषु शैवमतप्रतिपादनं कृतम्, तथैव वीरशैवमतनिरूपणं निगदितम्। केषाञ्चिद् विमर्शकानामभिप्राय एतादृशो दृश्यते, यद् 'वीरशैवः' शैवमतस्य अङ्गमेव वर्तते, अपि च शैवस्य परिभेद इति। तदलीकं दृश्यते। यतः पारमेश्वरागमे एतादृशविमर्शकेभ्यः प्रत्युत्तरं विद्यते। अस्मिन्नागमे परमेश्वर एव वदति—

वीरशैवं तथाऽनादिशैवमादिपदं ततः।
अनुशैवं महाशैवं योगशैवं तु षष्ठकम्।।
सप्तमं ज्ञानशैवाख्यं तत्र सर्वोत्तमोत्तमम्।
वीरशैवमितीशानि तदङ्गानीतराणि तु[३]।।

---

१. शक्तिविशिष्टाद्वैततत्त्वत्रयविमर्शः, पृ. ३।
२. शिवागमसौरभकन्नड, पृ. २९।
३. पारमेश्वरागमे, १६-१७।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिवप्रमाणेन वीरशैवमतमेवाऽनादिमतमिति ज्ञायते। परन्तु शैवमतमादिमतं कथ्यते। अनादिनाऽऽदिर्जायते। अतः वीरशैवः पुरातनः, स च बहुप्राचीनतां भजते स्म। वीरशैवः अनादिशैवः, आदिशैवः, अनुशैवः, महाशैवः, योगशैवः, ज्ञानशैवः इत्येते सप्तशैवाः। सप्तशैवेषु वीरशैव एव सर्वोत्तम इति कथितः शिवेन। इतराणि षट्शैवमतानि वीरशैवस्याऽङ्गानि दृश्यन्ते। अनेन प्रमाणेन वीरशैवमतस्य सर्वोत्तमत्वं ज्ञायते इदं मतं स्वतन्त्रमतमिति च प्रतिभाति।

पारमेश्वरागमे यद् षड्दर्शननिरूपणं कृतम्, तत्रापि वीरशैवदर्शनस्यैव प्रधानत्वं प्रतिपादितम्। यथा—

तन्त्रं तु षड्विधं प्रोक्तं षड्दर्शनविभेदतः।
वीरशैवं वैष्णवं च शाक्तं सौरं विनायकम्।।
कापालमिति विज्ञेयं दर्शनानि षडेव हि।
तत्तत्तन्त्रोक्तमार्गेण तत्तत्कर्म समाचरेत्[1]।।

अत्र षड्दर्शनविभागेन तन्त्रं षट्प्रकारं प्रोक्तम्–१. वीरशैवदर्शनम्, २. वैष्णवदर्शनम्, ३. शाक्तदर्शनम्, ४. सौरदर्शनम्, ५, विनायकदर्शनम्, ६. कापालदर्शनमिति। तत्तद्दर्शनोक्तमार्गेण तत्तदाचरणं समाचरेत्, न तु मिश्रयेत्। गाणपत्यादीनीतराणि मतानि सन्ति। तानि मतानि भवेयुः। तेषां प्रत्येकमाचरणं कर्तव्यम्। षड्दर्शनविचारेऽपि परमेश्वरो वीरशैवदर्शनं प्रथमत्वेन कथितवान्। अपि च—

"अत्रादौ वीरशैवाख्यं तन्त्राणामुत्तमोत्तमम्"[2] इति दिशा वीरशैवाख्यं मतं सकलतन्त्राणामुत्तमोत्तमं विद्यते। यतो हि कथ्यते परशिवेन

तत्र वक्ष्ये शिवे वीरशैवं सर्वोत्तमोत्तमम्।
.....।।
वीरशैवमतं सद्यो भोगमोक्षैकसाधनम्।
सर्वोत्तमं मम मतं यतः सर्वोत्तमोऽस्म्यहम्।।
न वीरशैवसदृशं मतमस्ति जगत्त्रये।
सर्वभोगप्रदं पुण्यं शिवसायुज्यदायकम्[3]।।

शिवो वदति यद् वीरशैवस्य सर्वोत्तमत्वम्। वीरशैवमताचरणं यो भक्तः करोति।

---

१. पारमेश्वरागमे श्लोकाः २३-२४।
२. तत्रैव, श्लोकाः ३२।
३. तत्रैव, श्लोकाः ४०-४२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तस्य भोगश्च मोक्षश्च सुलभः। इदं वीरशैवमतं यतः सर्वोत्तममिति पृच्छेत् चेत्, शिवः प्रतिपादयति–अहं सर्वेषां देवानामपि सर्वोत्तमोऽस्मि। स्वर्ग-मर्त्य-पाताललोकेषु वीरशैवसमानमन्यं मतं नास्ति। अस्मिन् वीरशैवमते सर्वभोगप्रदं पुण्यं विन्दति साधकः, अन्ते च शिवसायुज्यं लभते।

कर्नाटकप्रदेशे प्रसिद्धः शि. शि. बसनाल इति विमर्शकः वीरशैवमतोत्पत्तिं प्रसारं च प्रतिपादयन् पारमेश्वरागमस्य द्वौ श्लोकावुल्लिख्य बसवाल्लमयोः स्तुतिं प्रदर्शयति; तौ श्लोकौ पारमेश्वरागमे कुत्रापि नैवोल्लिखितौ। बसवालमानां प्रसङ्गोऽपि तत्र नहि वर्तते। बसवाल्लमौ महानुभावौ वर्तेते। विमर्शकस्य एष अभिप्राये वर्तते; यो वीरशैवधर्मो द्वादशशताब्दानन्तरं उत्पन्न इति तदलीकम्। तस्य न कोऽपि आधारो विद्यते। विमर्शकेन प्रतिपादितौ श्लोकौ प्रक्षिप्तौ वर्तेते। अतो विमर्शका मुक्तमनसा आगमान् अवलोकयन्तु[१]।

भारतीयदर्शनेषु जगन्मिथ्यात्वमेव कथितम्। सुभाषितकारेणोच्यते—

अनित्यानि शरीराणि विभवो नैव शाश्वतः।
नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसङ्ग्रहः[२]।।

पूर्वपुण्यवशादेव चतुरशीतिलक्षजन्मनः परं मानुषं जन्म लभते। परन्तु शरीराण्यनित्यानि। पुण्यतमं मानवशरीरं सम्प्राप्य पुरुषे मानवजन्मसाफल्यं यदि न साधयेत्, तर्हि मनुष्यत्वेन किं प्रयोजनम्? मानवजन्म लब्ध्वा वीरशैवमतमवश्यं स्वीकुर्यात्। अत एव मानवहिताय शिवादेशः कृतः—

वीरशैवसदृशमन्यं मतं नैव विद्यते।। इति।

वस्तुतो मानवशरीरं क्षणविध्वंसि। यौवनं कुसुमोपमम्, आयुष्यं जलबिन्दुलोलचपलम्। विभवो नैव शाश्वतः। अतः परमहार-निद्रा-भय-मैथुनेषु पशुपुरुषयोः सामान्यं जीवनम्। केवलं ज्ञानाधिक्येन, धर्माधिक्येन च मानवः श्रेष्ठो भवति। तथापि मानवाय मृत्युर्नित्यं सन्निहितो वर्तते। अतो ज्ञानसाधनभूतं धर्मसाधनभूतं च मानवं जन्म सम्प्राप्य परमात्मानं यो न जानाति, परमात्मरूपमिष्टलिङ्गं न धारयति, तस्य जन्म निरर्थकमेव भवति।

अद्यतन-नवनागरिकजीवने धर्ममोक्षयोरभाव एव दृश्यते। केवलमर्थकामयोः प्राबल्यं ज्ञायते धर्मशून्यत्वाच्च मोक्षस्यावकाशः कुतोऽस्ति? यदा धर्माभावेनार्थः सम्पाद्यते, सोऽर्थः स्वार्थाय भवति। स तु अधर्माय प्रभवति। यदा मानवजीवनेऽधर्मेण

---

१. वीरशैवद हुए, हागु बेलवणिगे, प्रो शि. शि. बसणना, धारवाड (कन्नडग्रन्थ)
२. सुभाषितरत्नभाण्डागारे

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धनसम्पादनं भवति, तदा दुर्बुद्धिरेव वर्धते। जीवनाभ्युदयनिःश्रेयससिद्धिरूपो धर्म एव मानवाय मोक्षं प्रापयति।

मोक्षसाधनाय वीरशैवमतमेव सुलभं सुखदं च वर्तते। अत एवोक्तम्—

अपि पापशतं कृत्वा ज्ञानतोऽज्ञानतोऽपि वा।
वीरशैवमतं प्राप्य शिव एव न संशयः[1]॥

पापशतानि कृत्वाऽपि वीरशैवमतस्वीकारं करोति यः, स निस्संशयं शिवरूपो भवति। अत्र शिवसंस्कार एव प्रधानम्। तदुक्तं पार्वत्यै परमेश्वरेण—

मम यो धारयेल्लिङ्गं यथोक्तं गुरुणा शिवे।
चाण्डालस्पृष्टदोषोऽपि स्मरतो नश्यति क्षणात्[2]॥

शिवरूपमिष्टलिङ्गं गुरुणा संस्कारपूर्वकं दत्तं यो धारयति; तस्य सकलदोषाः शिवस्मरणमात्रेण क्षणादेव नश्यन्ति। भवसागरं तितीर्षुः पुरुषोऽवश्यं लिङ्गधारणं कुर्यात्। तदुक्तं मकुटागमे—

तितीर्षुर्जन्मवाराशिं नानादुःखग्रहाकुलम्।
वेदागमान्तविदितं शाम्भवव्रतमाचरेत्॥
तनुत्रयगताऽनादिमलत्रयविशोधनाः।
लिङ्गत्रयानुसन्धानविशोषितभवाब्धयः[3]॥

यो मानवोऽनेकप्रकारदुःखरूपिग्रहैर्व्याप्तं जनन-मरण-संसारसागरं तितीर्षुर्भवति, तेन वेदागमान्ते प्रतिपादितं शाम्भवव्रतमाचरणीयम्। शाम्भवव्रतमेव वीरशैवाचरणम्। अनेन शाम्भवव्रताचरणेन स्थूल-सूक्ष्म-कारणशरीरेष्वनादिकालेन पर्याप्ताणव-मायिक-कामिकमलत्रयाणां निवारणं सद्गुरुः त्रिविधदीक्षया कृत्वा, शिष्यस्य त्रिविधतनुष्विष्ट-प्राणभरणलिङ्गान् धारयति। एतेषां त्रिविधलिङ्गानामनुसन्धानेन भवाब्धिर्विशेषेण विशोषितो भवन्ति। अतो वीरशैवस्य पुनर्जन्म न भवति स लिङ्गानुसन्धानेन भवबन्धनान्मुक्तो भवति।

लिङ्गधारणप्रक्रियायां जातिभेदोऽपि न दृश्यते। वीरशैवस्तु न जातिवाचकः, परन्तु तत्त्ववाचको वर्तते। पारमेश्वरागमे एष विषयः स्पष्टं प्रतिपादितः—

---

१. पारमेश्वरागमे, १.४४।
२. तत्रैव, १.५४।
३. मकुटागमे, उत्तरभागे, १०-११।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये चान्यजातयः ।
लिङ्गधारणमात्रेण शिवा एव न संशयः ।।
स्त्रियो बालास्तथा वृद्धाः खञ्जाः कुब्जान्धपङ्गवः ।
उन्मत्ता बधिराः काणाः शठा धूर्ताश्च वञ्चकाः ।।
चौरा जारास्तथा वेश्या आचाण्डालान्तसम्भवाः ।
मल्लिङ्गधारणादेव मद्रूपा एव ते शिवे ।।
यस्यास्ति भक्तिरीशानि वीरशैवमताश्रये ।
भक्तिमात्रपवित्रा हि सर्व एवाधिकारिणः[१] ।।

अत्रेष्टलिङ्गधारणं मुख्यमस्ति । ये ब्राह्मणाः, क्षत्रियाः, वैश्याः, शूद्राः चान्यजातयो भवेयुः, ते सर्वे इष्टलिङ्गधारणेन निस्संशयं शिवरूपिणो भवन्ति । अत्राऽवस्थाभेदोऽपि नास्ति । ये च स्त्रियो बाला वृद्धा स्युः, अपि चाङ्गविकलाः भवेयुः, ये च खञ्जाः, कुब्जाः, अन्धाः, पङ्गवः–ते सर्वेऽपि लिङ्गधारणमात्रेण शिवस्वरूपिणो जायन्ते । एवं चोन्मत्ताः, बधिराः, काणाः, शठाः, धूर्ताः, वञ्चकाश्चोराः, जाराः, वेश्याः, आचाण्डालपर्यन्ता ये जनाः वर्तन्ते, ते लिङ्गधारणेन त्रिमलशून्यत्वाच्च शिवरूपिणो भवन्ति । अत एव वीरशैवमतं श्रेष्ठतमं विद्यते । येषां मानवानां वीरशैवधर्माश्रये भक्तिरस्ति, ते सर्वे वीरशैवधर्मस्याधिकारिणो भवन्ति । यतो हि भक्तिमात्रेण ते पवित्रा जायन्ते ।

सर्वज्ञं सर्वेशं शङ्करं पृच्छति पार्वती–हे सकलोत्तम । वीरशैवमते वीरपूर्वत्वे किं प्रमाणम् ? इहोच्यताम् । तदा ईश्वरः प्रत्युवाच—

वीरत्वं नाम विश्वेशि तुरीया यत्र तत्र वै ।
गुरूक्तमार्गनिरता मते वीरपदाभिधे ।।
सर्वेऽपि वीरा देवेशि तुरीयास्तत्र तत्र ये ।
किन्तु मे शैवभेदो यो वीरशैवः स उच्यते[२] ।।

हे विश्वेश्वरि ! तुरीयावस्थायां स्थितो योगिः 'वीर' नाम्ना कथ्यते । वीरशैवमते नु, ते वीराः कथ्यन्ते । ये गुरूक्तमार्गे निरताः साधकाः । हे देवेशि चतुर्थावस्थायामनुष्ठीयमानाः सर्वे ते वीरा भवन्ति, किन्तु 'वीरशब्दः' वीरशैवमत एव रूढो भवेत् । अतः परं शिवो लिङ्गधारणमाहात्म्यं भणति—

---

१. पा. आ. ५८-६०, ६२ ।
२. तत्रैव, श्लोकः ६६ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अत्र वक्ष्ये विशेषं ते लिङ्गधारणवैभवात् ।
भक्तिमात्रेण कल्याणि ! सुखं दुःखाम्बुधिं तरेत् ।।

हे कल्याणि ! वीरशैवमतस्य विशेषताऽधिका वर्तते । तत्ते वक्ष्यामि यदिदमिष्टलिङ्ग-धारणमहत्त्वमेव विद्यते । इष्टलिङ्गे भक्तिं कृत्वा सुखदुःखसागरस्य पारं तरति । बिना शिवानुग्रहेण शिवभक्तिर्नैव सम्पद्यते । शिवसंस्कारविहीनस्य पुनर्जन्माऽपि न नश्यति । अत एव शिवेनाऽऽदेशः प्रदत्तः–

न प्रकाशय कुत्रापि विना भक्तं सुलक्षणम्[1] । भक्तिविहीनाय वीरशैवमतमाहात्म्यं तत्त्वं च न प्रकाशयेत् । सुलक्षणयुक्तभक्तायैव कथ्यताम् ।

लिङ्गधारी भक्तः सदा शुचिर्भवति, लिङ्गं त्वनिष्टपरिहारकमस्ति । लिङ्गधारणेन कस्यचित् मानवस्याऽशुचिर्नैव लिप्यते । अत एव भणितम्—

रतावशुद्धावुद्योगे रणे निद्रादिषु प्रिये ।
कर्मणा मनसा वाचा जाग्रत्स्वप्नसुषुप्तिषु ।
न लिङ्गमुत्सृजेत् क्वापि प्राणैः कण्ठगतैरपि ।।
न पूजापि परित्याज्या कृच्छ्रेऽपि कुलनायिके ।
धारयेदात्मतादात्म्यं प्राणलिङ्गं ममेति तत्[2] ।।

सदा लिङ्गधारणेनापवित्रता नैवागच्छति । सम्भोगसमये, अपवित्रकर्मणि, शुद्धभूमौ, निद्राकालेऽपि कर्मणा; मनसा, वाचा जाग्रत्स्वप्नसुषुप्त्यवस्थाष्विष्टलिङ्गं नैवोत्सृजेत् । प्राणापायसमयेऽपि लिङ्गं धारयेत्, यतः इष्टलिङ्गं प्राणलिङ्गमेव वर्तते । अतोऽवधानेन, आत्मतादात्म्यभावेन लिङ्गं धारयेत्, सदा प्रपूजयेच्च ।

वीरशैवस्य पर्यायनामानि बहूनि सन्ति । आगमेषु वीरशैवस्य शिरोव्रती, शाम्भवव्रती, अत्याश्रयीत्यादिनामानि कथितानि । शरणसिद्धान्ते लिङ्गवन्तः लिङ्गायतः, लिङ्गशरीरी, मन्त्रशरीरी, अप्राकृतशरीरी, प्रसादकायः, प्रकाशकायः, व्योमकायः, सर्वाङ्गलिङ्गी, वीरशैव इत्यादिनामान्यन्वर्थकानि दृश्यन्ते । वीरशैवपदमप्यर्थपूर्णं विद्यते । वीरशैवपदस्य निर्वचनं सैद्धान्तिकमेव वर्तते । तदुक्तं सिद्धान्तशिखामणौ भगवता रेणुकाचार्येण—

वीशब्देनोच्यते विद्या शिवजीवैक्यबोधिका ।
तस्यां रमन्ते ये शैवा वीरशैवास्तु ते मताः[3] ।।

---

१. पा. आ. श्लोक ८७ ।
२. पा. आ. २.१९-२०-२२ ।
३. सिद्धान्तशिखामणिः, ५.१५ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

'वीर'शब्देनास्य मतस्य दार्शनिकसिद्धान्तः, सम्प्रदायाचारश्च प्रकटो भवति। वीरशैवसिद्धान्ते शिवदीक्षासम्पन्नस्य साधकस्य शरीरे इष्टलिङ्गधारणं सदा कर्तव्यम्। प्रमादेनापि कदाचिदिष्टलिङ्गं शरीराद् न त्यजेत्। एतल्लिङ्गं प्राणवद्धारणीयम्। यत इदं प्राणलिङ्गं वर्तते। 'वी'पदेनास्य मतस्य दार्शनिकसिद्धान्तभूता शिवजीवयोरैक्यविद्या बोध्यते। 'र'कारेण तस्यां विद्यायां यो रममाणः स वीरशैवः प्रभवति। अयमेव शिवयोगः। शिवयोग एव एतन्मतस्य सिद्धान्तः। शङ्करसंहितायां वीरशैवपदपरिभाषा स्पष्टतयोक्ता—

यो हस्तपीठे निजलिङ्गमिष्टं
विन्यस्य तल्लीनमनःप्रचारः।
बाह्यक्रियासङ्कुलनिस्पृहात्मा
सम्पूजयत्यङ्ग स वीरशैवः[१]।।

यो भक्तः स्वीयवामहस्ते गुरुणा संस्कारपूर्वकं प्रदत्तमिष्टलिङ्गं विन्यस्य तल्लिङ्गे दृष्टिं संस्थाप्य लिङ्गध्यानपरायणमनो भवति, एवं च बाह्यक्रियासमूहे तस्येच्छा निर्गता विद्यते, स लिङ्गलीनमनाः शिवयोगसाधनवानेव स्यात्। एतादृशप्रक्रियावानेव वीरशैवनामको भवति। लिङ्गाङ्गसामरस्यमुखेन शिवयोगं साधयन् स वीरशैवः कथ्यते। स भक्तः सत्यं 'वीर'पदस्य अन्वर्थकं नाम धारयति भोग्येयमायिदेवो विशेषार्थप्रकाशिकायां वीरशैवशब्दस्य व्याख्यानमित्थं करोति–

वीरशैवनिरुक्तिर्या द्वयमेवाधुनोच्यते।
वीशब्दोऽत्र विकल्पार्थो रशब्दो रहितार्थकः।
विकल्परहितं शैवं वीरशैवमिति स्मृतम्[२]।।

अत्र द्विविधरीत्या वीरशैवपदस्य निरुक्तिः कथिता, 'वीर'पदस्य 'वी' 'र' अक्षरयोः विशेषार्थः प्रदर्शितः। द्वयोरर्थो न तु यथार्थः, किन्तु कृत्रिमार्थ इति ज्ञायत इति सन्देहे पुनर्मायिदेवः कथयति—

एकमेवाद्वितीयं यदविकल्पं परं पदम्।
तद्वीरशैवमित्युक्तं नेतरत् सविकल्पकम्[३]।।

एषोऽर्थो युक्तियुक्तः। परब्रह्म 'एकमेवाद्वितीयम्।'' अतस्तदविकल्पकम्। विकल्परहितः

---

१. शङ्करसंहितोक्तिः।
२. विशेषार्थप्रकाशिका, २.३०-३१।
३. तत्रैव।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शैव एव वीरशैवः कथ्यते। ब्रह्मपदवाच्यमिष्टलिङ्गमप्येकेश्वरत्वस्य चिह्नम्। इतरशैवमतं सविकल्पकं ज्ञायते। इष्टलिङ्गं मणिकल्पं परं च वर्तते। लिङ्गाचारेऽन्यदेव कल्पनापि परित्यज्यत एव।

वीरशैवमते लिङ्गधारकाः सदा पवित्रा एव विद्यन्ते। यतस्ते त्रिमलरहितत्वात् सूतकनाशत्वाच्च शुद्धा भवन्ति। अत एवोक्तम्—

धृतलिङ्गशरीरत्वात् सदा तु ज्ञानसम्भवात्।
शुचिरेव सदा तस्य नाशुद्धिर्नैव चाशुचिः[1]।।

इष्टलिङ्गधारिणः शरीरं सदा पवित्रमेव विद्यते। तस्या शुद्धिरशुचित्वं वा नैव लिप्यते। संस्कारकारणात् ज्ञानसम्भवेन सत्क्रियासम्पन्नत्वेन च लिङ्गधारी पवित्रो विद्यते। लिङ्गधारिणोऽन्यमतस्य धर्मस्तस्य धर्मो न भवति। वीरशैवोऽधर्मैः, पाषण्डैः, दुर्वृत्तैः, विषयलोलुपैः, धूर्तैः, गुरुभक्तिविहीनैः सह सङ्गं नैव करोति।[2] सत्सङ्गे शरणजनसम्पर्के वसन् स्वीयाचरणे निरतो भवति। तथा च लब्धदीक्षः शिष्यः सदा लिङ्गपूजां करोति। त्रिकाललिङ्गपूजा प्रशस्ता वर्तते। सैव परमेश्वरेण भणिता–

समबुद्धिर्भवेदात्मगुरुलिङ्गशिवेषु च।
त्रिकालमर्चयेल्लिङ्गं न्यायार्जितधनादिभिः।
द्विकालमेककालं वा सर्वदा लिङ्गमर्चयेत्[3]।।

वीरशैवः समबुद्धिमान् भूत्वा आत्मोद्धारकगुरौ च लिङ्गे च शिवे च तारतम्यं नैव कुर्यात्। नित्यमुद्योगं कृत्वा न्यायेन सम्पादितधनादिभिर्लिङ्गं त्रिकालमर्चयेत्। त्रिकाललिङ्गार्चनाऽभावे द्विकालमेककालं वाऽभ्यर्चयेत्। लिङ्गार्चनेनैव शरीरशुद्धिर्मनःशुद्धिर्भावशुद्धिश्च जायते। स्वस्थो वीरशैवः लिङ्गपूजां कदापि न सन्त्यजेत्। लिङ्गपूजने न कोऽपि जातिभेदो विद्यते। तदेव कथितम्—

न स्त्रीभेदो न पुंभेदो जातिवर्णाश्रमादिकम्।
सर्वातीतमिदं विद्धि वीरशैवमतं मम[4]।।

वीरशैवमते तु स्त्रीभेदः, पुंभेदोऽपि नास्ति। जातिवर्णाऽऽश्रमादिकमतिक्रम्य वीरशैवो वर्तते। अत एव परमेश्वरो निगदति पार्वत्यै–"मम वीरशैवमतं सर्वातीतं

---

१. पा. आ. २. २७-२८। २. तत्रैव ३.६३-६६।
३. तत्रैव ५.३६-३७। ४. तत्रैव ५.४१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विद्धि''। लिङ्गार्चनासक्तेषु वीरशैवेषु भेदभावोऽपि नैव विद्यते। लिङ्गधारणमाध्यमेन सर्वे समाना भवन्ति, परस्परं गौरवं च धारयन्ति।

अभिवन्देत् तदान्योन्यं न भेदो लिङ्गधारिणाम्।
न ब्रह्मचर्यनियमो न वानप्रस्थलक्षणम्।
न संन्यासो न वैराग्यं यदि लिङ्गार्चने रतिः[१]।।

लिङ्गधारी अन्यलिङ्गधारिणं दृष्ट्वाऽभिवादयेत्। तत्र ब्रह्मचर्यवानप्रस्थादिभेदोऽपि नैव विद्यते। लिङ्गार्चने संन्यासवैराग्यभेदोऽपि नास्ति। आबालवृद्धा वीरशैवाः समानशीला भवन्ति।

दीक्षितो वीरशैवायां दीक्षायां धृतलिङ्गकः।
न नीचमाचरेत् कर्म नायासं नापि कुत्सितम्[२]।।

वीरशैवदीक्षासम्पन्नो धृतलिङ्गको नीचं कर्म कदापि नैव कुर्यात्, कुत्सित-मायसकरं कर्माऽपि सन्त्यजेत् शिवपूजाकार्ये च जिपुणत्वं मा कुर्यात्। अष्टविधार्चनमेव कुर्यात्।

तिलाक्षतैर्बिल्वदलैर्नित्यपूजां समाचरेत्[३]।।

नित्यलिङ्गपूजने जलं तिलमिश्रितानक्षतान्, बिल्वदलानि, पुष्पाणि, धूप-दीप-नैवेद्य-ताम्बूलादीनि समर्पयेत्। पूजासमये विनयभक्तिभावेन समर्पणभावेन च लिङ्गं प्रपूजयेत्। अनेकेषु एकत्वभावनात्, ज्ञानकर्मसमन्वयात् वीरशैवमतं श्रेष्ठतममिति शिवेन प्रमाणीकृतम्—

यथापवर्गः प्राप्येषु तथा वीरशैवमतं मम।
तत्र सप्तविधानां तु वीरशैवमनुत्तमम्।।
वीरशैवमतं तत्र विशेषेण समाश्रयेत्।
इति ते कथितं देवि वीरशैवमतोत्तमम्[४]।।

प्राप्तवस्तुषु यथापवर्गः (मोक्षः) श्रेष्ठो वर्तते, तथैव सर्वमतेषु शैवमतमधिकं दृश्यते। सप्तशैवेषु वीरशैवमतं अनुत्तमम्; अर्थात् श्रेष्ठतमम्, सर्वोत्तममिति पञ्चमपटलान्ते परमेश्वरः पार्वत्यै बोधितवान्–हे देवि ! सर्वश्रेष्ठ-वीरशैवमतस्य स्वरूपं तुभ्यं कथितम्। तथा च तस्याचरणनिरूपणमपि प्रतिपादितमिति।

---

१. पा. आ., ५.४१-४२। २. तत्रैव, ५.६७-६८।
३. तत्रैव, ५.८१। ४. तत्रैव, ५.१०५-१०७।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वीरशैवमतमाहात्म्ये तत्त्वत्रयस्य परिज्ञानमावश्यकं भवति। वीरशैवस्याऽष्टावरणमेवाऽङ्गानि भवेयुः, पञ्चाचाराः प्राणाः स्युः, षट्स्थलमात्मा स्यात्। एतत्तत्त्वत्रयस्य परिज्ञानेन नित्याचरणेन च वीरशैवस्य माहात्म्यमवगम्यते। अतः पारमेश्वरागमे षष्ठपटले षट्स्थलस्वरूपनिरूपणं कृतम्, सप्तमपटले षट् शैवनिरूपणानन्तरमष्टावरणप्रतिपादनं जातम्। पञ्चाचारा वीरशैवस्य ध्येयभूता विद्यन्ते। अष्टावरणसम्पन्नः पञ्चाचारपरायणः सन् षट्स्थलमात्मप्रत्ययत्वेन आचरणीयं स्यात्–गुरुलिङ्गं जङ्गमश्च पादतीर्थं प्रसादकम्।

देहे विभूतिरुद्राक्षौ मम पञ्चाक्षरी मनुः ।।
अष्टावरणसंयुक्ता वीरमाहेश्वरा नराः ।
मम रूपधरा देवि विचरन्ति महीतले[१] ।।

गुरुः, लिङ्गम्, जङ्गमः, पादोदकः, प्रसादः, विभूतिः, रुद्राक्षः, मन्त्रः–इत्येतान्यष्टावरणानि सन्ति। अष्टावरणसंयुक्तो वीरशैवः शिवरूपधारी भूत्वा महीतले विचरन्तीति शिवेन प्रतिपादितम्। अष्टावरणे प्रथमा गुरुकृपा, गुरुकृपया इष्टलिङ्गप्राप्तिः, इष्टलिङ्गाराधनं जङ्गमसन्तृप्त्या सफलं भवति जीवनम्। जङ्गमाराधनेन पादोदकप्रसादप्राप्तिर्भवति। विभूतिरुद्राक्षमन्त्राः पूजासाधनभूता विद्यन्ते। पञ्चाचाराः प्राणा भवन्ति। अष्टावरणसम्पन्ने पञ्चाचारपरायणेन षट्स्थलात्मनः साक्षात्कारो लभ्यन्ते। परमेश्वरः कथयति–"तन्मन्थनोत्थितं सारं वीरशैवं परं शिवे"[२] इति।

सकलशैवमतानां मन्थनेनोत्थितं सारभूतमेव वीरशैवमतम्। परमेशं पृच्छति पार्वती माता–हे करुणासिन्धो! "वद मे षट्स्थलज्ञानलक्षणं तत्फलं विभो"[३] इति। तदा परमेश्वरः प्रतिवदति–

शृणु देवि प्रवक्ष्यामि स्थलषट्कस्य लक्षणम् ।
यज्ज्ञात्वा जायते सद्यः शिव एव न संशयः ।।
गोपनीयं प्रयत्नेन दरिद्राणां यथा निधिः ।
शिवभक्तिविहीनाय दुराचाररताय च ।
नास्तिकाय न दुष्टाय वक्तव्यः षट्स्थलक्रमः[४] ।।

हे देवि! षट्स्थलस्वरूपलक्षणं प्रवक्ष्यामि, तत्सर्वं शृणु। षट्स्थललक्षणं ज्ञात्वा सद्यः शिव एव भवति, तत्र संशयो नास्ति। दरिद्राणां कृते निधिर्गोपनीयो वर्तते, तद्वत्

---

१. पा. आ., ७.५४-५५। २. तत्रैव, ७.९०।
३. तत्रैव, ६.१। ४. तत्रैव, ६.२-४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

षट्स्थलं प्रयत्नेन गोप्यं कुर्यात्। षट्स्थलतत्त्वं शिवभक्तिविहीनाय दुराचारे रताय नास्तिकाय दुष्टमनुष्याय च कदापि न वक्तव्यम्। यतः शिवभक्तिविहीनो मानवस्तत्त्वेष्वास्तिक्य-भावं नहि करोति। वीरशैवमते श्रद्धाभाव एव प्रमुखः।

स्थलं नाम परमात्मा सच्चिदानन्दरूपः। तदेवोक्तमस्मिन् आगमे—

अहमेव जगत्स्रष्टा पुनर्मय्येव लीयते।
अहमेव स्थलं विद्धि षड्विधं मम रूपकम्।।
भक्तो माहेश्वरश्चैव प्रसादी प्राणलिङ्गकः।
शरणः शिवलिङ्गैक्यः स्थलषट्कं मम प्रियम्[1]।।

शिवः कथयति–अहमेव जगत्स्रष्टा। इदं जगत् पुनर्मय्येव लीयते। सर्जन-लयकर्तृत्वेन स्थलं नाम जायते। स्थलं तु षड्विधं भवति। भक्तः, माहेश्वरः, प्रसादी, प्राणलिङ्गी, शरणः, ऐक्यः–इत्येते षट्स्थलपदवाच्या भवन्ति। अत्र भक्तादिस्थलत्रयं पूज्यपूजकभावेन वर्तते। षट्स्थलात्मकपूजाविधानेन साधकः शिवरूपो भवति। प्राणलिङ्गि-स्थले तु शिवाद्वैतभाव एव निष्पद्यते। अत एवोक्तम्—

यः प्राणलिङ्गलिङ्गी स्यात् स रुद्रो नात्र संशयः।
प्राणलिङ्गिस्थलमिदं मम चातिप्रियं शिवे[2]।।

यः प्राणलिङ्गी भवति, सः निस्संशयं रुद्रो भवति। इदं प्राणलिङ्गिस्थलं शिवायाऽतिप्रियं जायते। एवमेव शरणस्थलमपि भवति—

शरणत्वाधिकारी यः स देहान्ते शिवो भवेत्।
शरणाख्यस्थलमिदं मम चातिप्रियं शिवे।।
व्योमतत्त्वमिदं देवि तनुरन्यतमा मम[3]।।

यः शरणः, स देहान्ते शिवरूप एव भवति। यत एतत् शरणस्थलमपि शिवस्य प्रियतरं विद्यते। शरणस्थले तु तस्य तनुर्व्योमकायो जायते। शरणो व्योमाङ्गो वर्तते। वीरशैवस्य महिमाऽपारतरा विद्यते। द्वादशाब्दीयोऽल्लमप्रभुदेवे व्योमकायसिद्धिं लब्धवान्।

षट्स्थलसाधनेन बहवो लाभा भवन्ति। साधकजीवने आचारविचारसमन्वयो

---

१. पा. आ., ६.७-८।
२. तत्रैव, ६.२९।
३. तत्रैव, ६.२४-२५।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लभ्यते साधनेन जन्मसंसारबन्धनान्मुच्यते। शिवस्य षट्शक्तयो षट्स्थलसाधके समाविष्टा भवन्ति। षट्स्थलसाधने भक्तिः प्रवर्धते। कर्मक्षयो भवति। सुबुद्धिर्जायते। पूज्यशङ्कराचार्येण कथितम्—

"भक्तिः किं न करोत्यहो वनचरो भक्तावतंसायते"[1] इति। भक्त्या वनचरो बेडरकण्णप्पाख्यः भक्तश्रेष्ठोऽभवत्। भक्तिप्रभावेणैव दुर्वासनानुबन्धीनि कर्माणि क्षीयन्ते। कर्मबन्धेषु नष्टेषु बुद्धिः स्वच्छा भवति, पवित्रा जायते। सन्त्यक्तविषया बुद्धिः परमात्मचिन्तने संलग्ना जायते। यस्य निर्मला बुद्धिर्भवति, तेन शिवयोगो लभ्यते। तदेवोक्तम्—

यस्यास्ति निर्मला बुद्धिरधीशे मयि शङ्करे।
स मामुपैति भ्रमरकीटन्यायेन सुन्दरि[2]।।

यस्य निर्मला बुद्धिः, स भ्रमरकीटन्यायवत् शिवरूपो भवति। एवं च शरणस्य हृदये गुरूक्तवाक्यार्थचिन्तनं भवति। तेन हिताऽहितविवेको जायते। स सकलं शुभाशुभं जानाति। एतादृशविचारवति शरणे ईश्वरस्वरूपज्ञानं सञ्जायते। शिवज्ञानेन दर्पसंक्षयो भवति। स सम्यग् ज्ञानी, शिव एव भवति।

अष्टमपटले वीरशैवलक्षणाचारनिरूपणे प्रथमं वीरशैवपदस्थ'वीर'शब्दस्य व्याख्या प्रतिपादिता। यथा—

वीरत्वं नाम देवेशि यथा वीरो रणे भटः।
तथा मते च सद्भक्त्या वीरो वैराग्यतो दृढात्।।
एषणात्रयनिर्मुक्ता ज्ञानविज्ञानतत्पराः।
दृढवैराग्यसम्पन्ना वीरास्ते शिवयोगिनः[3]।।

ईश्वरः पार्वत्यै प्रतिवदति। हे देवेशि! यथा रणरङ्गे भटो वीरो भवति, तथा वीरशैवमते सद्भक्त्या वैराग्यतो दृढवीरो भवति। एवञ्च पुत्रैषणावित्तैषणालोकैषणाभिर्विनिर्मुक्तो ज्ञानविज्ञानेषु तत्परः शिवयोगिनो वीरा भवन्ति। ये वीरशैवाः परनारीरूपदर्शने अन्धाः, परदोषानुवादने मूका वर्तन्ते, सर्वज्ञा अपि बाला इव विद्यन्ते, परकान्तासु षण्डाः, अन्यपीडने पङ्गवः, विषयरसास्वादने अजिह्वा भवन्ति, त एव वीराः कथ्यन्ते। ये चामानिनः, अदम्भिनः, अहिंसावादिनः, आर्जवान्विताः, गुरुलिङ्गजङ्गमभक्तिपरायणाः,

---

१. शिवानन्दलहरी।
२. पा. आ. ६.५०।
३. तत्रैव, ८.७.८।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्वत्र समचित्ताः, विशुद्धभक्ताः, एकान्तवासिनो ध्यानरता भवन्ति, त एव निजवीरशैवाः, त एव वीराः सम्पद्यन्ते। वीरशैवव्रतस्थो भक्तः शिवपूजां विना अन्यत् कार्यं न करोति, किञ्चित् न खादति, शिवध्यानं शिवस्मरणं शिवकीर्तनं विना दैनन्दिनकार्यं न करोति। आचारविचारैरेव वीरशैवमाहात्म्यं व्यक्तं वर्तते। अयमेव नियताचारोऽस्ति।

नित्यं प्रातश्च सायं च पूजा नित्यैकदा शिवे।
अशक्तश्चासहायश्च यथेच्छं पूजयेत् सदा।
शक्तोऽपि यो न कुरुते रौरवे नरके वसेत्[१]।।

लिङ्गधारी भक्तो नित्यं त्रिकालमभ्यर्चयेत्, प्रातः सायमपि पूजां कुर्यात्। अशक्तोऽसहायकोऽपि नित्यैकदा लिङ्गपूजां कुर्यात्। शक्तोऽपि वीरशैवः लिङ्गपूजां न करोति, चेत्, स रौरवे नरके वसेद् इति शिवाज्ञा विद्यते। नित्याचारविचारेणैव वीरशैवः सर्वेषु प्राणिषु श्रेष्ठतमो भवति। यथा हि—

भूतानां प्राणिनः श्रेष्ठाः बुद्धिमन्तस्ततोऽधिकाः।
ततस्ततोऽपि च बृहद् बृहदाकृतयो जनाः।।
सर्वोत्तमा हि मनुजास्तत्र विप्रा महोत्तमाः।
वेदिनः कर्मकर्तारस्तदर्थज्ञा विशेषतः।।
ततो वेदान्तसारज्ञास्ततः संन्यासिनः परे।
ततः पाशुपताः श्रेष्ठा लिङ्गिनस्तु ततोऽधिकाः।।
ततोऽधिका महाश्रेष्ठा वीरमाहेश्वराः शिवे।
न तेभ्यो ह्यधिकः कश्चिद् वीरशैवाश्रयात् परः।।
तावन्महिमसम्पन्नो वीरशैवः परः शिवः[२]।।

सर्वेषु मानवेषु लिङ्गधारिण एव श्रेष्ठाः, तत्रापि वीरमाहेश्वरा महाश्रेष्ठाः। तेभ्यस्तु न कोऽप्यधिक इति प्रतिपाद्यते। "वीरशैवः परः शिवः" इत्येत्कथनाद् वीरशैवस्य माहात्म्यं ज्ञायते। अपि च—

वीरशैवमतस्थस्य मुक्तिः करस्थले स्थिता।[३] वीरशैवमतस्याऽऽचाराननुसरतो भक्तस्य करस्थले मुक्तिः प्रत्यक्षेति शिवेनैव प्रतिपादनाद् वीरशैवमाहात्म्यं स्पष्टं दर्शितमेव।

पारमेश्वरागमे नवमपटले प्रत्येकं वीरशैवमतमाहात्म्यनिरूपणं कृतम्। यथा

---

१. पा. आ., ८.६५-६६।
२. तत्रैव, ८.६६-७३।
३. तत्रैव, ८.७८।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

काश्यां मरणान्मुक्तिर्लभ्यत इति श्रद्धा वर्तते, तथैव वीरशैवमते प्रवेशमात्रेण शिवो भवति। यद्वत् क्षुधितस्यापि तृप्तस्य वा शर्करा मधुरा भवति, तद्वद् ज्ञानिनोऽज्ञानिनो वा वीरशैवमतं सुखप्रदमेव विद्यते[1]। यदि वीरशैवमतं प्रविश्य यः कश्चिदाचारहीनो जायते, स प्रायश्चित्ती नूनं भविता। तत् कथितं शिवेन—

वीरशैवमतं प्राप्य यो बुद्ध्या विषयातुरः।
श्वानयोनिशतं गत्वा चाण्डालो भुवि जायते।।
वीरशैवमतं प्राप्य यः कुर्यात् प्राणिहिंसनम्।
कर्मणा मनसा वाचा स वसेद् रौरवे चिरम्।।
भोगार्थं सङ्ग्रहं मद्यं मांसं स्त्रीं च कलञ्जनम्।
स कोटिजन्मसु श्वा वै चाण्डालो भुवि जायते[2]।।

आचारनिष्ठो वीरशैवः; अनाचारेण तु वीरशैवत्वं न लभ्यते। आचारहीना वीरशैवा अपि रौरवे नरके गच्छन्ति। तदुक्तम्—

यः पश्यत्यन्धवद्रूपं शब्दवद् बधिरोपमः।
काष्ठवद् दृष्टदेहो यो वीरशैवः स उच्यते।।
न बुद्ध्या चिन्तयेदर्थं वीरशैवव्रते सकृत्।
न प्राणिपीडनपरो वीरशैवः स उच्यते।
मर्म विज्ञाय शास्त्रस्य यो बुद्ध्या विषयातुरः।।
तस्य नास्त्येव नास्त्येव मत्पदप्राप्तिरीश्वरि[3]।।

वीरशैवमतस्थः साधक आचारे दृढमनस्को भवति, सुन्दरस्त्रीरूपं दृष्ट्वाप्यन्धवत् तिष्ठति। शब्दज्ञानविदपि बधिरोपमो भवति। यो काष्ठवत् स्वीयशरीरं पश्यति, स एव वीरशैवो भविता। वीरशैवव्रतस्वीकारानन्तरमर्थचिन्तां परित्यजेत्। (कायक) नित्योद्योगशीलतयाऽर्थचिन्ता न भवति। वीरशैवः प्राणिपीडनम्, हिंसादिकं कर्म कदापि न कुर्यात्। शास्त्राणां रहस्यं ज्ञात्वापि यदि विषयासक्तो भवेद्यदि स वीरशैवो न भवति। तस्य शिवपदप्राप्तिर्नैव भविता। यदिदं सत्यं वचः। कदापि बलात्काराद्वा वीरशैवमते न प्रवेशो वर्तते। अलिङ्गिना सह सम्पर्कं मा कुर्यात्। यत आचारभेदात् विचारभेदाच्च सम्बन्धो नैव युज्यते। वीरशैवमते तु कायक्लेशादिकमुपवासादिव्रतादावुपोषणमपि न कर्तव्यम्। वीरशैवमते सहजाचारविचारसमन्वयात्, क्रियाज्ञानसमुच्चयाच्च तन्मतवैशिष्ट्यं पूर्णं वर्तते। तदेवोक्तम्—

---

१. पा. आ., ९.१२-१३।
२. तत्रैव, ९.२३-२७।
३. तत्रैव, ९.२८-३२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्र सर्वोन्नतं वीरशैवव्रतमनुत्तमम्[१] ।।

अत्र वीरशैवव्रतमेव सर्वोन्नतं प्रतिपादितं वर्तते। एवं च—

दैवोपलब्धसुखभुक् शिवपूजापरायणः ।
वीरशैवपदं प्राप्य सुखेनोपैति निर्वृतिम्[२] ।।

देवकृपया प्राप्तं लिङ्गभोगोपभोगरूपं वीरशैवसाधनरूपं शिवपूजादिकं लब्ध्वा वीरशैवो निर्वृतिं (मोक्षं) प्राप्नोतीति शिवेन प्रतिपादितम्।

वीरशैवमतं पुण्यैकलभ्यं वर्तते। पुण्येन विनेदं मतं नैव प्राप्यते। अत एव कथितम्—

करस्थिते ज्वलद्दीपे वीरशैवाभिधे सति ।
कुमार्गेण व्रजेद् यस्तु सोऽन्धो निर्गतलोचनः ।।
वीरशैवमतं स्वच्छवज्रनावमधिष्ठितः ।
सुखं तरेद् भवाम्बोधिं भक्तिनाविकचोदितः[३] ।।

यथा करस्थितो जाज्वल्यमानदीपः प्रकाशते, तथैव वीरशैवाभिधे मते दीपवत् प्रकाशो लभ्यते। अस्मिन् मते यः कुमार्गेणाऽनाचारेण व्रजेद्यदि, सो निर्गतलोचनः सन् अन्धो भवति। वीरशैवमतं नाम स्वच्छवज्रनावाधिष्ठितो भक्तोः भवसागरं सुखरूपेण तरति। यथा भक्तिरूपनाविकस्य सहायेन सुखपूर्वकं भवसमुद्रस्य पारं तरति, अर्थात् भक्त्या भवाम्बुधिं निरायासेन तरति। इदमेव वीरशैवमतस्य महत्त्वपूर्णं वैशिष्ट्यं विद्यते।

पारमेश्वरागमे वीरशैवमाहात्म्यमधिकतरं वर्णितमस्ति। वीरशैवायोपदिश्यमानः षडक्षरमन्त्रोऽपि महान् शक्तियुक्तो वर्तते। तदुक्तम्—

सप्तकोटिमहामन्त्रैरुपमन्त्रैरनेकशः[४] ।
मन्त्रः षडक्षरोऽभिन्नं सूत्रं वृत्त्यात्मनो यथा ।।
षडक्षरमयं देवं मां तु यो जपते भुवि ।
तस्य मुक्तिः करस्था स्याद् वीरशैवमतस्य च[५] ।।

षडक्षरमन्त्रं हृदि स्मरतो वीरशैवस्य मुक्तिः करस्थैव भवति। अस्मिन्नागमे

---

१. पा. आ., ९.५३ ; २. तत्रैव, ९.५७।
३. तत्रैव, ७४-७५ ; ४. तत्रैव, ।
५. पा. आ.।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्वादशपटले वीरशैवस्य नैष्ठिकः, अत्याश्रमी, महामाहेश्वरः, तपःश्रेष्ठ, महाव्रती, कृतकृत्यः, लिङ्गाङ्गी–इत्यादीनि पर्यायनामानि पठितानि। त एव श्रेष्ठा इति शिवेन वर्णितम्। अतः परं वीरशैवमाहात्म्यं किमु वक्तव्यं स्यात् ? तथापि वीरशैवमहात्म्यरूपं सारं शृणोतु–

क्रिमिकीटपतङ्गेभ्यः पशवः प्रज्ञयाधिकाः।
पशुभ्योऽपि नराः श्रेष्ठास्तेषु श्रेष्ठा द्विजातयः।।
द्विजातिष्वधिका विप्रा विप्रेषु कृतबुद्धयः।
कृतबुद्धिषु कर्तारस्तेभ्यः संन्यासिनोऽधिकाः।।
तेषु विज्ञानिनः श्रेष्ठास्तेषु शङ्करपूजकाः।
तेषु श्रेष्ठा महादेवि मम लिङ्गाङ्गसङ्गिनः[१]।। इति।

॥ नमोऽस्तु लिङ्गाङ्गसङ्गिभ्यः ॥

●

ग्रन्थऋणम्

१. शक्तिविशिष्टाद्वैततत्त्वत्रयविमर्शः, डॉ. चन्द्रशेखर शिवाचार्य स्वामी जी जङ्गमवाड़ी मठ, वाराणसी।
२. पारमेश्वरागमः, सं. व्रजवल्लभद्विवेदः–प्रकाशकः जङ्गमवाड़ी मठ, वाराणसी
३. मकुटागमः, ,, ,, ,, ,, ,,
४. शिवागम सौरभ (कन्नड) सं. डा. ज.च.नि. बेंगलूर
५. सुभाषितरत्नभाण्डागारम्, निर्णयसागरप्रेस, मुंबई
६. वीरशैवस्य जननं प्रसारम् (कन्नड), प्रो शि शि बसवनाक धारवाड
७. शङ्करसंहिता, सोल्लापुरवारदप्रकटिता
८. सिद्धान्तशिखामणिः, सं. काशीनाथशास्त्री नागनूर बृहन्मठ
९. शिवयोगप्रदीपिका, चन्नसदाशिवयोगीन्द्रविरचिता
१०. विशेषार्थप्रकाशिका, मोग्गेयमायिदेवविरचिता
११. शिवानन्दलहरी, शङ्कराचार्यकृता

---

१. पारमेश्वरागमे

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वीरशैवमत में दीक्षाविधान

पं. जनार्दन पाण्डेय

भारतीय संस्कृति में श्रुति दो प्रकार कही गयी है— वैदिकी और तान्त्रिकी। जैसा कि मनुस्मृति के टीकाकार कुल्लूक भट्ट ने लिखा है **''श्रुतिर्द्विधा वैदिकी तान्त्रिकी च''**। वैदिक कर्मकाण्ड तो प्रसिद्ध ही है। गर्भाधान से लेकर मृत्यु पर्यन्त सभी संस्कार वैदिक विधि से होते हैं। इनसे आत्मशुद्धि होकर व्यक्ति मानवजीवन के चरम लक्ष्य मुक्ति या मोक्ष को प्राप्त करता है, किन्तु वह सबके लिये सम्भव नहीं है और मुक्ति की कामना सबको होती है। इसलिये सर्वसाधारण के लिये तान्त्रिकी विधि का विधान है। शैवदर्शन भी प्राय: इसी का अनुसरण करता है, किन्तु उसके कर्मकाण्ड में वैदिक विधानों का पर्याप्त प्रभाव दीखता है।

आगम या तन्त्रशास्त्र के प्रतिपाद्य विषयों में दीक्षा एक अत्यन्त महत्त्वपूर्ण विषय है। प्राय: सभी धर्मों, सम्प्रदायों का दीक्षा एक अनिवार्य अङ्ग है। हाँ, उसका स्वरूप भिन्न हो सकता है। उससे सम्बद्ध विस्तृत साहित्य प्राप्त होता है। प्रस्तुत निबन्ध में वीरशैव मत में दीक्षा के स्वरूप पर संक्षेप में विचार किया गया है।

शैवों के सात प्रकार

शैवों के सात प्रकार बताये गये हैं–१. अनादि शैव, २. आदि शैव, ३. अनुशैव, ४. महाशैव, ५. योगशैव, ६. ज्ञानशैव और ७. वीरशैव। अनादिशैव कर्म को, आदिशैव भगवत्स्मरण को, अनुशैव मनन को, महाशैव परम गति को, योगशैव अष्टाङ्ग योग को, ज्ञानशैव ज्ञान की भावना को मुक्ति का साधन मानता है; किन्तु वीरशैव ज्ञान और योग दोनों को साधन मानता है, उसका कहना है कि ज्ञान के बिना योग और योग के बिना ज्ञान सिद्ध नहीं हो सकता। अत: वीरशैव मत सर्वश्रेष्ठ है। पारमेश्वरागम के सप्तम पटल में इस विषय का विस्तृत वर्णन मिलता है।

वीरशैव शब्द की परिभाषा इस प्रकार की गई है–

'वी'शब्देनोच्यते विद्या शिवजीवैक्यबोधिका।
तस्यां रमन्ते ये शैवा वीरशैवास्तु ते मताः।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अर्थात् शारीरिक पौरुष में नहीं, शिवभक्ति में वीरता दिखाने के कारण ये वीर-शैव कहे जाते हैं। इन सातों शैवों का दीक्षाविधान सोपान क्रम से होता है।

दीक्षा

दीक्ष् धातु संस्कार अर्थ में प्रयुक्त होता है, इसी से दीक्षा शब्द बनता है, संसार का प्रत्येक मानव दुःख की निवृत्ति और सुख की प्राप्ति चाहता है, वह सुख ऐहलौकिक हो या पारलौकिक या परमसुख (मुक्ति), उसके लिये उसे परमात्मा के किसी स्वरूप की इष्टदेवता के रूप में भावना करके साधना करनी पड़ती है। वह साधना तभी कर सकता है, जब उसकी आत्मा शुद्ध हो। आचार्य क्षेमराज ने लिखा है–**''आत्मसंस्कार एव दीक्षा''**। अर्थात् आणव, कार्म और मायिक मलों से आवृत आत्मा को उनसे रहित करना ही दीक्षा का उद्देश्य है। इसीलिये आगमशास्त्रों ने दीक्षा की परिभाषा इस प्रकार की है–

दीयते ज्ञानसद्भावः क्षीयते पशुवासना।
दानक्षपणसंयुक्ता दीक्षा तेनैव कीर्तिता।।

यह दीक्षा तीन प्रकार की होती है–वेधा, मान्त्री और क्रियादीक्षा।

१. वेधा दीक्षा

इसमें गुरु अपने दाहिने हाथ को षडक्षर मन्त्र से ६ बार अभिमन्त्रित कर, उसमें शिव के हाथ की भावना करके शिष्य के मस्तक पर रखता है और एकटक दृष्टि से उसे देखता है। इसमें सात प्रकार के उपदेशात्मक संस्कार होते हैं, जो अभय, निःसंसार, निर्वाण, तत्त्व, अध्यात्म, तत्त्वविशोधन और तत्त्वबोधन नाम से जाने जाते हैं। इस दीक्षा से शिष्य के आणव मल की निवृत्ति हो जाती है और उसमें **'शिवोऽहम्'** की भावना जागृत होती है।

महामाहेश्वराचार्य अभिनवगुप्त ने तन्त्रालोक के १९वें आह्निक में इस पर विशेष विचार किया है। उनके अनुसार गुरु जब शिष्य के मस्तक पर हाथ रखकर उसपर अनुग्रह दृष्टि डालता है, तो शिष्य की प्राणशक्ति का उत्थान, आरोह-अवरोह की गति तथा षट्चक्रों का शोषण-दाहन-आप्यायन-सकलीकरण आदि क्रियाएँ अनायास होने लगती हैं। उन्होंने इसके ६ भेद बताये हैं—मन्त्र, नाद, बिन्दु, शाक्त, भुजग और परवेध। इसके अतिरिक्त उन्होंने तुलादीक्षा और योजनिका दीक्षा ये दो भेद और भी बताये हैं।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

२. मान्त्री दीक्षा

इस दीक्षा में गुरु शिष्य के दाहिने कान में पञ्चाक्षर महामन्त्र का उपदेश देता है। इसमें भी सात प्रकार के उपदेशात्मक संस्कार होते हैं–चित्तैकाग्रता, दृढ़व्रतत्व, पञ्चेन्द्रियार्पणा, अहिंसा, लिङ्गनिष्ठा, लिङ्गमनोलय और सद्योमुक्ति। इस सप्तविध दीक्षा से शिष्य के मायीय मल की निवृत्ति होती है और **'चिद्रूपोऽहम्'** की भावना उद्बुद्ध होती है।

३. क्रिया दीक्षा

इस दीक्षा में मण्डप बनाकर उसके बीच में पञ्चकोण बनाया जाता है। उसके पाँचों कोणों में पञ्चाक्षर महामन्त्र का एक एक अक्षर लिखकर उनपर पाँच कलश स्थापित किये जाते हैं, जो शैवधर्म के आदि प्रवर्तक पञ्चाचार्यों (रेवणसिद्ध, मरुलसिद्ध, एकोराम, पण्डिताराध्य और विश्वाराध्य) के प्रतीक माने जाते हैं। इस प्रक्रिया में पूरा कर्मकाण्ड हवन आदि प्राय: वैदिक विधि की तरह ही होता है और अन्त में उन कलशों के जल से शिष्य का अभिषेक किया जाता है। इस दीक्षा से शिष्य के कार्मिक मल की निवृत्ति होती है तथा इसमें भी सात प्रकार के उपदेशात्मक संस्कार होते हैं, जो–आज्ञा दीक्षा, उपमा दीक्षा, कलशाभिषेक, स्वस्तिकारोहण, भूतिपट्ट, आयत्त और स्वायत्त नाम से जाने जाते हैं।

कारणागम में दीक्षा विषय पर विस्तृत विवरण दिया गया है। पारमेश्वरागम के द्वितीय पटल में दीक्षा का केवल उपक्रम दिया है। दीक्षा कब लेनी चाहिये, गुरु शिष्य कैसे होने चाहिये आदि। तीसरे पटल से सातवें पटल तक की पुष्पिकाओं में 'दीक्षा प्रकरणे' कहा गया है, किन्तु इसमें क्रिया दीक्षा का ही वर्णन है, क्योंकि इसका प्रारम्भ ही मण्डप निर्माण से होता है। आगे दीक्षा का क्रम और दीक्षोपयोगी उपकरणों का विधान है। चतुर्थ पटल में दीक्षाङ्ग होम की प्रक्रिया बताई गई है। पञ्चम पटल में लिङ्गग्रहण दीक्षा का विधान है, सप्तम में सात प्रकार के शैवों के लक्षण और वीरशैव की श्रेष्ठता का वर्णन है। आगे चलकर बीसवें पटल में दीक्षा के विशेष प्रकार बताये हैं। इनमें अनादि शैव से ज्ञान शैव तक के ६ प्रकार के शैवों के लिये एक कलश वाली दीक्षा का विधान है। वीरशैवों के तीन भेद किये हैं–सामान्य वीरशैव, विशेष वीरशैव और निराभारी (तुर्य) वीरशैव। इनमें सामान्य और विशेष के लिये तीन कलशवाली तथा निराभारी के लिये पाँच कलशवाली दीक्षा का विधान है। निराभारी (तुर्य) वीरशैव नित्य और नैमित्तिक कार्यों को केवल कर्तव्य बुद्धि से करता है। फल की अभिलाषा से काम्य कर्म कभी नहीं करता, अत: वह सर्वश्रेष्ठ है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वीरशैवों के लिये लिङ्गधारण अनिवार्य है और जब तक दीक्षा नहीं होती, तब तक कोई लिङ्गधारण का अधिकारी नहीं होता। इसीलिये जैसे वैदिक विधि में ब्राह्मण के लिये ८वें वर्ष में, क्षत्रिय के लिये ११वें वर्ष में गायत्री दीक्षा लेना (उपनयन) आवश्यक है, वैसे ही वीरशैवों के लिये भी आठवें वर्ष में पञ्चाक्षर मन्त्र की दीक्षा लेना अनिवार्य है। चूँकि संसार के सभी जीव शिव के ही अंश हैं, अतः इस दीक्षा में किसी प्रकार का जातिभेद या लिङ्गभेद नहीं माना जाता।

दीक्षित व्यक्ति ही शिवयोग की साधना करके मुक्ति को प्राप्त कर सकता है।

•

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

Liṅga-worship in Vīra-Śaivism

Dr. Rama Ghose

Āgama and Nigama are the vast, unfathomable treasures of the Indian Religion and Philosophy. Sanskrit lexicon 'Nighantu' names the Veda as 'Nigama' and Tantra as 'Āgama' and hence both have been regarded under a common caption as 'Śruti'. Śruti denotes both Veda and Tantra, the two parallel stream of expressions of the nature of Reality and the means to achieve the one and the same goal, though adopting a different approach of their own. The syllable 'Ā' denotes that which is originated, 'ga' signifies 'falling' i.e. falling to the Goddess Pārvatī and 'ma' means the religion or the doctrine for the devotee. It is the exposition of divine knowledge, and the way to attain it through the prescribed procedures and meditation along with the hymns. According to Pauṣkar Āgama, there are ten Śaivāgamas and eighteen Rudrāgamas recognised as Siddhāntāgama. Kāmika, Yogaja, Cintya, Kāraṇa, Ajit, Sudīpta, Sūkṣma, Sahasra, Suprabheda, Śiva and Vijaya, Pārameśvara, Nihśvāsa, Prodgīta, Mukhabimba, Siddhamat, Santāna, Nārasiṁha, Candrahāsa, Bhadra, Svāyambhuva, Viraja, Raurava, Mukuṭa, Kiraṇa, Lalita, Āgneya and Parākhya are the ten Śaivāgamas and the eighteen Rudrāgamas respectively manifested by Lord Śiva. This has been stated in Kiraṇāgama and Śrikanṭha-saṁhitā that though the knowledge by itself is undivided and indivisible but Paramaśiva, the omniscient ultimate Reality, out of compassion for the welfare of the world, manifested this eternal knowledge primarily to the ten Śivas and eighteen Rudras for the purpose of revealing it to the empirical world through the divinities and ṛṣis. It is pertinent to note here that the Vedas also represent indivisible eternal knowledge which is revealed to the ṛṣis in a state of spiritual trance of deep meditation.

Pārameśvarāgama, as stated above is one of the famous Rudrāgamas revealed as the discourse between the God (Śiva) and Goddess (Pārvatī). This Āgama often follows the Vedic tradition

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

along with the Āgamic approach, such as, Tapa, Karma, Japa, Dhyāna and Jñāna (penance, action, repetition of hymn, meditation and knowledge) have been regarded as five-fold Yajña named as Pāśupata-vṛata (Pāśupata discipline) in the Vāyavīya Saṁhitā of Śiva-Mahāpurāṇa. Sūkṣmāgma and Pārameśvarāgama describe the above mentioned discipline which have again been stated in Siddhānta Śikhāmaṇi (9.21-24). Pañcasūtraliṅga, Prasāda, Pañcākṣara, Pañcānuvāk, Rudrādhyāya, Rudraikādaśinī, Aṣṭabandha, Tuti, Dhyāna etc. are the significant concepts that have duly been explained along with prescribed procedures and hymns. Regarding the observance of various spiritual disciplines, Pārameśvarāgama maintains a broad view of recognition of dignity and utility of each and every discipline.

The special feature of Vīra Śaivism, otherwise named as Liṅgāyat Śaivism, is the procedure of worshipping Iṣṭaliṅga on the palm of the left hand. It is called कर पंकज पीठ– the lotus palm–seat. Iṣṭaliṅga is installed in the middle of the palm of the left hand, then the worship is being performed with prescribed procedure. This palm-seat is the imparter of the four Puruṣārthas–Dharma, Artha, Kāma, Mokṣa. Here is a short discussion about the various seats and their relative results as advocated by Pārameśvarāgama.

The seat made of stone bestows son and wealth, of iron accords all kinds of attainments, of clothes provides all kinds of good results and the seat made of leaves grants gold. But the seat made of wood, earth, leather, blanket and grass cause various kinds of suffering and disturbances. Lotus palm is considered to be the supreme.

तत्र सर्वोत्तमं देवि पीठार्थं करपङ्कजम् ।।

Pārameśvarāgama, 16.13

Devotee should contemplate the five fingers as five petals, the middle of the palm as the centre of the lotus and the lines as the pollen. He should also contemplate the five fingers as the five forms of Śiva (Iśāna etc.). The centre of the palm is to be meditated as the Goddess Pārvatī. Five fingers starting from the thumb to the little finger gradually are named as गार्हपत्य, दक्षिणाग्नि, आहवनीय, सभ्य, आवसथ्य। Indra etc. eight protector's are to be contemplated on eight directions. Starting from the east four goddesses, namely, Durgā, Māheśvarī, Caṇḍi, Bhadrakālī are to be meditated upon the four directions. Devo-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

tee should imagine the encircling four directions and Gaṇeśa. Baṭuka, Vīrbhadra and Caṇḍa should be meditated upon. Nandīśa, Riti, Bṛṅgī and Tuṇḍi are the four names of the nāyakas i.e. courtiers and they are to be contemplated in Āgneya Riti in Īśāna, Bhṛṅgi in Nairtya, Tuṇḍi in Vāyavīya directions. Mountains like Śri Śailam, rivers like Gaṅgā, Kalpa tree, gem Cintāmaṇi, Kāmadhenu, four Vedas and Purāṇas, Sāṅkhya-yoga philosophies, Dharma śāstras–all these auspicious and pure things are to be contemplated and the Iṣṭaliṅga is to be worshipped in the middle of It. Starting from the elbow to the wrist which is like a stem of the lotus on which five faced Lord is to be meditated upon. The glory of Lotus-palm has been sung by the Lord Himself thus–

सर्वसौभाग्यजनकं यत्पीठं करपङ्कजम् ।।

Pārameśvarāgama, 13.30

करपङ्कजपूजायां तत् सर्वं साङ्गमेव हि ।।

Pārameśvarāgama, 13.31

Proper procedure for the worship of Iṣṭaliṅga has been described by Lord himself. Contemplating the aforesaid auspicious things on the lotus-palm, Iṣṭaliṅga is to be installed within and worship should be performed with the oblation etc. to the best of capacity reciting the Pañcākṣara hymn in a sitting position till the completion of the worship. Devotee should contemplate the Iṣṭaliṅga as immanent in the whole universe being without beginning, middle and end. Because of the intense devotion of the worshipper and the Grace of God, It (God) resides on his lotus-palm-seat.

लिङ्गं विश्वात्मकं ध्यायेदादिमध्यान्तवर्जितम् ।
भक्तेच्छावशतो भक्तपाणिपङ्कजसंस्थितम् ।।

Pārameśvarāgama, 13.43

It has been said by Lord that performance of ablution with intense devotion is superior to the ablution by the water of the oceans.

सहस्रप्रसृतिर्देवि सहस्रघटसम्मिता ।
मम लिङ्गाभिषेकार्थे पुनर्भावनयाऽब्ययः ।।

Pārameśvarāgama, 13.50

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

It has also been uttered that recitation of hymn (japa), praising the glory (stotra) and paying obeisance (Pranāmādi) should also be offered while worshipping Iṣṭaliṅga on the lotus palm-seat.

जपस्तोत्रप्रणामादि पाणिलिङ्गः समाचरेत् ।।

Pārameśvarāgama,13.57

Immense is the result produced by worshipping Iṣṭaliṅga on the lotus-palm-seat only.

अनन्तगुणितं पाणिपङ्कजे मम पूजनम् ।।

